शापि स्यादिति भावः॥ ॥संमाननो॥ संमाननादिषु विशेषणेषु सत्स्विति युक्तं संमान
नां चापकरणं चेतनानां विशेषणत्वं तत्र हि ज्ञापनमेव धात्वर्थः संमाननादीनि तु त
मेव विशेषणतया व्यवच्छिन्दन्तीति उत्संजनादीनां युक्तं तेषामेव धात्वर्थत्वात् तदति
रिक्तस्य विशेष्यस्याभावात् उच्यते संमाननादेरुत्संजनादेश्च विशेषणत्वं संमानं
पूर्वो धात्वर्थस्य विशेषणं उत्तरस्तु धातोरिति विशेष्यमात्रं सिध्यते अतः सुष्ठुक्तं सं
माननादिषु विशेषणेषु सत्स्विति चार्वी बुद्धिरिति चारुशब्दाद्गोतो गुणवचनादिति ङीष्
यथा पर आचार्योपि चार्वीति षष्ठीः प्रवेशायेति पुरुषेषु जटस्य लिंग एव यष्टिशब्दे चार्वीशब्दः ते पु
क्ति लिरित्यादि पूर्वस्मिन्वाक्ये गुणभावेनापि प्रकृताः शिष्याः परामृश्यन्ते स्वाप्यमा
ना इति तिष्ठतिः प्रतिपादने वर्त्तते शिष्या युक्तिभिः प्रतिपाद्यमाना निश्चाय्यमाना इत्यर्थः।

तत्तु देवस्य भाग ३

प्रज्ञिता भवंतीत्यस्मिन्नर्थ इति पादनमेव तेषां प्रज्ञाते पदार्था युक्तिभिः ख्याप्यमाना
इति व्याख्याने पदार्थानामचेतनत्वान्न मुख्यं संमाननं उत्क्षिपंतीत्यर्थ इति प्रतेन उत्सं
जननं नयतेरर्थ इति दर्शयति आचार्यकरणमाचार्यक्रियेति। सूत्रे वृत्तौ च कारणाव
स्थानैर्या विवक्षितत्वात् च्विः प्राप्तो विकल्पान्न कृतः तथा चाचार्यीकुर्वन् इति च्वि प्रत्य
यः प्रयुक्तः। नन्वपनयनं माणवकसंस्कारः येन स्वाध्यायाध्ययने योऽर्थो भवति न
त्वनेनाचार्यस्य कश्चिदतिशयो जन्यते आचार्यशब्दस्य प्रवृत्तिनिमित्तं उपनीयाध्या
पननामक्रियाविशेषः यच्चाउपाध्यायशब्दस्य एकदेशाध्यापनं तत्कथमाचार्य
करणे आत्मनेपदं विधीयत इत्यारु माणवकमीदृशेनेत्यादि एवं मन्यते उपनीया १५२
ध्यापनेन दृष्टरूपः कश्चिदतिशय आचार्ये जन्यते तदेव प्रवृत्तिनिमित्तमाचार्यश
ब्दस्येति तदाह स्वयमाचार्यः संपद्यत इति आत्मानमाचार्यीकुर्वन्निति च हेतुलक्ष
णो लटः शत्रादेशः ईदृशेनेति यादृशः शास्त्रोक्तो विधिः तादृशेनेत्यर्थः ननु यथा
चार्यकमुपनयनस्य प्रयोजनं तत्कर्तृत्ति घाय इति नार्थ आचार्यकरणे आत्मनेप
दविधानेन उच्यते नोपनयनेनाचार्यकं जन्यते। किं तर्हि तत्पूर्वकेणाध्यापनेन उ
पनयनक्रियायास्तु माणवकसंस्कारः साक्षात्फलमेवं संस्कृतस्य माणवकस्य

पदध्यापनं तेनाचार्यकं जन्यत इति न तदुपनयनक्रियाफलं यज्ञतस्याफलं तन्माण
वकगामि न कर्तृगामि निश्चिनोतीत्यर्थ इति अनेन ज्ञानं नयतेऽर्थ इत्यादुदाहारं वि
नयतेऽरितिकर एवकारः प्रज्ञादिः राजसोऽग्यो भागः कर्षकैः कल्पितः॥ ॥कर्तृस्थे॥
नयतेरात्मनेपदविधानात्संबध्यते कर्तृलिकारवाच्यः प्रत्यासत्त्या गृह्यत इत्याह नय
तेः कर्त्रेति तदकदेशोऽपि शरीरमिति अपिशब्दोऽवधारणे इह शरीरस्यैव चैतन्यविशि
ष्टस्य कर्तृत्वं लौकिकाः प्रतियन्ति न तद्व्यतिरिक्तस्य बुद्ध्यादिमत चैतन्यस्य न च
शरीरमेव शरीरस्थं भवति अतस्तदेकदेश एव तत्स्थ इति न गृह्यत इत्यर्थः तत्र क्रो
धाद्युपनयनं फलं कर्तृत्वि ज्ञापयितुमिति स्वरितत्वादेव सिद्धे नियमार्थमिदं कर्तृस्थे
कर्मणीति अशरीर एव भवति अथ कथं विगणय्य नयति पौरुषं विदितं क्रोधजयादि
गीषवद् इति केचिदाहुः अपगमे वर्त्तमानादिदमात्मनेपदमत्र तु कर्मस्थोऽत्यर्थं प्राप्यर्थे
नावर्त्तते अनेकार्थत्वात् धातूनामिति॥ ॥वृत्तिसर्गतायनेषु क्रमः॥ सर्गउत्साह इति
स्पष्टम्बेद्धूलबंधेपनं इलोकावजपायदृश्यत इत्यादो दर्शनात् स्फुतिरुत्साहार्थः व
त्यादिष्विति किमपक्रामति॥ ॥उपपराभ्यां॥ ॥उपपराभ्यामिति किमिति उपसर्गनि
यमः किमर्थ इत्यर्थः संक्रमतीति क्रमः परस्मैपदेष्विति दीर्घः॥ ॥आङः॥ आक्राम

तिमाणवकः क्रतुपमिति अवष्टभ्नातीत्यर्थः क्रत्वाक्रतुः क्रतुपः क्रतुत्वाड्डुप च । क्रत
पमिति पाठे क्रतपोदर्संस्कारः आक्रामति धूमो हर्म्यतलमिति उद्गमे नेक्रमिरकर्म
कः तस्माद्वर्मतत्वादिति पंचम्यंते पठितव्यं यद्वाउद्गमश्च विकायां व्योत्तावत्र क्रमिर्द्द
ष्टव्यः इहतु नस्तः समाक्रामति चंद्रमाः क्रमादिति क्रमिर्व्याप्तौ वर्त्तते नोद्गमने ॥
पि ५ वेः पाद ॥ विक्रामत्यजिनसंधौ विरिति द्विधा भवति स्फुटतीत्यर्थः ॥ ॥ प्रोषाभ्यां ॥ अन्यो
न्यसाहचर्यात् प्रोपयोरुपसर्गयोर्ग्रहणं न प्रातिपदिकांतरकर्मप्रवचनीययोः ना
पि क्रियांतरसंबंधिनोः नाप्यनर्थकयो निपातयो रित्याह प्रउपइत्येताभ्यां उपस
23 र्गाभ्यामिति तुल्यार्थाभ्यामिति एते न समौ अर्थो ययोः तौ समर्थौ शाकं धादिषु पर १५८
रूपं संज्ञाबद्धस्यैव वानेकार्थत्वात् तुल्यार्थयमिति दर्शयति ननु समर्थः पदविधि
रित्यादौ संबंधार्थत्वं समर्थत्वं प्रसिद्धं सत्यं इहतु धात्वर्थं प्रतिपादतं त्यान्न परस्परेण
संबंधाभावत्वं थौ । धातुना चोपसर्गयोः संबंधो न व्यभिचारी तस्मात्सर्वोक्ति एवार्थः प्रक्र
मत इति । आरभत इत्यर्थः ॥ ॥ अनुपसर्गाद्वा ॥ ॥ अप्राप्तविभाषेयमिति उपपराभ्या
मित्यस्य नियमार्थत्वाद्दृत्यादिसूत्रेमनुपसर्गविषय एवेति न तत्रायं विकल्प इति
भावः ॥ ॥ अपह्नवे ज्ञः ॥ शोषौ त्यादि असत्यस्मिन्सूत्रेयमपि शेष इति भावः । सोपस

६

सर्वानुवृत्तौ वचनमिदमनर्थकं स्यादिति भावः। व्यक्तवाक्संबंधिनो वदेरिति सूत्रा
र्थमाह व्यक्तवाग्विषयादिति। अनुः सादृश्य इति तेन काव्यापस्येति तुल्यार्थयोगे शे
षलक्षणा षष्ठीति भावः। पचेत्यादिवदनमात्र सादृश्ये तात्पर्यमिति कर्म न विवक्षि
तमिति भावः। अनुवदतीति पुनर्वदतीत्यर्थः॥ ॥विमाँषु विप्रलापे॥ संवत्सरं विदंति भा
सांवत्सराः ज्योतिषिकाः एवं मौहूर्त्तिकाः॥ ॥अवाक्कः। गिर इति पाठे धात्वनुकरण दुः
त्वात् विभक्ताविष्लंग्र इति पाठे रूपमात्रानुकरणं दृष्टव्यं तस्य ह्यवपूर्वस्येति निय
त विषयाण्यपि क्रियाविशेषणानि भवंति यथा शब्दादयः कोपचक्षिप्योन्यविषयान
भवंतीत्यर्थः। समः। प्रतिज्ञानमभ्युपगम इत्यादिके विवादुः पूर्वोपदेशानिरपेक्ष
मात्मनेव प्रतिपन्नस्यान्यस्य परिग्रहोऽभ्युपगमः परेण प्रार्थितस्यार्थस्य निय
मवचनमेतद्दास्यामि अस्मिन् काले दास्यामीत्येवं रूपः प्रतिश्रवः परेण युक्तया सा वः
धितस्यार्थस्य संमाननं समीचीनमुक्तमत्र भवतीत्येवं रूपमंगीकरणमिति प्रति
ज्ञानसामान्यावांतरभेदा एवैते न पर्याया इति वृत्तिकारस्तु परस्परविषयेंगीका
रणादिव्यवहारदर्शनात्पर्यायत्वमेव मन्यते॥ ॥उदचरः। उत्क्रम्येति उल्लंघ्येत्य
र्थः। उच्चरतीति उपरिष्टाद्गच्छतीत्यर्थः॥ ॥समः। विभक्तिर्गर्ह्यत इति तत्रैव तृतीया

शब्दस्य मुख्यवाचकत्वात् यद्येवं वैयाधातोः संबंधो न संभवतीति नहि तृतीया धा
तु वाच्या नापि धातुस्तृतीयां तदुक्ति आह तये ता दि तृतीयार्थेन धात्वर्थस्य योगादौ
पचारिको धातोस्तृतीयायोग इत्यर्थः यद्यप्येवं तिनहि चेष्टारूपं संचरणमंतरे कनण३
वेदन ण संभवति अतो ऽकृतेपि करणे तपसा कृते न वेति गम्यमानार्थत्वात् तदर्थत्वात्
तदर्थयोगसंभवः तृतीयाविति एतदर्थमेव वदि पूर्वमुक्तं विसक्तिर्गृह्यत इति तृती
या युक्तादिति चानर्थकं स्यात् यदि तदर्थयोगः स्यात् सर्वत्रैव तत्स्य भावादित्यर्थः ॥
न दाणः ॥ वक्तव्यमेवैदिति सूत्रे चे च शब्दस्य शब्दस्यार्थे अनेकार्थत्वान्निपातानां दा
35 णस्तृतीयायुक्तादात्मनेपदं भवति सा च तृतीया चतुर्थ्यर्थे वेदितव्येति व्याचक्ष १५५
ते एवमप्यशिष्टव्यवहार इति वक्तव्यमेवेतत् अशिष्टानां संकीर्णाचाराणां यो
व्यवहार आचारः तस्मिन्नित्यर्थः दास्या संप्रयच्छत इति यो दास्या सह भुंजानः
तया दत्तं स्वयं भुंक्ते स्वयं च तस्यै च ददातीति तद्विषयोयं प्रयोगः साधुः कथमात्म
नेपदमिति न कथंचित्तस्मादित्यत्र तरस्येत्यत्र निर्दिष्टग्रहणस्यानंतरार्थत्वादिति
भावः विशेषं षष्ठीति एवं पूर्वसूत्रेप्यस्वेन समुदाचरत इत्यादावपि भवितव्यं ॥
॥उपा॥ ह्रस्वस्य सतो रूपांतरेण पत्करणं तत्कथं करणमिति न गृह्यते किं तर्हि

अस्वं यदा स्वं करोति तदा भवितव्यं च्विप्रत्ययस्तु विकल्पितत्वान्न भवति पाणिग्र
हणविशिष्टमिति पाणिग्रहणं नाम कश्चित्कन्यासंस्कारः तद्विशिष्टमित्यर्थः सा
धुत्वस्य स्यसतः स्वत्वापादनमेव स्वकरणमित्युक्तं यद्विकात्र्यपि तदनुगुणः प्र
योगः उपायंस्त महास्त्राणि नोपायंस्त दशाननं। नोपायंस्त दशाननः देवदत्तो
यज्ञदत्तस्य सायं उपयच्छतीति यज्ञदत्तसंबंधिनीं सायं दास्यादिरूपेण स्वीकरो
तीत्यर्थः पाणिग्रहणाभावाद्वृत्तिकारमतेन पुनरुक्तं प्रत्युदाहरणं सा प्रकारमेतत्तु
अत्रापि भवितव्यं॥ ॥ज्ञाश्रुस्मृदृशां सनः। अदृशोपीति श्रुवः स्मृत्र निर्देशादेवाद्दृ
शाउपसंख्यानात्॥ ॥नानोर्ज्ञः। पूर्वेणेति। अनंतरसूत्रेणेत्यर्थः प्राप्तं तस्य प्रतिषिध्य
ते। कुत एतत् अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। तथा चेति। अनंतरप्र
तिषेध इत्युक्तो। एवं सति सकर्मकस्यैवायं प्रतिषेधः संपद्यते अनंतरयोगस्य स
कर्मकविषयत्वात् नाकर्मकात् सर्वत्र आत्मनेपदं भवत्येव ओषधस्यानुजि
ज्ञासत इति ओषधेन प्रवर्तितुमिच्छतीत्यर्थः। ॥प्रत्याङ्भ्यां श्रुवः। उपसर्गग्रहणं चे
दमिति परस्परसाहचर्यादिति देवदत्तं प्रतीति लक्षणेत्थंभूतेत्यादिना प्रतेः क
र्मप्रवचनीयसंज्ञा नोपसर्गसंज्ञः। ॥शदेः शितः। पद्यते शदेः परो यः शित् त

ह अकर्मकात् कर्मकाले हि आगे वधिए नतात्म श्रि

इत्येवं

त आत्मनेपदं स्तवर्तिव्यधिकरणे पंचम्या वाश्रित्य व्याख्यायेत ततो विकरणे सत्यनेन
विधिना स वितवत्सार्वधातुके चपरतो विकरणा विधीयंते तत स्थ एवमेवास्माद्धिधेः
सार्वधातुकं स्तवच्छेषत्वात्परस्मैपदं स्यात् तस्मिं स्थसतितन्निमित्ते चत्रोति विकरणे
कृते परस्मैपदस्य निवृत्तिर्नसिध्येत् । नहि निवृत्तस्य निवृत्तिर्वचनशतेनापि शक्य
ते कर्तुमिति व्यधिकरणपक्षे दोषं दृष्ट्वा समानाधिकरणे पंचम्या विति दर्शयन्ना
दि ह शादिर्यः श्नि ड्नावीति कथं पुनः शादिः श्निड्भवति विकरणस्य हि शाकार इड्भवति
तत्राह श्निड्नावीति श्नि ड्नावी यस्मात्सतयोक्त इति श्निड्नावित्वादुपचारेण शादिरे
96 वश्निदित्युक्त इत्यर्थः श्नितो वायः संबध्नीति श्नित इत्यस्य षष्ठ्यं ततां दर्शयति व
स्थशादिः श्निस्संबध्नीयः तस्य प्रकृतिः प्रागोपि चश्निदुत्पत्तेः योग्यत्वात्स्वकृतिव न
मस्यैव श्नीयत इति पाघ्रादिसूत्रेण शीयादेशः ॥ ॥ निपते लुङ् लिङोस्थ्या लुङ्
१५७
लिङोरिति स्थान षष्ठीयं विषय सप्तमी वा ॥ नियमार्थमिति यदि नियमः त्रियते
॰प्रादे ङि त्करणे किमर्थं यावता विधिरेवास्तु । इह मा हि म्नतेति लुङि तास्य नुदात्तेदि
ति ङि लुक्षणः सार्वधातुकनिघातो यथा स्यात् तिङ्ल होतो वृद्धिचेति प्रतिषि
द्धः ॥ ॥ पूर्ववत्सनः ॥ पूर्ववदिति तेन तुल्यं इत्यादिना तृतीयांताद्वतिः न पंचम्यंता

तिङ्भिन्नो २

२८

वैश्यादधीतेत्यस्य ब्राह्मणादिव

ल्लक्षणाभावात् यथा ब्राह्मणेन तुल्यं वैश्यादधीत इति पंचम्यर्थो गम्यते तथेहा
पि पूर्वस्मादिव सनंतादप्यात्मनेपदमित्यर्थो लभ्यते तुल्यार्थैरिति तृतीयासर्व
विभक्त्यर्थानन्तर्भावयति सनः पूर्वो यो धातुरिति। एतेन सन इति पूर्वस्यावधि
निर्देशो न त्वात्मनेपदापेक्षया परपंचमीति दर्शयति यद्येवं सनंतादात्मनेपद
मिति न लभ्येत। सन इत्यस्य सकृदुक्तस्यावधिनिर्देशेनोपक्षीणत्वात् अत आ
ह तद्वत् सनंतादपीति अवधित्वेनापि तावत्सनः श्रुतत्वाद्व्याख्यास्यात् तदंतादेव
विधिर्विज्ञायत इति भावः अथैवं कस्मान्न विज्ञायते सनंतादात्मनेपदं पूर्वव
दिति श्रौतोन्वयः तत्र कुतः पूर्ववदिति अपेक्षायां सन्निहितत्वात्सन एव पूर्ववदि
ति विज्ञास्यत इति एवं मन्यते एवं विज्ञायमाने अयमेव योगः पूर्वस्यावधिः सं
भाव्येत यथा पूर्वत्रासिद्धमित्यत्र तत एव योगात्पूर्वत्रेति ततश्चायमर्थः स्या
त् अनुदात्तङित इत्यारभ्य पूर्वं ये धातवो निर्दिष्टाः सनंतेभ्यस्तेभ्यस्तद्वदेवात्म
नेपदं भवतीति। ततश्चोत्तरो विधिः सनंतान्न स्यात् भुजोनवने बुभुक्षत इति त
स्मात्पूर्ववदित्येव श्रौतोन्वय एवेष्टव्य इति। यद्यपि कार्यातिदेशः शास्त्रातिदे
शो वा विज्ञायेत तदा सन्प्रकृतौ प्रयोगांतरे दृष्टमित्येव निमित्तनिरपेक्षं का

सनः २

इतः ४

यँच्छास्त्रं वाप्यतिदिश्यमानं दृष्ट्वाप्यतिदिश्येत शिशासति मुमूर्षतीति शीयतेर्मी
यतेइत्यत्र दृष्टत्वादिति इममेतयोः पक्षयोर्दोषं दृष्ट्वा निमित्तातिदेशमाश्रि
त्याह येननिमित्तेनेति निमित्तस्यतुल्यत्वात्तद्धारकं पदात्मनेपदविधितुल्य
वं तदाश्रीयत इत्यर्थः पूर्ववदिति सनुत्पत्तेः प्राक् प्रयोगांतर इत्यर्थः पूर्वस्मा
दितियुक्तः पाठः तथा सनंतादपि संगच्छते यद्यपि प्रकृतिगतं ङित्वादिकं
सनंते धातौ वचनशतेनापि प्रापयितुं न शक्यं शिशापिषड़िति तथापि प्रकृ
तिगतमेवेतत्सनाव्यवधानेपि सनंतादात्मनेपदस्य निमित्तं भवतीत्यति
देशार्थः तावता च निमित्तातिदेशवाचो युक्तिः आशिशिषत इति इटि सनि
कृते जादेर्द्वितीयस्येति शिशब्दस्य द्विर्वचनं निविविदात इति हलंताच्चेति स
नः कित्वं वृत्त्यादिना षत्वं षढोः कः सि आचिकंसत इति आत्मनेपदनिमित्त आङः
त्वाच्च क्रमोरिति नेट् भवति निमित्तातिदेशस्य फलमाह हेति कारणमाहन १५२
लोति शिदाघपीति शिशोषाविवादिकमपीत्यर्थः आदिशब्देन लुङ्लिङोर्ग्रह
णं तच्चेह नास्तीति कृतेहि सनि तदंतादेव शिशोषावीनशादिम्रियतिभ्यां शिशा
विषतइत्यादौ तु कृतेपि सनि तदानीमपि ङित्वादिकं प्रकृतिगतं विद्यत एवेति

भावः। यदि तर्हि निमित्तानिर्देशः अनुचिकीर्षतीत्यत्रापि प्रसंगः गंधनादेरर्थ
स्य त्रित्वस्य चात्मनेपदनिमित्तस्य सत्यपि परस्मैपदेनुवृत्तत्वात्कार्यातिदेशे तु न
दोषः। अनुपराभ्यां कृञ इति परस्मैपदेनात्मनेपदस्य बाधितत्वात् अत आह यं
स्य वेति नियोऽप्यतामात्रस्य निमित्तत्वं किं तर्हि ङुर्वद्रूपस्येति स्नुक्रमोरित्यत्रैव व्य
त इति भावः। यदि ङुर्वद्रूपं निमित्तं जुगुप्सत इत्यादौ कथं न यत्र प्रकृतिगतमनुदात्ते
त्वं तत्रात्मनेपदं कदाचिदपि करोतीति नियमः न तत्वादनुपादीनामत आह इहेत्यादि
नैवात्रानेनात्मनेपदं किं तर्हि अनुदात्तङित इत्यनेनेत्यर्थः। कथं पुनर्जुगुप्सा
देः समुदायस्यानुदात्तेत्वमत आह तावयव इत्यादि अवयवे चरितार्थं लिंगं सा
मर्थ्यात्समुदायस्य विशेषकं भवतीति यद्येवं गोपयतितेजयतीत्यादावपि प्रस
गः अथ यं समुदायं योवयवो न व्यभिचरति तत्रैवोक्तं लिंगं तस्य विशेषकं
भवति णिजंतं च व्यभिचरति गुप विनापि तेन जुगुप्सत इति गुपेः प्रयोगादिष्यु
च्यते यद्येवं सनंतादपि न स्यात् विनापि तेन गोपायतीत्यत्र गुपेः प्रयोगात् व
क्तव्यो वा विशेषः अयमुच्यते गुप गोपन इत्यस्य सन्निधौ गुरुणां तस्मात् नि
त्यं सन्नेव भवति नापरः प्रत्ययः गोपायति गोपयतीत्यादि कस्य प्रयोगो गु

प्र ग्रहणं इत्यस्यासचान्यएवं अवत्रयं चैतदेवं विज्ञेयमन्यएव अच्चत्रयं चैतदेवं
सन्प्रकृतिः । तस्माज्ज्ञसनेवतत्स्यवतीति अन्यथानिदाया अन्यत्र यथा णिङन्तवृत्ति
तथा लउादिरपि स्यात् एवं तिजि प्रभृतयोपि अस्मामा घर्षेयि त्रस्तन्निष्पते त
त्रानुदात्तो तोनित्यसनेतास्य ग्रहणमादिष्पोन्यत्रतु पचणि निष्पते तत्रानन्तुबं
धा एवचुरादौ पठितव्याः । ॥ आम्प्रत्ययवत् ॥ ननु आम तस्या धातुत्वाद दृष्ट
मात्मनेपदं तत्कथं कृञोति दिश्यते स्यादियमनुपपत्तिर्यदि प्रत्ययग्रहणं नक्रि
येत कृतेपिवा तस्मिन् कर्मधारयस्तद्गुणसंविज्ञानोवा बहुव्रीहिराश्रीयेत
इह तु अतद्गुणसंविज्ञानो बहुव्रीहिः धातुरन्यपदार्थः तदाह आम्प्रत्ययो य
स्मादिति तद्गुणसंविज्ञाने त्ववयवेन विग्रहः समुदायः समासार्थ इत्याम्प्र
त्ययो यस्येति विग्रहः स्यात् । प्रतियोगि निषष्ठीनिर्देशात् तत्र तस्येवेति षष्ठी १५८
ता इति रित्याह आम्प्रत्ययस्येवेति कृञोनुप्रयोगस्येति समानाधिकरणे षष्ठी ।
अनुप्रयोगशब्दः कर्मसाधनः ईहांचक्रे इति ईह दर्शने ईह चेष्टायां लिट्
इजादेश्चेत्याम् आमेति लेलुक् अकर्तीति प्रायार्थो यमारंभइति ब्रुवता विध्य
र्थमेतदित्युक्तं तच्च दोषमुद्भावयितुमाह यदीति किं पुनः कारणं विध्यर्थत्वमं

गीकृतस्तदनुगुणोदोषउद्भाव्यतेनपुनर्नियमार्थमंगीकृत्यतदनुगुणदोषउद्भावो
त्तस्तेंअकर्त्रंतिप्रायेविध्यर्थत्वमपिसंभवतिकृञोवानित्वमाश्रित्यकर्त्रन्तिप्राये
५ वाचयांचकारइत्यादिवहुकृञांचकारेत्याद्धदावपिप्राप्तेआम्प्रत्ययवद्कृञोनुप्रयो
गस्यात्मनेपदमितिनियमार्थत्वमपितत्रविधिनियमसंभवेविधिरेवज्यायस्त्वादे
वमुच्यतेउक्तआर्जवेउभउसमूरणोउभयमित्यादिपरिहारःकथमितिनेकेनैव
पत्नेनोभयंलभ्यतइतिभावः इंदांवभूवेतिभवेतरः भुवोवुग्लुङ्लिटोः कथंपु
नरितिकृञ्चेत्यत्रस्वरूपग्रहणमन्यमानस्यप्रश्नः प्रत्याहारग्रहणमितिपदित
त्रस्वरूपग्रहणंस्यादिहकृञ्ग्रहणमनर्थकंस्यात् अन्यस्यानुप्रयोगस्याभा
वादितिभावः अतएवविपर्ययोपिनभवतितत्रस्वरूपग्रहणमिहप्रत्याहारग्र
हणमितिइहप्रत्याहारग्रहणस्यचस्योरप्यात्मनेपदविधिःप्रयोजनंयदिवा
नुप्रयोगविधिनाकृञएवानुप्रयोगउक्तःस्यात् तदात्वस्योरनुप्रयोगाभावादा
त्मनेपदविधावनुप्रयोगवचनंनस्यात् तस्मादिहस्वरूपस्यग्रहणमनुप्रयोग
विधौचप्रत्याहारस्येतिसिद्धं अस्तिविधौसंपदादेतिसंपदोपितत्रांतद्भावा
दनुप्रयोगःप्राप्तःसनाद्यंताधातवइत्यतोधात्वधिकाराद्धात्वपसर्गस्समुदा

पस्य न भवति यो ऽत्र धातुस्तस्यापि न भवति अर्थविप्रतिषेधादिति तत्रैव वक्ष्यामः ।
॥ ॥ प्रोपाभ्यां ॥ युजिर् योग इति युज समाधावित्यस्य तु देवादिकस्यानुदात्तेत्वा
देव सिद्धं युञ्जे रिति च विवक्षित इकारेण त्वागन्तुकः । युक्तपात्र विषयता चास्यैव
सम्भवतीति भावः । प्रपुञ्ज इति रुधादिभ्यः श्नम् । श्नसोरल्लोपः कुत्वचर्त्वे अनुस्वा
र पर सवर्णौ स्वराद्यन्तोपसृष्टादिति स्वरो च आदिरन्त्यो वा यस्य स स्वराद्यन्तः
तेनैवोपसर्गेण संबद्धः स्वराद्यन्तोपसृष्टस्तस्मान्निसृदुसृ इत्येता ञ्च र्जयित्वास
र्वोपसर्गाः संगृहीताः ॥ समः क्ष्णुवः ॥ ॥ उत्तरार्परे विसर्जनीय इत्यस्यावकाशः
29 उपस्कः यत्र कुघोर संभवः पुरुषः कुघोः कृष्णो वेदस्य तु यत्र शार्परौ कुघू न भवतः
पुरुषकरोतीति शार्परयोः कुघोः त्यच सङ्ग पूर्वं चास्मिंदु नास्ति विप्रतिषेधो
भावादुत्तरस्येति शार्परे विसर्जनीय इति नित्ये विसर्जनीय एव भवति तेन सं
मः क्ष्णुव इति स्कृ श्चे विसर्जनीयस्यैव पाठः । समो गम्यृच्छीत्यत्रैव संवृत्तिरेवं
हि पुनः समो गृहणं न कर्तव्यं भवतीति भावः । संक्ष्णुवत इति अदादित्वाच्छपो
लुक् आत्मने पद षनन्त इत्तिश्चस्यादादेशः अचि श्नुधात्वित्यादिना वङादेशः ।
॥ ॥ रुजो ऽनवने ॥ अवन प्रतिषेधेन त्यादि संसर्गवदि प्रयोगोपि विशेष स्फूर्ति

हेतुः यथा दोग्ध्रीपर्यायो धेनुशब्दः संसर्गित्वविशेषे व्यवस्थाप्यते सवत्सा धेनुरा
नीयतां सकिशोरा सबर्कर इति एवमवश्याऽकिशोराऽबर्कर इति यस्यापायेन संसर्गः
सैव तद्रहिता आनीयते तद्द्विदिह्यापीत्यर्थः। ॥ णेरणौ यत्कर्म ॥ अत्र यद्यपि णेरिति सामा
न्यनिर्देशः तथापि पुच्छभांडचीवराण्णिङ् इति णिङ् गृह्यते अणौ कर्मणौ संभवात् कर्मणि णक
ङः स्यात् आयादय आर्द्धधातुके वेति वचनात् अण्यन्तावस्था संभवति कर्मणश्च कर्तृत्वं कामि
ष्यते योषितं देवदत्तः कामयिष्यते योषित्स्वयमेवेति। तथापि ङित्वादेव सिद्धः सोपि न
गृह्यत इति णिच एव प्रत्यग्रहणमित्याहुः णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्धमेवा
त्मनेपदमिति अकर्त्रभिप्रायार्थमिति चोपलक्षणमेतत् कर्त्रभिप्रायेपि पदान्तरद्यो
तिते विभाषोपपदेन प्रतीयमाने इति विकल्पं बाधित्वा नित्यो विधिर्यथा स्यादित्यपि
द्रष्टव्यं अत्रैकवाक्यतायामयमर्थो भवति ण्यन्तादात्मनेपदं भवति अण्यन्तावस्था
यां यत्कर्म ण्यन्तावस्थायां यदि स कर्ता भवति आध्यानादन्यत्रेति कर्मान्तरनिवृत्ति नव
र्नकृता स्यात् ततश्चेहापि प्रसज्येत आरोहयति हस्तिनं हस्तिपकाः तानारोहयति हस्ती
ति किं च उक्तार्थे णेरणौ कर्मणीत्येतावदेव वाच्यं कर्तरीत्येव ण्यन्तादात्मनेपदं भवति
अणौ कर्मणि कर्तरीत्युक्ते को नाम विवक्षितोऽर्थो न सिध्यति। स इत्येतच्चानर्थकं यत्त

दोर्नित्यसंबंधादेवाध्याहारतः सिद्धेः तस्माद्यथाश्रुतमात्रं न विवक्षितमिति म
वा पृच्छति कथमिति । तदेतदपि वाक्यभेदाश्रयणेन परिहरति । अणौ यत्कर्म णौ चेत्
देवेत्यादिना आत्मनेपदं भवत्यनाध्याने इत्येकं वाक्यं ततो णौ यत्कर्मेति द्वितीयं वा
क्यं । अत्र वाक्ये यत्तदोर्नित्यसंबंधाद्यच्छब्देन तच्छब्द आक्षिप्यते धर्मांतरस्यानिर्देशा
दुद्देश्यतया श्रुतं कर्मत्वमेव विधीयते तच्च विधीयमानं सामर्थ्यात् णेरिति सन्निहि
तत्वाच्च ण्यंतावस्थायामेव विधीयते किं तत्सामर्थ्यं अणौ यत्कर्मेत्यनुवादसामर्थ्याद्वा
णौ कर्मत्वासिद्धेः तत्रैव तद्विधानस्यासंभवः तदेवमणौ यत्कर्मेत्येतावत एव णौ चेत्कर्म
त्वं पूर्णं भवति अनेन च कर्मांतरनिवृत्तिः क्रियते न च णौ कर्मणो णौ कर्मभावः प्रतिपा
द्यते स कर्तेति वाक्यांतरेण तस्य कर्तृत्वप्रतिपादनादेकस्य युगपदेवैकस्यां क्रियायां १९
कर्मकर्तृत्वयोरसंभवात् ततो णौ चेदिति तृतीयं वाक्यं अणौ यदित्येव अणौ यत्प्र
तिपाद्यं वस्तु णौ चेत्तदेव प्रतिपाद्यमित्यर्थः । ततः स कर्तेति चतुर्थं वाक्यं अत्राणौ
यत्कर्म णौ चेदिति सर्वमनुवर्तते । अनाध्यान इत्येतदपि प्रसज्यप्रतिषेधे पंचमं
वाक्यं तत्र वृत्तिकारेण त्रीणि वाक्यानि स्ववाचा दर्शितानि ण्यंतादात्मनेपदं भव
तीत्येकं वाक्यं अणौ यत्कर्म णौ चेत्तदेव कर्मेति द्वितीयं स एव कर्ता भवतीति तृतीयं

णौ चेड्हस्तां समानक्रियार्थमिति तु वक्ष्यति अतस्तद●पि वाक्यमप्यपगतमेव ।
आरोहन्तीत्यादि अणौ कर्मत्वप्रतिपादनार्थमिदमुक्तं इदं चोदाहरणं आरोहय
ते हस्ती स्वयमेवेति आङ्पूर्वो हि रुहिर्न्यग्भवनोपसर्जने न्यग्भावने वर्त्तते न्यग्भव
वन्तं हस्तिनं न्यग्भावयतीत्यर्थः यदा तु हस्तिनः सौकर्यातिशयप्रतिपादनाय
हस्तिपकव्यापारो न विवक्ष्यते तदा न्यग्भावनमात्रे रुहिर्वर्त्तते तत्र च हस्तिनः
कर्तृत्वे उक्ते च निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितं । निवर्त्तमाने कर्मत्वे स्वक
र्तृत्वेऽवतिष्ठत इति अस्य च कर्तुः कर्मस्थक्रियेषु कर्मकार्याण्यतिदिश्यन्ते कर्म
वत्कर्मणा तुल्यक्रिय इति तथोल्लूयते केदारः स्वयमेवेति लुनातिर्द्विधाभ
वनोपसर्जने द्विधाभावने वर्त्तते कर्तृव्यापाराविवक्षायां द्विधाभवनमात्रे वर्त्त
ते रुहिस्तु कर्तृस्थक्रियात्वात्कर्म●●कार्याणि न लभ्य●त इत्येतावत् ततो न्यग्भवन
वृत्ते रुहे हस्तिपकव्यापारेण जुत्सघते तदा च य एवार्थ आरोहन्ति हस्तिनं हस्ति
पका इति स एवारोपयति हस्तिनं हस्तिपका इति पुनः सौकर्यातिशयविवक्षा सो
यां अविवक्षिते हस्तिपकव्यापारे न्यग्भवनमात्रे सोऽपि वर्त्तते आरोहयते हस्ती
स्वयमेव सुष्ठु न्यग्भवतीत्यर्थः उक्तं च न्यग्भावनं न्यग्भवनं रुहौ शुद्धे प्रती

●न्ते नाते कर्तृभेदं वदन्तः

पतेन्यग्भावनं न्यग्भवनं एपं ते पि प्रतिपद्यते। अवस्थां पंचमीमाहु र्यं ते तां कर्म
कर्त्तरि। निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजुच्यते इति। एवं सिंचते रप्याद्रीत्त
वनोपसर्जनं आर्द्रीभावनमर्थः सोपि निवृत्तप्रेषण इत्यादि पूर्ववत् सेचयते
हस्ती स्वयमेव सेचनं यत मनुकूलो भवतीत्यर्थः एवं दृशेरपि कर्मव्यापारमा
त्र वृत्तेः णिजुत्पन्ने तद्व्यापार उदाहरणं दर्शयते राजा स्वयमेव सेचनदर्शने
नुकूलो भवतीत्यर्थः। सोयं निवृत्तप्रेषणपक्ष उच्यते अपरः प्रकारः आरोह ग्रप
ति हस्तिनं हस्तिपकास्तान् सोकर्यातिशयाद्धस्ती प्रयुङ्क्ते इति हस्तिव्यापारे णि
जुत्पद्यते आरोहयति हस्ती हस्तिपकानिति ततः सौकर्यातिशयप्रतिपादने तात्पर्यमि
ति कर्म न विवक्ष्यते तेनाकर्मको भवति यथा नेह पच्यते नेह भुज्यते इति पाकमात्रप्र १६२
तिषेधे तात्पर्यमिति कर्माविवक्षायां भावे लो भवति आरोह्यते हस्ती स्वयमेव सु
खुन्यग्भवतीत्यर्थः एष एव हि हस्तिनः प्रयोजकव्यापारः एवमितयोरपि इष्टव्यं।
सोयमध्यारोपितप्रेषणपक्ष इति गीयते तदेवमुक्तयोरपि पक्षयोः सैव क्रिया
याअणंतावस्थायां न च कर्मांतरमस्ति कर्त्तापि स एवेत्युदाहरणोपपत्तिः हस्ती
स्वयमेवेति वचनं कर्त्रन्तरव्युदासार्थं णेरिति किमिति अणौ कर्मवानुवादेन

त्वा

णोकर्तृत्वविधानाद्या धान्याम्यंतादेव भविष्यतीतिप्रश्नः। सा धारोहतीति साधु
न्यग्भवतीत्यर्थः अत्र कर्मव्यापारमात्रे रूढिर्वर्त्तते कर्तृस्थक्रिया ॥ नु कर्मवद्भावा भावा
द्यगात्मनेपदं न भवतः शाप्परस्मैपदं च भवतः। अणौयत्कर्मेति अण्यंतावस्थाया
अपि श्रुतत्वात्ततोपि स्यादिति भावः नन्वत्राधान्यामण्यंतादेव भविष्यतीत्युक्तं किंच अणौ
यत्कर्म णौचेत्सकर्त्तृत्वयमुपाधिः यत्र एकस्मिन्नेव प्रयोगे संभवति तत्रैवात्मनेपदं
युक्तं सा धारोहतीत्यत्र च नायं प्रकारः संभवति आरोहयते हस्ती त्यत्र णिचः प्रकृ
तिभूतेनरुहावण्यंते यत्कर्म स एवण्यंते कर्त्तेति तत्रैव भविष्यति सत्यं उत्तरार्थमवश्यं
णेरितिवक्तव्यं इहापि विस्पष्टार्थं भविष्यतीति मन्यते अणाविति किमिति कर्म क
र्तृवस्थ योर्योगपद्यासंभवात्सौ च कर्तृत्वस्य श्रुतत्वाज्ञ्ञावादुपधावृद्ध्या भावः ग
५५ णमानो गणोयदा गणन क्रिया यामानुकूल्यं प्रतिपद्यते तदा तद्व्यापारमात्रवृत्ते
र्हेतुमण्णिचि पुनः कर्मव्यापारमात्रे आरोपितस्यार्थे प्रयोगः गणयति गणः स्व वा
यमेवेति अत्र णेव गणः कर्मणैवेव कर्तृत्यात्मनेपदं न भवति कर्मवद्भावे नापि न भ
वति कर्तृस्थक्रियत्वात् गणनं द्विसंख्या निमित्तः परिच्छेदो ज्ञान विशेषः। साध्येदुसा
गचावस्थापने गणिर्वर्त्तते भागशो वर्तिष्ठमानं गणो गोपाल्को वस्थापयतीत्यर्थः

दवस्थांतरेऽप्यावेद कर्मत्वं विज्ञास्यतइमेयन्नः गणयति गणः सर्व्यानेच्छु रा दावेः कैः पर्येयेच्छ गणो नोस्थानि ५

न

मंगीकृत्य तच्चानुकूलत्वाद्गुणस्यैव कर्तृत्वविवक्षायामस्ति कर्मस्थभावकत्वमिति
कर्मवद्भावादात्मनेपदमुदाहृतं ननु चाणावकर्मकादिति चेत् हेतुमति चेति वि
तिन्ध धिरिति प्रतिषेधोपि प्रत्यासत्तेस्तस्यैव न्याय्य इति तच्चेत्सत्यमिदं प्रत्युदाहरण
मयुक्तमेवउच्यते युक्तं तत्र हेतुमति चेति विधिरिति तत्र हि बुधादिसूत्रे चात्
णौ रिति वर्त्तते बुधादिस्य च हेतुमणिजेव संभवति हेतुसामान्येन यत्
णां विशेषहेत्वभावात् ननु चाणौ यत्कर्म तत्र च्यते चुरादीनां नित्यणं तत्वा
लोकव्यानां प्रयोगाभावादाणौ कर्मणः संभवाद् चापि हेतुमणिच एव विधिः।
नेत्याह आद्यपादे इति विशेषितणिचामपि केषांचित् संभवात् तत्र हेतु
मति चेति विधिरिति स्थितं लावयति दात्रं स्वयमेवेति करणस्यापि दात्रस्यापि १ ५३
लापाति न्यायेन लवने यदानुकूल्यं तत्प्रतिपादनाय लावकान्प्रति प्रयो
ज्यकत्वविवक्षायां हेतुमण्णिच्। हेतुणपि तदात्मनेपदं भवति अणौ यत्कर्म
स कर्तृत्वेनोपगम्यत एतत् यस्मात्प्रयुक्तो विधिः तच्चेवाणपि ते यत् कर्म स चे
त्कर्तृत्वं तताणौ चेत् [illegible] हरणमनयकं तत्राह णौ चेत्यत्र हरणं समानक्रियार्थ
मिति प्रयोज्यप्रयोजकसावलच्छत्तोपि क्रियान्तरे देमाभरूवृणिच्यकृत्युप

32

त्तायां पथास्यादित्यर्थः यथापुनरयं त्राव्दार्थस्तथोक्तं पुरस्तात् आरोहय
माणो हस्ती सीतान् सेचयति मूत्रेणेति येन प्रयोज्यप्रयोजकभावलक्षणेपि
क्रियासेदे आत्मनेपदं वार्यते वार्यत एवानेन धातुसंबंधादित्यंत संदइतिमवा
एतस्य तु दाहृतं सीता स्याचारोहते: कर्म न सेचयते: आरोहयमाणइ तिणि
पानेरवा च्यस्येत्यात्मनेपदं त्रानतु सीतास्यारोहयमाणा सीयामूत्रे ये तितेन हस्ती सिंच
ते कर्मविवक्षयातु सेचयते एकर्मकत्वं उद्देशप्रतिनिर्देशाल्लभ्यं य स्मयद पु
नः तद्गृहोवा कुपस्ते दन कर्मांतर निवृत्तयेइत्याहं यस्मयूरहणमनन्यकर्मार्थ
मिति स्खल्वमारोहयति मनुष्यानिति अत्र कर्मांतरमप्यस्ति मनुष्याः रूहेर्गत्य
र्थत्वान्मनुष्याणांकर्मसंज्ञाकथं पुनरत्राणौ कर्मणो णौ कर्तृत्वं प्रापवतास्खे
ल्वमणौ कर्म हस्ती तु णौ कर्तास्यादेतत् आरोहयमाणइत्यत्राणौ कर्मणो हि ह
स्तिन एव कर्तृत्वं स एवस्खल्वमारोहतीत्यत्रापि कर्तेति एवमपि प्रत्यासत्तेरेवा
त्रापि न भविष्यतितथाहि णौ ता दात्मनेपदं भवति अणौ यत्कर्मणौ चेत्कर्तृत्व
के प्रत्यासत्तेरेतल्लभ्यते येन णिचा णौ ता दात्मनेपदं विधित्सितं तेनैव णिचा
णौ ते प्रकृतिभूते धातौ यत्कर्म स एव चेत्कर्ता तस्मिन्नेव च णौ ते तदिति अत्र च

यत्रायमुपाधिः द्वतमेव तत्रात्मनेपदं आरोहयमाणइति यत्र तु न द्वतं स्कन्ध
मारोहयतीति न तत्रायमुपाधिरिति नैवात्रात्मनेपदप्रसंगः इहृतदि आ
यं रोहंति हस्तिनं हस्तिपकाः तानारोहयति हस्तीति किं पुनरत्र नेष्यते वृत्तिकृ
ता नेष्यते भागवृत्तिकारेण त्विष्यते तथा च माघः प्रयुङ्क्ते रणुमारोहयते नि
षादिनं गिरिति कर्त्रेति किमिति भावकर्मणोः सिद्धत्वात् तेयेव भविष्यतीति मन्य
ते अणौ यत्कर्म तस्मिन्नेव कर्तरि यथा स्यात् अन्यत्र मा भूदित्येवमर्थं कर्तृग्र
हणमिति दर्शयन्नाह तानारोहयति महामात्र इति गत्यर्थादिदृ हस्तिपका ला
नां कर्मसंज्ञायां ध्रुवं कर्मातरसद्भावादेवात्र न भविष्यतीति नैतदस्ति अस्ति ह्य
त्राणौ कर्मणो हस्तिनो णावपि कर्मत्वेनाच्यपः न चास्तीति कर्तृत्वविधौ कर्मातर
व्यावृत्तिर्लभ्यते यद्वा प्रयोजकव्यापारे तात्पर्याद्यदा हस्तिपकाः कर्मत्वेना विव १६७
क्षितास्तदेदं प्रत्युदाहरणं इष्टव्यं । वनगुल्मस्येति कर्मोपलक्षणमेतत् न त्व
त्र वनगुल्मस्य कर्मत्वमस्ति शेषत्वेन विवक्षितत्वात् तस्माद्वनगुल्ममिति द्र
दर्शनीयं स्मरयत्येनमिति स्मर आध्याने घटादिः वनगुल्मस्य रमणीयत्व
प्रतिपादनाय प्रयोजकत्वे विवक्षिते णिच् एनमिति बुध्यर्थत्वात् कोकिलस्य

कर्मसंज्ञा एतदप्युपलक्षणं अत्र हि कर्मान्तरसद्भावादेव प्राप्तिर्नास्तीति तस्मा
त्कर्माविवक्षायां प्रत्युदाहरणं द्रष्टव्यं ननु चात्र कर्मकर्त्तरि मूल्योदाहरणानी
ति ननु चाध्यारोपितप्रेषणपक्षे आरोहयतो हस्तिनः कर्मत्वाभावात्कर्मणा
समानधातौ तुल्यक्रियत्वाभावात्पचत्योदनं देवदत्तो राध्यत्योदनः स्वयमे
व वेति कर्मवद्भावो न प्राप्नोति सत्यं आरब्ध एतस्मिन्सूत्रे सोपि पक्षः संभवा
त्प्रदर्शितः अनारब्धे तु निवृत्तप्रेषणप्रक्रियौ अपिष्यते ननु तत्रापि व्यापार वा
द्वयास्ति धात्विषु रस्तादिषु स्तवत्वेवं एतु केवलकर्तृव्यापारवाचिनो दृशपादयस्ते
कथं न दृशिदृशिः कर्मव्यापारं कंचिदाचष्टे स्यादेतत् विषयभावापत्तिः कर्मव्या
पारः तदापादनं कर्तृव्यापार इति पश्येवं उच्चापि दृश्य इत्यर्थः स्यात्तत्रापि
विषयभावापत्तिस्तदापादनं च विद्यते अथ दर्शनं विषयभावापादनं दृश्यर्थः।
ननु तदेव निरूप्यते किं नाम दर्शनमिति अत्रोच्यते मानामाख्य कर्मव्यापारमा
स्ति तावत्कर्मणोपि व्यापारः कारकत्वात्तत्र निजुत्पत्तिविवक्षायां तावत्येव व
र्तिष्यते उदाहरणविवक्षायां एपं तोपीति मन्यते तेन यावद्वृत्तिः कर्तृस्थक्रिय इति।
युक्तं केवलकर्तृव्यापारवाचिनां कर्मि दृशिप्रभृतीनां कर्तृस्थक्रियत्वेके

यं पुनर्विक्लित्युपसर्जनविक्लेदनावचनः पचिः द्विधाभवनोपसर्जनद्विधाभा
ववचनश्छिनत्तु नातिः कर्मस्थः क्रियः न्यग्भवनोपसर्जनन्यग्भावनवचनस्तु
रुहिः कर्तृस्थक्रियः उच्यते रुहिरपि गत्यर्थः तथा च यद्वितु परं छन्दसीत्यत्र
भाष्यकारो वद्यपतिरुहस्तिनमारोहयतीत्यत्र हि उपरिगमनलक्षण एव हि
२५ रुहेरर्थः तत्पुनरवनमनुहेतुत्वान्न्यग्भावनमित्युच्यते उपरिगमनं तु न्य नीहतं
ग्भावनमात्रे रुहेरर्थो न भवति यदा खलु कश्चिद्भूमावेव तिष्ठन्नुच्चास्यं रां
रवां स्यां हस्ताभ्यां अवनमयति तदा नासावारोहयतीत्युच्यते तस्माद् इति विशेष
एव रुहेरर्थः कस्तर्हि क्रियाणां कर्मकर्तृस्थताया हेतुः उक्तमत्र विशेषद
र्शनं यत्र क्रिया तत्र व्यवस्थिता क्रियाव्यवस्थात्वन्येषां शब्दैरेव प्रकाश्यत इ
ति विशेषदर्शनेन शब्दार्थानुसारेण वा क्रियायाः तात्स्थ्यं कथ्यते एतच्च का नणाद
प्रमां नेह रणास्य कर्तृस्थत्वं तां प्रतिपादयति न तु कर्मस्थतां न हि रुहस्तिनमारोहति वृक्ष १२५
मारोहति पर्वतमारोहतीत्यादौ कर्मणि दृश्यारोहणरूपः भेदः प्रतीयते यथा
प. तमांसतण्डुलादिषु पाकेन च हस्तीन्यग्भवति इति कारकव्यापारः किं तर्हि ह
स्तिपका उपर्यासीरन्निति पाके तु तण्डुलादिगतो विक्लित्त्यादिरूपो विशेषो य

यास्यादित्येवकारस्य व्यापारः तस्मात्कर्मभेदेन रूपभेदादुद्देशस्य च कर्मगत
त्वात्पचिः कर्मस्थक्रियः विपर्ययाद्भिदिः कर्तृस्थक्रिय इति सिद्धं एवं चारुच्यते दस्ती
स्वयमेवेति कर्मवद्भावं प्रदर्शयतो भाष्यन्यायविरोधादुपेक्ष्याः । दृशिः कर्तृस्थ
भावक इति अचास्मिचिः कस्मादुपेक्षितः कर्मस्थक्रियत्वात् आङ्शसवनं श्यत्र
शब्दानंतदर्थत्वाकारकव्यापारस्य किमर्थं तदुदाहृतः विशेषाभावात् न श्यत्रा
नेन कर्मवत्कर्मणेत्यनेन वात्मनेपदे कश्चिद्विशेषः । तेनापि सति यक्चिणौ न
भवतः । ग्रन्थिग्रन्थीति प्रतिषेधात् भाष्ये तु कर्मवद्भावासिद्धिमाशंक्य ध्या
न प्रतिषेधार्थमिस्फक्लास्मरते क कर्तृस्थभावकत्वात्कर्मकर्तृभावस्य प्राप्तिर्ना भव
स्तीत्यन्तिधायोक्तं एवं तर्हि सिद्धे सति यदाध्यानप्रतिषेधं शास्ति तज्ज्ञापयत्या
चार्यः भवत्येवंजातीयकानामात्मनेपदमिति किमेतस्य ज्ञापने प्रयोजनं प
श्यंति भृत्या राजानं दर्शयते भृत्या राजेति आत्मनेपदं सिद्धं भवतीति एवंजा
तीयकानामिति कर्तृस्थक्रियाणामपीत्यर्थः । एतच्च ब्रुवता विध्यर्थमेतदित्युक्तं
भवति विशेषप्रतिषेधे सामान्यविधेरनुमानात् तत्र दर्शयते भृत्यान् राजे
त्युदाहरणमेकमनुपपन्नं कर्मान्तरसद्भावात् तच्च वृत्तिकारस्य सज्जेदं कं कुर्व

स्यार्थ इति न्यायादुदाहरणेष्वेतन्निगमयितव्यं मन्यते। अस्मिन्नुदाहरणे कर्मव्यापा
रमात्रे विवक्षिते सिद्धं भवतीत्यर्थः। अन्ये त्वाहुः अस्मादेवोदाहरणाद् णौ यः क
र्ता कर्मणी तद्व्यतिरिक्ते कर्मान्तरसद्भावे एवात्मनेपदं न भवतीति यथा स्थलमारोह
यति मनुष्यानिति इह त्वणौ कर्तॄणां त्यानां णौ कर्मत्वमिति भवत्येव एवं स्मारय
त्येनं मिति कोकिलस्य कर्मत्वेऽपि प्रत्युदाहरणमुपपन्नं करेणुरारोहयते निषा
दिनमिति प्रयोगश्चोपपन्न इति भाष्ये सूत्रोक्षराण्येव तावदधिकानि भाष्यं च सर्व
मुदाहरणवर्जमनुपपन्नं। प्रयोगाणां च निर्वाहो णिचश्चात्मनेपदे। जयादि
त्यस्य हृदयं गूढमेतत्प्रकाशितं॥ ॥भीस्म्योर्हेतुभये॥ भयमनिष्टापादनशं
कासाधनमात्रे लौकिको हेतुः न चान्तरेण साधनं क्रिया सम्भवतीति विशेषण १६
सामर्थ्यात्कृत्रिमं वाच्यपादि भाषिकस्य हेतोर्ग्रहणमित्याह हेतुः प्रयोजक
इत्यादि ततश्चेड्भयं भवततीति यद्येवं स्मर्यत्ययो न विशेषितः स्यात् न हि स्म
यते भयमर्थः अत आह भयग्रहणमिति चित्तविकारस्योपलक्षणमित्यर्थः
विस्मापितत एवेति अत्र वेड्भवतीत्यनुषङ्गः भीषयत इति स्त्रियो हेतुभये
षुक् भापयत इति बिभेतेर्हेतुभय इति कल्पितमात्रं अन्तर्भीत्यादिषु अत्र

व तैं नापु

षुम्नसवति तद्विधावीकारयश्लेषात् विस्मापयत इति नित्यं स्मयतेरित्यात्वं अ
र्त्तिह्रीत्यादिना पुकू कुं विकुर्यतिकरणादत्र भयं न हेतोः यद्यपि तद्व्यापारे लि
ज्विधानास्य प्रयोजकसाध्यमेवस्य तथापि विशेषणोपादानसामर्थ्यादेवं विज्ञा
पते अनन्यनिरपेक्षाद्धेतोरेव भयङ्गमिति एवं च मोऽध्येन भापयतीति गुणगुणि
नोर्भेदविवक्षायां न भवति उदाहरणे तु तादात्म्यस्य विवक्षितत्वाद्धेतो न वस्तुपं॥
॥गृधि॥ ॥परिहरतीत्यर्थ इति वञ्चयतीति यावत्॥ ॥लिपः॥ विशेषाभावा
दिति निरनुबंधकपरिभाषानुवामदेवाद्यध्यावित्यत्रापि तापितापत्ययग्र
हणाविषयेति मन्यते संमानने शालीनीकरणे च वर्त्तमानादिति सम्मानन
विषयो न धात्वर्थः तदाह पूजामधिगच्छतीत्यर्थः धात्वर्थस्तु पूजयतीति वाच्यं सर्वं ६
स्यात् यथान्यकरोतीत्यर्थ इति अकर्मकश्चायमस्मिन्प्रयोगे पूजाख्यस्य कर्म
आत्मने णः संनिहितेन धातुनैवोपात्तत्वात् पूजीयतीति वदित्याहुः जटाभिरिति हेतौ तृती
पद यापस्यादि जटाः संति स लोके पृच्छ्यते॥ ॥मिथ्यो॥ उपोच्चारितं पदं उपपदं मिथ्या
शब्द उपपदं यस्य स तथोक्तः। मिथ्याकारयत इति आत्मनेपदे नैवास्यासस्य
घोतित्वान्नित्यवीप्सयोरिति द्विर्वचनं न भवति। सदोषमिति एतेन मिथ्याशब्द

२ स्पृ र्प

36

स्यार्थमाचष्टे अस्यैव विवरणं स्वरादिदुष्टमिति आदिशब्देन रूपं गृह्यते अस
त्वदित्यास्याभासं दर्शयति उच्चारयतीत्यर्थ इति एवं तस्य करोतेरुच्चारणे वृत्तिर
नेकार्थत्वाद्धातुनामिवं चेष्टकृतिः भूतः करोति उच्चारणे वर्त्तते अकर्मकश्च ॥
स्वरितः । ॥ कर्त्तारमन्तिप्रेतीति कर्तृत्तिप्रायं कर्मणेपणे क्रियाफलं चेहकर्मणे
चेति नास्ति नियमः तेनाकर्मकस्यापि यजिप्रभृतिभ्यः स्वर्गादिके फले कर्तृगा
मिन्ययं विधिर्भवत्येव कर्त्तारं चेदिति क्रियाफलस्य कर्तृगामित्वद्योतनायात्मा
नेपदं भवतीत्यर्थः । यदि यज्ञपावच्छक्रियानंतरभावीफलं तच्चेत्कर्तृगामिन्ययं
विधिर्भवति । इहापि स्यात् यजंति याजकाः पचंति पाचका इति दक्षिणादेः कर्तृ
गामित्वादित्यत आह प्रधानभूतमिति किं पुनस्तदित्याह यदर्थमिति पदुद्दिश्ये २७
त्यर्थः क्रियारभ्यत इति सामग्रीसमवधानात्मिका आद्यावच्छित्तिरारंभः । पा
मंतरेण याजकादीनां न प्रवृत्तिः स्वर्गादिकं वा फलं प्रेप्सुः सामग्रीसमवधा
य प्रवर्त्तयति नैता यथा पथं प्रवर्त्तते । कथं पुनरेतच्छक्यते प्रधाने फले कर्त्र
त्तिप्रायइति प्रधानत्वादेव किं च । यत्किंचन फलं सर्वत्र कर्त्रत्तिप्रायं भव
ति ननु यच्च क्रियाभ्यासमात्रे तात्पर्यं तत्र न किंचित्फलं कर्तृगामि तत्रापि प

नेप्रवर्त्ति

ळं कर्तृगामि किं कौशलं पुनः पुनरभ्यासेद्धि क्रियासु कौशलं भवति तस्मा
त्प्रधानेन फले कर्त्रभिप्राय इति सिद्धं यजत इति केचिदाहुः देवताये इदं न मम
त्येवं विधो मानसः संकल्पो याग इति तेषां यजंति याजका इत्यत्र ऋत्विग्व्यापारप्रयो
गो नोपपद्यते अन्ये त्वाहुः होमादिषु वादिकरः ऋत्विग्व्यापारो याग इति तेषां यजमान
व्यापारे प्रयोगो नोपपद्यते एवं तर्हि उभयं यजतेरर्थः ऋत्विग्व्यापारश्च यजमानव्या
पारश्चेत्युक्तं यजादिषु च विपर्यासो नानाक्रियाणां यज्यर्थत्वादिति न तदर्थः क्रिया
रंभ इति ननु ऋत्विजामारंभस्तदर्थ एव नेतरद्देवं आद्यापद्धतिरारंभस्तत्फलं त्त ६
सा च यजमानस्य स्वर्गमहत्फलं तेयेति न पुनरिमे दक्षिणां लभेरन्निति यथा अवघा
ते क्रियमाणे खेदश्च भवति वैतुष्यं च भवति दृष्टिश्च लक्ष्यते अथ च वैतुष्यार्थ एवाव
घातः तदुक्तं चापि तदुक्तं हरिणा। यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यंते पचादयः तत्प्र
धानं फलं तेषां न लाभादिप्रयोजनमिति इह स्वामिदासौ पचत इति क्रियामात्रवि
वक्षायां परस्मैपदं भवति स्वामिगते तु पचने धर्मे दास आरोपिते स्वामिदासौ पचे
ते इत्यात्मनेपदं भवति अथात्र प्राग्रहणं किमर्थं विप्रकृतेऽपि फले यथा स्यात्
द्विविधं हि क्रियाफलं दृष्टमन्नपुत्रदृष्टिशत्रुवधादिकं अदृष्टं च स्वर्गादि त

प ले

अपूर्वं प्रत्यासन्नमव्ययं तावदिति प्रधानं इतरत्तु विधुर प्रत्ययोपनिपाते सति व्य
भिचारसंभवाद् प्रकृष्टत्वाच्चाप्रधानं संभवति हि विकल्पमनुष्ठितयागस्यापि
मध्ये वैराग्योत्पत्तौ मोक्षार्थप्रवृत्तौ सत्यामनुत्पत्तिः स्वर्गस्य तत्तच्चैतस्य यद्ग्रहणं
न स्यात् अस्ति यद्ग्रहणे तु सति अस्तिरात्मिमुख्येव वर्त्तते प्रशब्दस्यारंभ इति क
र्त्तारं प्रत्यात्मिमुख्येन क्रियाफलं चेत्तस्येति एतु मारस्ततेएवमात्मनेपदं त्तवती।
त्यर्थो भवति तथा च यद्यपि स्वर्गादिस्वरूपेण नादिवत् तदानीं नैमित्तस्यअं
37 कुरावस्थां कर्त्तारमेवेतीति तद्वारेण फलमेवेतु मारस्तत इति सर्वं च ह्यिति।
फलस्य ह्यंकुरावस्था ऽ पूर्वशब्दवाच्या ॥ ॥णिचश्च ॥ अत्र कश्चिदाह आत्मनेप ६६
दं चुरादिणिचो न भवतीति कुतः ज्ञापकात् किं ज्ञापकं लक्षयते स्वरितेत्वं इति। १६८
नत्वं च आत्मभाषितमभिप्रायत्वेऽपि चुरादिणिचः आत्मनेपदमुदाहृते प
षविधिर्नचुरादिणिजंता स्यात् इति कश्चन निश्चिनुते स्म आत्मैव चोच्चनकिं ग
चन दृष्टं लक्ष्यते स्वरितेत्वमनार्षं ॥ ॥ समुदाङ्भ्यो यमोऽग्रंथे ॥ उद्यच्छति वि
किसाम्प्रतमित्यत्राधिगमपूर्वके उद्यमे यमिर्वर्त्तते चिकित्साशास्त्रमधिगं
उद्यमं करोतीत्यर्थः ॥ ॥अनुपसर्गाज्ज्ञः ॥ सकर्मकार्थमिदमकर्मकाच्चेत्येव ३७

महर्षीभीतिः सर्वतः प्राणा[illegible]
धीविसर्गः । ८

सिद्धत्वात् तदाह गां जानीत इति स्वर्गं लोकं न प्रतिजानातीति सं प्रति स्यामना
ध्यान इत्यनेनापि न भवति। अध्यान विषयत्वात् प्रजानातीति वा पाठः ॥ विशेषोप॥
अप्राप्त विशेषे प्रमित्याह तदुपपदेनेति अनु चस्वरित ञित इत्यारभ्य पंचसूत्र्याण्यनुव
र्त्ते तत्समीपे श्रूयमाणमिति न तु पारिशाब्दिकमसत्त्वात् एवं पंचसूत्र्याणमुदाहार्य
मिति न केवलमुदाहृतयोर्द्वयोरपि तु पंचस्वपि सूत्रेष्वित्यर्थः स्वं यज्ञं कारयते कारय
तीति वा स्वं व्रीहिं संपद्यते संपद्यतीति वा स्वां गां जानीते जानातीति वा ॥ ॥ शेषात्कर्त्तरि ॥
आत्मनेपदनियमः कृत इति प्रकृत्याश्रयोर्थाश्रयश्च अनुदात्तङिद्वादिभ्य एवात्मने
पदं भावकर्मणोरेवेति सर्वतद्वितिसर्वास्यः प्रकृतिभ्यः सर्वेषु चार्थेष्वित्यर्थः येन विशे
षणेनेति अङ्गबंधादिना प्राप्ति वातीत्यनुबंधशेषः गंधनादेरन्यत्र करोतीत्यादिर
र्थशेषः गंधनादिविशिष्टो हि कृञादिः शेषग्रहणेन पंचम्यंतेन निवर्त्तमानो नागृ
हीतविशेषणन्यायेन विशेषणं गंधनाद्यपि व्यावर्त्तयतीति शेषादेव नान्यस्मादि
ति। उपलक्षणमेतत् कर्त्तर्येव नान्यत्रेत्यपि द्रष्टव्यापद्यते गम्यत इति ननु क्रिय
माणेपि कर्तृग्रहणे यदि तावदेव नियमः कर्त्तरि यदि भवति शेषादेवेति ततोऽशे
षात्कर्त्तरि माभूत् शेषात्तु भावकर्मकर्तृषु त्रिष्वपि प्राप्नोति अथाप्येवं नियमः शे

आविशाति यविशातीत्युपसर्गशेषः ॥६

प्राघ्रुदि स्रवतिकर्तर्येवेति ततः शेषाद्भावकर्मणोर्मा भूत् अशेषात्तु त्रिष्वपि प्रा
प्नोतीत्युक्तोऽत्र परिहारः योगविभागो ह्यत्र क्रियते इति तत्र प्रथमे योगे शेषादेवेति
नियमः द्वितीये तु कर्तर्येवेति कर्मकर्तरि स्यादि भावकर्मणोरित्यत्रोक्त एवार्थो
विस्मरणशीलाननुग्रहीतुं पुनः स्मारितः॥ ॥अनुपराभ्यां कृञः॥ इहापि द्विती
यं कर्तृग्रहणमनुवर्त्तते। अनुक्रियते पराक्रियते स्वयमेव॥ ॥उपाच्च॥ उपपूर्वो
हि रमिर्निवृत्तिविनाशयोर्वर्त्तते उपरतो ध्यापनात् उपरतो निधनानीति न चा
नयोरुभयोरर्थयोः सकर्मकत्वमुपपद्यते तत्कथं सकर्मकस्योदाहरणमत आ
ह उपरमयतीति यावदिति क्व पुनरयं तोऽप्यर्थे वर्त्तते अत आह अंतर्भावितण्यर्थ
इति॥ ॥बुधयुध॥ प्राप्नोतीति गम्यत इति चलने तु प्राप्तिहेतुर्व्यापारः कुंडिकास्र
यस्रवतीति कुंडिकास्थमुदकं कुंडिकोदकव्यापारो वा कुंडिकायां छिद्रवत्याममुप १५८
लभ्यते ननु स्पंदनमपि द्रवद्रव्यकर्तृकं चलनमेव न तथा प्रसिद्ध्यभावात्॥ ॥नि
गरण॥ चलयतीति चलकंपने घटादिः आदयतेर्देवदत्तेनेति गतिबुद्धीत्यादि
नाऽणौकर्तुः कर्मसंज्ञा प्राप्ताऽदिखाद्योः प्रतिषेध इति वचनान्न भवति॥ ॥अण
वकर्म॥ अणाविति किमिति एयं तस्य प्रयोज्येन कर्मणा सकर्मकत्वमवस्थं भावीति

५८ मन्यमानस्य प्रश्नः चेतयमानमिति चिती संज्ञाने चुरादिरकर्मकः हेतुमति चोवि
धिरिति बुधादिसूत्रादिह णिग्रहणमनुवर्त्तते बुधादिभ्यश्च हेतुमत्येव णिच् संभ
वति तस्मादिहापि तस्यैव ग्रहणमिति भावः यथा ब्राह्मणा आनीयंतां अन्यत्रामी
धीयानेभ्य इत्युक्ते प्रत्यासत्तेर्वेदाध्यायिनां ब्राह्मणानां संप्रत्ययो भवति तदधीयानेभ्य इ
ति गम्यते तेन त्वधीतव्यमात्रं अधीयानेभ्य इति तद्वदिहापि प्रतिषेधोपि तस्यैव ग
म्यते यज्जातीयस्य विधौ ग्रहणमिति आरोहयमाणादिति णेरणाविति आत्मनेपदं।
ज्ञानवृत्तेश्चैवास्याकर्मकत्वमुपपादितं प्रयुङ् इति पाठः प्रयोजयतीति पाठे णेर
योर्मिमृपः॥ ॥न पादम्या॥ लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रह
णमिति पिबतिवसत्योर्ग्रहणं न पातिवस्त्योः। तेन तयोरकर्मकत्वविवक्षायां पर
स्मैपदं भवत्येव पाययत इति ग्राब्रासाकोव्यावेषां युक्ते पादिष्विति घेङ प्यास्मिन्सू
त्रे पठितव्य इत्यर्थः समीचीइति प्रथमाद्विवचने वाछंदसीति पूर्वसवर्णदीर्घः॥ ॥
वाकापुषः लोहितायतीति अलोहितो लोहितो भवतीत्यर्थे क्यष् अकृत्सार्वधातुक
योर्दीर्घः पटपटायतीति पटत् शब्दस्य डाचि विषये द्विर्वचनं अव्यक्तानुकरणा
दिति डाचि ट्टि लोपः नित्यमाम्रेडिते डाचि [illegible] यं चिदित्यर्थः किंकारण

अपर्दनमपुंजीतेयुनपाद्दंअन्येपणीयमिति केचित्

मित्यादृपा वते तिनचनियमेनव्यावर्त्तितमात्मनेपदं वावचनेनशक्यं प्रापयितुं
नह्यशक्ये र्थेवचनस्य व्यापारः वावचनंतुकेवळस्यलंकारस्य प्रयोगार्थं स्यादि
तिभावः एवंतर्हि स्यादिपरिहारः विकल्पितं विभाषितं पाक्षिकमित्यर्थः कथंपु
नः परस्मैपदग्रहणेनविच्छिन्नमात्मनेपदं शक्यंविधातुं अतआहतत्प्रतिनन्विशा
ब्दः सन्निधिः संबंधकारणं। प्रतिषेधेनचापवादभूतस्यपरस्मैपदस्याभावमात्रं
प्रतिपाद्यते आत्मनेपदं तु स्वेन शास्त्रेणभवति नतावता तस्यसन्निधिर्संभवतिउ
च्यते तात्पर्यतोपि सन्निधिः सन्निधिरेव अपवादापनयनस्यचोत्सर्गप्रवत्तौता
त्पर्यं तेन परस्मैपदं नभवतीत्यस्यात्मनेपदं भवतीतितात्पर्यार्थः। यद्वाउक्तापि
प्रतिषेधएवविधेयः सचपूर्वसूत्रवदिहाप्यात्मनेपदं प्रवर्त्तयिष्यतिकिंतर्हुच्य
तेऽनंतरसंनिधापितमितिनपुनरिहैवसन्निधापितमितिस्यादेतदेवंयदिपर ७०
स्मैपदेनकथंतादात्मनेपदं बाधितंस्यात् नियमेनतु तद्व्यावर्त्तितंतत्रस्वविष
येपरस्मैपद प्रतिषेधोविकल्प्यमानः किंकारणमात्मनेपदं प्रवर्त्तयेत् पूर्वत्र
तु अपवादरूपतया प्रतिषेधेनात्मनेपदप्रवर्त्यतेतस्मादिहापितदनुवृत्तिसा
मर्थ्याद्यादृशः प्रतिषेधआत्मनेपदप्रवृत्त्यविनाभावीप्रवृत्तस्तादृशएवविधी

यत इति मत्वोक्तं अनंतरसन्निधापितमिति यद्यात्मनेपदं विधीयते केनेदानीं प
रस्मैपदं पक्षे भवतीत्यत आह ते नमुक्त इति इह शेषोपाभ्यां सामर्थ्यास्यां अनुपसर्गा
द्वेत्यस्यानंतरं क्यष इति सूत्रं कर्तव्यं क्यषंतादात्मनेपदं वा भवतीति एवं द्विनेदं दुः
खमनुसमुवितव्यं भवति वा ग्रहणं च न कर्तव्यं उत्तरमपि योगत्रयं तत्रैव कार्यं तथा
तु न कृतमित्येव ॥ ॥ द्युद्भ्यो लुङि ॥ द्युतेरेकत्वाद्बहुवचनमनुपपन्नं इत्याशंक्याह ।
तत्साहचर्यादिति छत्रिन्यायेनेति भावः लुटादयोपीति चरितार्थत्वात्संज्ञा नामेव स्याद
च परस्मैतीति : स्यादित्याशंकामपनेतुं दूरवर्त्तिनामुपादानं कृतमित्याह विताद यज
त्यनंतराणामेव पाठः कृत्पर्यंता इति तेदनंतरं वृत्करणं तय एतदुक्तं भवति
त्याह बहुवचननिर्देशादिति व्याघुतादिति पुषादिसूत्रेण ङः । न चैतत एवाङ्ग वि
धानात्परस्मैपदं शाक्यं विज्ञातुं नित्यप्रसंगात् लुङोन्यत्रापि प्रसंगात्त अनुदा
त्तेत्वं पुनर्यं स्यात् ॥ ॥ वृद्भ्यः स्यसनोः ॥ स्यसनोरिति सप्तमी घुतादिष्वेव चव
तार्यः पक्षांतर इति यद्येवमियं प्राप्तिर्वृद्भ्यः पूर्वां प्रवृत्तिं बाधेत ततश्चावृतद्वर्त्ति
ष्टेति लुङि विकल्पो न स्यात् तथा चोत्तरत्रचकारः किं पतेइमां प्राप्तिं हि परत्वात्
र प्राप्तिं बाधेतेति घुतादिषु पाठसामर्थ्यात् सोपि सविषयेत्ति पद्मा लुङीस्य त्रस्य

रविष्यते वर्स्यतीत्यादौ न च ज्ञाश्चतुर्थ्यर्थ इतीह तिषेधः ॥ लुटि च क्लृपः । एवं तत्सदी
ति सामान्यस्य विशेषो बाधक इति भावः कल्प्यैत्यादौ तासि च क्लृप इतीह तिषे
धः ॥ ॥ ७॥ ॥ इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां प्रथमस्याध्याय
स्य तृतीयः पादः ॥ ॥ ७१ ॥ ७॥ ॥ आकडारादेका संज्ञा ॥ ॥ आङ्मर्यादाभिवि
ध्योरिति समासस्य विकल्पितत्वादाकडारादिति निर्देशः समासे त्वाकडारा
मिति स्यात् इह द्वौ कडारशब्दौ भवतः आकूडारा समासः कडाराः कर्मधा
रय इति च तदत्र कोवधिरित्यत आह कडाराः कर्मधारय इति वक्ष्यतीति कु
तः पुनरेतत्स्वातन्त्र्यात् स्वतन्त्रो ह्यसौ प्रथमानिर्देशेन स्वरूपं कार्ययोगित्वात् ।
प्राक्कडारादित्यपि तु परतन्त्रः अवधित्वेन स्वरूपं कार्ययोगित्वाभावात् प्यान्ते ८२
श्च न्यायात् एवं हि भूयसामनुग्रहो भवति लिंगाद्वयं पदं तत्पुरुषो द्विगुश्चेति
द्विगोस्तत्पुरुषसंज्ञां विदधाति तज्ज्ञापयति अनुवर्त्तते द्वितीये प्येकसंज्ञाधि
कार इति अन्यथा दिक्संख्ये संज्ञायामित्यत्र तत्पुरुषाधिकारादेव समावे
शासिद्धेस्तदर्थोपि नोपार्थकः स्यात् कचं पुनरिवानवधिरूपादीयते न आद्वं
द्वादित्येवोच्येत न हि चार्थे द्वंद्व इत्यतः परत्रास्योपयोगः उच्यते द्वंद्वस्य प्राणित्

र्येत्ययमप्यवधिः संभाव्येत ततश्च संबुद्धिसंज्ञामंत्रितसंज्ञयोः समावेशो न स्यात्
का पुनरसाविति एका संज्ञा भवतीत्येतावति सूत्रव्यापारः तत्र विशेषादर्शना
त्पक्षः यापरानवकाशा चेति वचनात् न्यायाद्व्यवस्थेति भावः ननु च यथारब्धे यां २
प्यस्मिन् परत्वानवकाशत्वाभ्यामेव व्यवस्था वाच्या तर्हि अनारब्धेप्यस्मिन्नाभ्यामे
व व्यवस्था भविष्यति नार्थ एतेन तत्राह अन्यच्चेति अयं भावः यत्र प्रयोजनमेकं
भवति सहानवस्थानलक्षणो वा विरोधः तत्रैवानवकाशः सावकाशं बाधते यथा नैवा
रश्चरून् नखावपूतानामिति नखावपनं नवैतुष्यफलकेन तस्फलकावघातो बाध्यते अष्टा
श्रिर्यूपः कर्तव्यो वाजपेयस्य चतुरस्त्रिरिति अष्टाश्रित्वचतुरस्त्रित्वयोर्विरोधाद्बाध्य
बाधकभावः विप्रतिषेधोपि विरोधात्मकत्वात्तत्रैव भवति न चास्त्यस्मिन् सूत्रे संज्ञा
नामेतद्रूपं भवति अतएवान्यत्र समावेशो भवतितरां यथा कृत्यप्रत्ययसंज्ञा
नां तद्धिततद्राजप्रत्ययसंज्ञानां च सति ह्यस्मिन् सूत्रे एकस्यैवैका संज्ञेति नियमात्
विरोधो जायते विरोधे च सति परत्वानवकाशत्वाभ्यां व्यवस्था शक्यते वक्तुमिति त
त्रानवकाशाया उदाहरणमाह स्वपतीति शिशासिषतीति गुरोश्च हल इत्यकार
प्रत्ययः घ यप् अत्र समावेशेपि न कश्चिद्दोषः तथापि वस्तुतः समावेशो नास्ती

त्येतावतेदमुदाहरणं। संप्रतियत्र समावेशोसतिदोषः तद्दर्शयति अततत्त्वादिति

परस्यास्तूदाहरणं धनुषाविध्यतीतिशराणामपायप्रत्यवधिरूपत्वेन धनु

षोप्यवधिरूपत्वं प्रतिसाधकत्वमिति उभयत्रसंगे परत्वात्करणसंज्ञापादानसंज्ञां

बाधते तथाकांस्यपात्र्यांभुंक्ते इत्यधिकरणसंज्ञा धनुर्विध्यतीतिकर्तृसंज्ञा उक्तं

च अपादानमुत्तराणीति इहगाग्र्यो धानुष्कइति अनवकाशाभ्यांभपदसंज्ञाभ्यां

अंगसंज्ञायां धातुप्रत्ययेषु सावकाशायाबाधः प्राप्नोति ज्ञापकात्सिद्धं पदयं

सुपिच बहुवचने सत्येतत् तद्धितेषु चामादरितिस्वादिषु तद्धितेषु चांगस्यसतः

कार्यं नास्तितज्ज्ञापयति समाविशात्यंगसंज्ञानपदसंज्ञाभ्यामितिद्वयेदिस्वाद

यः यजादयो वलादयश्चतत्र यजादिषुत्तसंज्ञा वलादिषु पदसंज्ञेतितत्रांगस्य १७२

उ सतः कार्यविधानमुपपन्नंस्यात् गुरुलघुसंज्ञे वर्णमात्रस्य विधीयते नदीघि

संज्ञे तदंतस्येति तेताभ्यांसमाविशतः तेयथावाभ्रसीबंधुरिति नदीबंधुनी

ति पूर्वपदांतोदात्तत्वं वाभ्रसीबंधो इति गुरोरनृतइति प्लुतश्च सवति विश्वं

नाचवितरो द्वंद्वे घीति पूर्वनिपातः विनौसौ वावेत्रे। इमैताश्च लघुपूर्वादित्य

एरविनशवौ चष्टे विनयतिप्रविनप्यगतः ल्यपिलघुपूर्वादित्ययादेशो सं

वर्तिसापेक्षत्वविषयेसमावेशोन्यासांतरेणसाधितः प्राक्कडारात्परंकार्यमिति
तत्रायमर्थः प्राक्कडारात्संज्ञारूपंकार्यंपरंभवतीतिसंज्ञाप्रकरणसंज्ञैवा
त्रकार्यमुच्यतेपरासंज्ञेत्येवतुनोक्तंविप्रतिषेधेचेतिवक्ष्यतितत्रपरकार्यमित्य
नुवृत्तिर्यथास्यादितितत्रयस्याःसंज्ञायाःपरस्याःपूर्वयानवकाशयाबाधःप्राप्तःसा
पराभवतीतिविधिरूपेणास्यप्रवृत्तिःनचानवकाशयापिपूर्वयानेवपरस्याबाधः
प्राप्नोतिविरोधाभावात्पर्यायाभावाच्चसंज्ञानामन्यत्रसमावेशस्यदृष्टत्वात्सत्यं
एतदेवज्ञापयतिभवत्यत्रप्रकरणेसंज्ञानांबाध्यबाधकभावइतितेनपरयानव
काशयापूर्वाबाध्यतेद्वयोश्चसावकाशयोर्विप्रतिषेधेपरमितिपरैवभवतीतिनियम
फलस्यापिसिद्धिरस्मिन्न्यासेअंगसंज्ञापराकार्यापूर्वेभपदसंज्ञेएवंसर्वत्रयत्र
समावेशइष्टः अस्मिन्पक्षे ऋतोरुएरूछंदसिघस ऋत्विपदष्वत्रसिनिचेतिपदसं
ज्ञाविषयेपरंकार्यमितिवचनात्भसंज्ञापिस्यात्ततश्चओर्गुणः प्राप्नोतिभिक्ष
रणांतुपदत्वेसत्यवयवत्वात्स्यात्रोषोबहुव्रीहिरित्यत्रचदोषग्रहणंकर्त्तव्यंभवति
अन्यथाअन्यपदार्थेचसंज्ञायामित्यव्ययीभावविषयेपरंकार्यमितिवचनाद्बहुव्री
हिसंज्ञापिस्यात्एकसंज्ञाधिकारेत्वव्ययीभावसंज्ञैवबाधिकेतिदोषग्रहणमन

र्थकिं तदेवं शो षग्रहणमेव प्रमाणं न्यासांतरमपि स्तज्ञकारस्यैवान्तिप्रेतमिति ॥
॥विप्रतिषेधे परं कार्यं॥ विप्रतिषेध इति षिधूत्रास्त्रै मांगल्ये च षिधुगत्यामिति सौ
वादिर्दिवादि कयोरन्यतरस्य रूपं तस्याद्दिसेधसिच संजस्वजामिति षत्वमस्ति।
उपसर्गवशाद्यविरोधार्थं वं धातूनां हि उपसर्गवशादन्यस्त्वन्यस्यार्थ उपजायते तद्य
थाप्रहारोपहारसंहारोनुहाराद्ग इति षिधुसंसिद्धावित्यस्य तु दैवादिकस्य षत्वंना ना
स्तिसेधासिचेति शापानिर्दैशात् आदेशप्रत्ययोरित्यस्य तु सात्पदाद्योरिति निषे
धः न नुगतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचना
त् नायं सकारः पदादिः। # षत्व विषये परिभाषेयं न सर्वत्र यदि स्याज्जो ष्टः भूमि
ष्ठ इत्यादौ सकारस्यापदादित्वादादेशप्रत्यय योरित्येव षत्वे सिद्धे अंबादो गवा ७३
दि ग्रहणमनर्थकं स्यात् पर शब्दो यं त्रिलिंगः परो देशः परासेनो परं कार्यमिति।
अतो यमव्युत्पन्नः ~~अंबादोम्बादि ग्रहण~~ प चाद्यजंतो वा नतु क्रमदोर बित्यबतः।
तथाहि सति त्रिलिंगता न स्यात् क्तल्युट् नपुंसके भावे स्त्रियां क्तिन्नादयो यतः। अ
तो घञाद्या पुंस्येव यथापाक स्वपो लवः। वासरूपविधिस्त्व नास्ति क्तल्युट् तुमुन् ख
लर्थेषु वासरूपविधिर्नास्तीति वचनात् स्त्रियामपि नास्ति अस्त्रियामिति प्रतिषे

धातुअतोन्तावेच आदयः पुंस्येव कर्तृवर्जिते तु कारके पुंनपुंसकयोः नकर्तृचित्त्रि
यांपरं कार्यमिति परं यत्कार्यमेत्वादितद्भवतीत्यर्थः अथवा यत्परं कार्यंतद्भवति
कर्त्तव्यं भवतीत्यर्थः अन्येत्वाहुः न क्रियापदत्वेन कार्यशब्दस्यान्वयः नापिपरं कार्यं
भवति ननु शास्त्रमित्येवं शास्त्रादिव्यावृत्तयेकार्यशब्दः किं तर्हि यत्कार्यं कृत्यर्हं
परं तद्भवतीति वचनव्यक्तिः अर्हे कृत्यप्रत्ययः किंसिद्धं भवति तुल्यबलविरोधइ
ति सिद्धं भवति नह्यपवादादीनां सन्निधावुत्सर्गादीनां कृत्यर्हत्वं तेबाधित्वादिति।
विरोधो विप्रतिषेध इति तद्वाचित्वेनैव लोके सिद्धत्वात् विप्रतिषिद्धमिदमित्युक्ते
क्ते विरुद्धमिति गम्यते तस्य विषयं दर्शयति यत्रेत्यादि यत्र विषये वद्वौ स्यात् इत्याद्या
वृत्यार्थौ जाति पदार्थपक्षे अन्यत्र वद्वाभ्यां वृद्धौ युत्यादौ चरितार्थौ वित्यर्थः व्य
क्तिपक्षे तु तद्विषययोर्विध्योरन्यत्र चरितार्थत्वासंभवादन्योर्थः प्रयोजनं ययोस्ता
वन्यार्थौ द्वौ प्रसंगौ द्वे कार्ये दीर्घैत्वादिके युगपत्प्राप्नुतः सविप्रतिषेधः विप्रति
षेधस्य विषय इत्यर्थः तुल्यबलयोर्विरोधोयस्मिन्सतथोक्तः परं कार्यं भवतीतिय
त्कार्यं कृत्यर्हं परं तद्भवतीत्यर्थः तुल्यबलविरोध इत्यस्य व्यावर्त्यं दर्शयति उत्सर्गा
पवादेत्यादि तत्र स्यादिबाधे साकारांतलक्षणोणप्रत्यय उत्सर्गः तं परमप्यनुप

६२ सर्गे सावकाशं बाधित्वानवकाशत्वादात्वस्योपसर्गे इति कएव भवति । सुग्लः सु
म्लः तिरः धेर्णिच्चूरधिजग्धोर् चीति नुम् कृताकृतप्रसंगित्वान्नित्यः अत उपधा
या इति वृद्धिरनित्यानुमि कृते ऽकारस्यानुपधात्वात् प्राप्तेः अत्रानित्यत्वान्नुम
व भवति रंधयतीति आशिश्रियदटुद्रुवदित्यत्रापि भूतचङ्परत्वादियङुव
४३ ङावंतरंगौ बहिर्भूततिबपेक्षत्वाद्वृद्धिरंगलघूपधगुणं परमपि बाधते अ
पवादादीनां तु परस्परसंप्रधारणायां नित्यादंतरंगः तस्मादप्यपवादः उक्तं
च पूर्वं विदुः पूर्वं परोपपत्तौ परस्य नित्यस्य च नित्यमेवं नित्यांतरंगोपगमे तरंगं तस्मा
द्विधिः प्रातिपदोबल्वीयानिति द्वयोरेकत्रोपनिपात उपपत्तिः परस्य नित्यस्य चेति १८४
समस्तमपि उपपत्ताविति तदनुषज्यते प्रतिपदं भवः प्रातिपदोपवादः अप्र सप
तिपत्ताविल्यादि आहृतोपदार्थे द्वयोरन्यत्र कृतार्थत्वाद्विप्रतिषेधे इति परस्परप्र
तिबंधादप्रतिपत्तिरेव प्राप्नोतीति यथा द्वयोः सबलयोरेकः प्रेष्यो भवति स तयोः
पर्यायेण कार्यं करोति यदा उभौ युगपत्प्रेषयतः नानादिक्षु च कार्ये भवतः तदा
यद्यसावविरोधार्थी भवति उभयोर्न करोति तत्र विध्यर्थमिदं परं भवतीति यस्मि
न्कृते यदि पूर्वस्य निमित्तमस्ति तदपि भवत्येव तद्यथा सिद्धं किं सिद्धं इति स्थि

तेपरत्वाद्विभावेह्रुते पुनः प्रसंगविज्ञानादरुकच भवति व्यक्तौ तु पदार्थे सर्वव्यक्त्यु
द्देशेन शास्त्रस्य प्रवृत्तेस्तद्विषयोपनिपातिनोऽन्यत्र चरितार्थत्वाभावात् पर्याये ए
प्रवृत्तेः प्राप्त्या नियमार्थमिदमुच्यते विप्रतिषेधे परमेव भवति न पूर्वमिति । तत्क
ारं त्वाद्य पूर्वस्य लक्षणस्यातत्रानारंभोऽनुमीयते तदुच्यते सकृद्गतौ विप्रतिषेधे यद्बा
ना धितं तद्बाधितमेव भवति तद्यथा जुहुत्वामिति परत्वान्नातङ्ग्रादेशो हृतेस्ताभिवङ्गावेन
प्राप्तं धिलं न भवति लक्ष्यानुरोधेन च व्यक्त्याकृतिपदार्थयोः प्रमाणादिनयोः परिभा
षयोर्विषयविभागो वक्तव्य ॥ ॥ पदस्या ॥ अत्र ह्रस्वयोरिदुतोर्ग्रहणे यु यु पि सवर्णग्र ६
६ हणादीर्घयोरपि संज्ञा लप्स्यते ह्रस्वयोरपि तु स्यात् ततश्च हे शाकटे हे धेनो अत्रापि
प्राप्नोति इह च शाकटिबंधुर्धेनुबंधुरिति नदीबंधुनीति पूर्वपदांतोदात्तं बंधुसज्ञे
तइह च बहुशाकटिः बहुधेनुरिति नप्युत श्चेति नित्यः कप्स्यान्नेष दोषः ङिति
ह्रस्वश्चेत्येतन्नियमार्थं भविष्यति ङित्येव ह्रस्वो नदी नान्यत्रेति कैमर्थक्याद्धि नियमो
भवति विधेयं नास्तीति कृत्वा इह चास्ति विधेयं किं नित्या नदीसंज्ञा प्राप्ता सा विभा
षा विधेया अतो ह्रस्वयोरपि स्यादेवेति दोषं दृष्ट्वा दीर्घयोर्ग्रहणमिति दर्शयति दृ
च ऊ चेति समासविधौ सुबधिकारान्नैतद्द्वंद्वस्य विग्रहवाक्यं किंतर्हि अर्थप्रदर्शनं ।

अत्र चानुकार्यानुकरणयोर्भेदविवक्षायां विभक्तिर्न कृता क्वचित्तु विभक्त्यंतमे
व पठ्यते ननु दीर्घयोर्यग्रहणम् इति निर्देशो नोपपद्यते दीर्घाज्जसि चेति पूर्वसवर्ण
दीर्घप्रतिषेधादत आह विभक्तिको निर्देश इति सुपां सुलुगिति लुप्तत्वाद्वा द्वंद्वे दसी
तिपूर्वसवर्णेनापहृतत्वाद्वा नास्मिन्विभक्तिः श्रूयत इत्यविभक्तिकः अन्ये तु
नैवायं द्वंद्वः किं तु पंचकपदे इत्याहुः। अविभक्तिकत्वं चानुकार्यानुकरणयोर
भेदविवक्षयेति। स्त्रियमाचक्षाते स्त्र्याख्याविति ननु च स्त्र्याख्यौ विति प्राप्नोति अनुप स्त्रियाख्य
सर्गे हि को विधीयते यस्मात् स्त्र्याप सर्ग इतिकः सोऽयं कर्मोपपदे चरितार्थः कर्मणि प
त्वणा बाध्यते यावच्यप्नुति आकारादनुपसर्गात्कर्मोपपदो विप्रतिषेधेन तत्रादन्म
लविभुजादिषु दर्शनादिति एवं च कृत्वेदमपि सिद्धं भवति यस्मिन्दशसहस्रा ७५
णि पुत्रे जाते गवां ददौ। ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुंछेन जीवतीति इदूतो
रेवेयं संज्ञा विधीयते तदंतस्य वा आद्ये पक्षे क स्त्रियां न स्यात् आद्ये ब्राह्मणे
हे लक्ष्मि इत्येवमादिति समुदायोऽयो स्त्र्याख्यः न खीद्रूमातेअम्बूडोरेव तु स्या
त्स्त्रियां विधानादव्यभिचारात्काभ्यां स्त्र्याख्यत्वादिति द्वितीयपक्षमाश्रित्याह
ईकारांतमित्यादि वर्णग्रहणे सर्वत्र तदंतविधिरिति तदंतविधिलाभः प्युत्तिः

वट् स्तो ५.

तंपदमित्यत्र सुप्तिङोः प्रत्ययत्वादन्यत्रापि प्रत्ययग्रहणएवतदंतविधिर्निवारि
तः कथं पुनर्लीयते वर्णयोरिदं ग्रहणं न प्रत्यययोरिति इयङुवङ्स्थाने प्रतिषे
धात् यदि तदंतस्य संज्ञा कथं वक्ष्यति शीनघोः परतः न घंतादंगादुत्तरस्येति समुदायस्य
नदीत्वात्तदेवयुक्तावादृतावपि तथोक्तौ अन्ये त्वाहुः वर्णयोरेव संज्ञा समुदायधर्मस्य
स्त्रीत्वस्यावयवे आरोपात् एतत्स्त्रियाअपि भवति अत्र लिंगमियङुवङ्स्थान
प्रतिषेध इति तेषां गुरुनदीसंज्ञयोः समावेशो न स्यादेकविषयत्वात् इड् इति किमि
तिङ् शामितिप्रत्ययगाभ्याग्रहणादापो न प्रविष्यतीति मन्यते माभेद् इति न घतश्चेति ग्र रू
हणमस्यार्थं स्यात् बहुपितक इत्यस्तापके अकारांतानां नदीसंज्ञाभावस्याग्राम
णीः खलप्वरिति रूपोदाहरणमेतत् संबुद्धांतं वा इष्टव्यं आख्याग्रहणं किमर्थं पाव अथ
ताय स्त्र्याख्यावित्येवं स्त्र्यर्थवृत्तित्वं लभ्यते तत्राह दाख्याग्रहणमिति आङ् पूर्वस्य ख्या
इत्यस्य धातोर्ग्रहणमित्यर्थः क्वचिदाख्यग्रहणं किमिति प्रश्नः शब्दार्थे स्त्रीत्वमिति आ इ
ख्याग्रहणासामर्थ्यात्पदांतरमनपेक्ष्य स्वयमेव यो स्त्रियमाचष्टाते इत्याश्रीयते इह ष
ष्टानि प्रवर्त्ततीनां तु सयलिंगानां शब्दार्थ एव स्त्रीत्वमिति ङिति ह्रस्वश्चेति संज्ञा भवत्येव
एवं पटुप्रवृत्तीनां त्रिलिंगानामपि शब्दार्थ एव स्त्रीत्वं तथा च पटु मानीयतामि

३ रा

युक्ते स्त्रियमानीयकृतीत्सवति अन्येत्वाहुः आख्याग्रहणसामर्थ्यान्नियमेन स्त्रिय
मेव यावावच्छाते न तु लिंगांतरयुक्तमिति आश्रीयते ग्रामणीखलपूशब्दयोस्त्व
क्रियाशब्दत्वेन त्रिलिंगत्वान्न भवति इष्टानि पटुप्रभृतीनां तु स्त्रीविषयत्वा सा
वेपि ङितीह स्वेत्यत्र केवलस्य स्त्रीशब्दस्यैवानुवृत्तिर्नाख्याग्रहणस्येति तेषामा
ऊ पूर्वात् ध्यायतेः क्विपि संप्रसारणे आध्यै ब्राह्मण्यै अत्रापि न स्यात् तस्मात्तदेव य भवतीति
व प्रकार आश्रयणीयः कथं तर्हि वृत्त्युदाहरणं ग्रामण्यै स्त्रियै खलपवे इति उच्य
45 ते क्रियाशब्दत्वे ह्यनयोः पुंसि मुख्या वृत्तिः पुंसामेव खलवपनमुचितो धर्मो यदु
त ग्रामनयनं नाम एवं खलपवनमपि आध्यानं तु स्त्रीपुंससाधारणमिति वि
शेषः प्रथमलिंगग्रहणं च प्रयोजनं क्विब्लुप्समासाः यः शब्दः प्रथमं स्त्रीत्व
युक्तं द्रव्यमभिधाय पश्चाद्येन केनचित्प्रकारेण लिंगांतरयुक्तं द्रव्यांतरमाह १९
तस्य तदा अस्याख्यत्वादप्राप्ता संज्ञा विधीयते क्विपि कुमारीमिच्छति कुमारी
यतेः क्विप् कुमारी ब्राह्मणस्तस्मै कुमार्यै ब्राह्मणाय देहि लुम्मनुष्ये इति लुप्
खरकुटी ब्राह्मणाय यद्यप्यत्र युक्तवद्भावात् स्त्रीत्वमस्तीति यापि स्वाश्रयस्य
पुंस्त्वस्यानिवृत्तेर्नायं स्त्रियामेव वर्त्तत इत्याख्याग्रहणादप्राप्तेः समासः अतितं

चैव ब्राह्मण्यां अवयवस्त्रीविषयत्वात्सिद्धं समासे तावदवयवस्तत्र शब्दः स्त्रिया
मेव वर्त्तत इति तदानीमेव संज्ञा ततश्च वर्णसंज्ञापन्नेः समुदायस्य नद्यंतत्वात् कार्य
सिद्धिः तदंतपक्षेतु अंगाधिकारे तस्य च तदुत्तरपदस्य चेति वचनादिति तंत्री बंधुरि
त्यत्रापि नदीबंधुनीति स्वरसिद्धिः नद्याः पूर्वपदस्य विशेषणात् क्विप् लुपोरपि पूर्वं
स्त्रियामेव वर्त्तित्वात्स्यादपि तदपरित्यागे नैव अर्थांतरे वृत्तिः तत्रार्थांतरसंसर्गा
सम न्यागेवांतरंगत्वात्सत्र न्नासंज्ञापि पश्चाल्लिंगांतरयोगे तस्य बहिरंगत्वान्न निवर्त्ति
ष्यते यद्येवमपि यङ्वङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधे प्रसंगो वयवस्येयङु
वङ्स्थानत्वात् यथाह्यवयवस्य स्त्रीविषयत्वात्समुदायस्य संज्ञा भवति तथावा
वयवस्येयङुवङ्स्थानत्वात्समुदायस्य यण्स्थानस्यापि प्रतिषेधप्रसंगः यथाधि त्र ध्ये
ये आध्यायिति सिद्धं त्वंगरूपग्रहणात् यस्यांगस्येयङुवङौ तत्प्रतिषेधात् अंगस्येय
ङुवङ्विधानसामर्थ्यादंगस्याक्षेपः तेन यस्यांगस्येयङुवङौ निवर्त्तेते तस्य नदीसं
ज्ञानिषेधः आध्यै इत्यत्र तु अवयवस्यांगत्वं नास्ति अंगस्येरनेकाच इति यण्वि
धानादियङुवङ्स्थानता नास्तीति निषेधाभावः एतदर्थमेव च तत्स्थानग्रहणं
इयङुवङोर्यदास्थितिः तदा प्रतिषेधो यथा स्यात् यदा त्वपवादत्वेन बाधः तदा मा

ह्रूदिति एवं ङिति ह्रस्वश्चेत्यत्रापि अंगस्याक्षेपात्सोपि विधिरंगस्यैव स्त्रीत्वे भवति ना
वयवस्य चाकथं अतिचाकरये ब्राह्मणाय प्रिये अतिप्रिये ब्राह्मणाय॥ ॥ नेयङु
वङ्॥ इयङुवङ्स्थाना नमनयोरिति वैयधिकरण्येपि गमकत्वाद्बहुव्रीहिः अन्ये
त्वधिकरणे ल्युटं विधाय कर्तरि षष्ठ्या समासं कुर्वन्ति अथ कथं विमाननासुभ्रु
पाठो कुतः पितुर्गृहे प्रमादस्य वा यं अन्ये त्वाहुः अनित्योयं प्रतिषेधः सह द्वद्वात्
46 तथाच परिभाषा सह द्वन्द्वमनित्यं द्विर्बद्धं सुबद्धं भवतीति अत्र च ज्ञापकं तदेवाव
चनमित्याहुः॥ ॥ वामि॥ संहितासोमयोपि षष्ठी बहुवचनस्य ग्रहणं नतु द्वितीयै
कवचनस्य नदीकार्याभावात् नापि सप्तम्येकवचनस्य नदीसंज्ञोत्तरकाले ङेराम्न तस्य
द्याम्नीभ्य इति विधानात् नचामीति विषयसप्तमी युज्यते तस्मिन्निति निर्दिष्ट इति
वचनात्तदाह आमि परतो वा नदीसंज्ञौ न भवत इति श्रीणामिति संज्ञापक्षे ह्रस्वन २)
द्यापो नुट्॥ ॥ ङिति ह्रस्वश्च॥ यथात्र ह्रस्वविशेषणार्थं यू इतिनानुवर्त्तते तदिहापि
स्यात् मात्रे दुहित्रे इति तस्मात्तदिहानुवर्त्तते न चैवमपि विशेषणं न प्रकल्प्यते यू
ह्रस्वाविति यदि स्यात् न ह्रस्वौ अथ ह्रस्वौ न यू यू ह्रस्वौ चेति विप्रतिषिद्धं नैतद्विप्र
तिषिद्धं आह चायं यू ह्रस्वाविति तत एवं विज्ञास्यामो ह्योर्यौ ह्रस्वाविति कौ च यौ

यो-

यौर्द्ह्रस्वौ सवर्णाविति दाह्रस्वयोः संबंधी स्त्रियाख्य इति अत्र समुदायधर्म
स्यावयव आरोपाद् ह्रस्वयोः स्त्रियाख्यत्वं तदंतविशेषणं चात्रापि स्त्र्याख्य
त्वं इयुवङ्स्थानौ च प्र इति नचैकं पूर्वग्रहणमनुवर्त्तते तत्र ह्रस्वविशेषण एवो
पलक्षीणं तत्कथं पुनर्प्र इति लभ्यते उच्यते चकारो ऽत्र क्रियते संज्ञिनः समुच्चयार्थः इय
ङुवङ्स्थानाविति च प्रकृतं घोरेव च तत्स्थानि वौ त्प्रू इति लभ्यते स्वरितत्वात् दनुवृ प्रिस्यर्या
त्तौ प्रू उत्येतत् ह्रस्वविशेषणमिति न कश्चिद्दोषः ॥ शेषो घ्यसखि ॥ शेष इति आद्य
षाद्वत्यस्मिन्नधिकारे शिष्ट असर्वोपयोगे विप्रवर्त्तिशाय इति पद्यते तत्राणि त्यद्येक
र्मणेरचू अन्यदाघर्म ह्रस्व इति वर्त्तत इति अन्यथा ग्रामण्यादेरपि स्यात् अस्त्रिया
ख्यत्वेन शेषत्वाद्घ्यसनदीसंज्ञानविदितातस्य शेषत्वमात्रे इत्यत्रापि स्यादितिमवा
प्र्छति कस्येति इतरस्मात् ह्रस्वविशेषणार्थं प्र इत्यस्यानुवृत्तिमाश्रित्याह ह्रस्वमिति।
ह्रस्वांतमित्यर्थः तदाह इवर्णो वर्णांतमिति क्वचित्तु ह्रस्व वर्णो वर्णांतमिति पठ्यते ह्र
स्वात्मकं यदि वर्णो वर्णांतदंतमित्यर्थः ह्रस्वेन विशेषस्य विशेषणात्तदंतविधिः ए
वं चासखीति सखिशब्दस्य प्रतिषेधान्न तत्संबंधिन इकारस्य किं सिद्धं भवति इह
शोभनः सखास्य सुसखिः सुसखेरागच्छतीति घि संज्ञास्ति द्धा भवतीन्ह्स्वयं संमु

दायः सखिशब्दः तदंतविधिश्च ग्रहणवता प्रातिपदिकेनेति प्रतिषिद्धः ह्रस्वमात्र
स्य तु संज्ञाविधौ सखिशब्दसंबंधिनः प्रतिषेधादित्यापि न स्यात् यदि तदंते निषे
धो न भवति यस्येति चेत्यत्र इवर्णस्येति यदुदाहरणं साखिशब्दात्सख्युरिति स्त्रीलि
भाषायामिति ङीषि सखि ई इति स्थिते इकारस्य लोपः असति तु लोपे सवर्णदी
व र्घस्य पूर्वं प्रत्ययं तज्ज्ञो वा सखीमतिक्रांतः अतिसखिः अतिसखेरागच्छतीत्य
त्रासखीति निषेधः स्यात् इति यद्दूषयति तन्नोपपद्यते सत्यप्यंतवद्भावे न सखि
धा ग्रहणेन ग्रहणं समुदायस्य सखिशब्दादन्यत्वात् यदा खलु पुल्लिंगेप्यतिसखेरि
ति भवति तदा कः प्रसंगः यद्यंतवद्भावे न स्यात् एवं तर्हि तत्र स्त्र्यैईकारलोपस्य
तद्धित एवोदाहरणं न त्विति परं यत्तत्रोदाहरिष्यति सो नास्थावादो द्रष्टव्यः शेष
ग्रहणं चिंत्यप्रयोजनं एकसंज्ञाधिकाराद्भवदि स्त्र्याख्यस्य ङिति नदीसंज्ञापक्षे १८
चि घिवत्संज्ञानंतविष्यति॥ ॥पतिः॥ सिद्धायामिति भाषायामित्यर्थः न पुनर्निष्पन्ना
यां न हि निष्पन्नायां नियमेन निवृत्तिः शाकयाकर्तृ किं पुनरियं समासावयवस्य
पतिशब्दस्य संज्ञा विधीयते आहोस्वित् तदंतस्य समासस्य यदि समासस्य पति
श्च ग्रहणं च पतिग्रहे अत्र द्वंद्वे घीति पूर्वनिपातो न प्राप्नोति शब्दस्य प्रजापतिनेत्या

अचपति

दीतदंतस्यसंज्ञाकार्यंनप्राप्नोति।अस्तुपतिशब्दस्य अंगाधिकारे तस्यचतदुत्तर
पदस्यचेति।अंगस्यापिकार्यंसखिष्पति।अथवापतिशब्दस्य समासएवेतिनियमेन
किंव्यावर्त्यते।असमस्तःपतिशब्दःतत्पतिशब्दस्यव्यावर्त्यमानत्वेनतदंतस्यव्याव
र्त्यते।पतिशब्दःसमासएवघिसंज्ञोभवतीति।पतिशब्दसंबंधीयइकारस्तदाश्रया
घिसंज्ञायदिभवतिसमासएवेत्यर्थोविवक्षितः तेनसमासेपतिशब्दस्यानंतस्या
घी पिभवति।पतिश्चगृहंचपतिगृहे द्वंद्वेपीतिपूर्वनिपातः पतिशब्दांतस्यसमासस्यापि
भवतिप्रजापतिनेति।अतएववृत्तिकृतापतिशब्दानुरूपःसूत्रार्थोदर्शितः।उदाह
रणंतुतदंतानुरूपंदर्शितं।अथकथंनष्टेमृतेप्रव्रजितेक्लीबेचपतितेपतौपंचस्वा
पत्सुनारीणांपतिरन्योविधीयतइतिवदोवदृषयः कुर्वंति।अत्रपूर्वत्रैवासखिप
तीतिकस्मान्नोक्तं।उत्तरत्रपत्युरेवविकल्पोयथास्यात्।असखिपतिरित्युच्यमाने
पतिशब्दस्यसमासेपिनस्यात्पतिगृहइति।तथाचसखिशब्दस्यसमासाव
यवस्यापिघिसंज्ञायाअभावात्सखिगृहेगुरुसखावापावितिपूर्वनिपातस्या
नियमोभवति॥षष्ठीयुक्तःछंदसिवा॥षष्ठ्यंतेनशब्देनेतिषष्ठ्याविभक्त्यायुक्त
इतितुनभवति।तथाहिसतिषष्ठ्यामित्येवब्रूयात्।युक्तग्रहणमनर्थकंस्यात्॥

षष्ठीग्रहणं किमिति केनचिद्योगस्यावर्जनीयत्वात् पुनस्तैरेव विशिष्टो योगः प्र
त्येष्यत इति प्रश्नः। वचनमेतरेण विशेषो दुर्ज्ञान इत्युक्तौ। अत्र योगविभागः क
र्तव्यः षष्ठीयुक्तश्छन्दसि षष्ठीयुक्तः पतिशब्दश्छन्दसि घिसंज्ञो भवतीति ततो वा छन्द
सीत्येवं यत्र यावच्च शास्त्रे कार्यं तत्सर्वं छन्दसि विकल्पेन भवति। सर्वविषयश्छ
न्दसि विकल्प इत्यर्थः। उभयत्र विभाषेयं बहुलं छन्दसीत्यादिकं स्तु अस्यैव एव
प्रपंचः॥ ॥ह्रस्वं॥ ह्रस्वं गुरु सर्पिष्टमिति अत्र ह्रस्वात्तादौ तद्धित इति षत्वार्थं ह्रस्वसं
ज्ञायां गुरुसंज्ञायाः समावेश इष्यते अतत्तादित्यत्र तु सच ह्रावनिवृत्त्यर्थं ल
घुसंज्ञाया गुरुसंज्ञया बाध इष्यते अतो ह्रस्वपदेश्वेशेषु संयोगपरस्यापि मा
त्रिकस्य ग्रहणं यथा स्यात् लघुपदेशेषु मा भूदिति यथा प्रदेशेषु संज्ञाद्वयं का ७८
र्यं॥ ॥यस्मात्॥ कर्त्रीति लुट् करिष्यतीति लृट् अकरिष्यदिति लृङ् रू ह्न नोस्येत इती
ट् यस्मादिति संज्ञिनिर्देशार्थमिति न तु तदादीत्यनेनात्र संज्ञी निर्दिश्यते न य
स्मादित्यनेन तत्राहुः तदोदात्ति संबध्नादिति सति हि यस्मादित्यस्मिंस्तदादीत्यने
न संज्ञी निर्देष्टुं शक्यते नान्यथा सति हि परामर्शनीयेयं तदित्यनेन परामर्शो भ
वति अन्यथा तदादीत्यसंबद्धमेव स्यात् नेविंश इत्युपसर्गादिधिरस्तीति। यद्यपि

निरत्र धातुविशेषणं नेः परोपो वि शिरिति धातो स्तत्फल विधानान्नियम विधिरपि धातो
रेवं नोपसर्गात् तथाप्युपसर्गस्यापि तत्राच योस्तीति मत्वैवमुक्तो विधि ग्रहणं किमि
ति यस्मात्प्रत्ययपरस्तु को सौ कार्यवत्त्वादि धीयत इत्यध्याहरिष्यतु इति यस्मात् परत्रा
च्छस्याप्यध्याहारस्यादिस्फत्तरं स्त्रीइयतीति इदं परिमाणमस्येति किमिदं भ्यांवो
चः इयादेश इदंकिमोरील्की यस्येति लोपः उमितश्चेति ङी पू स्त्रीशब्दात्सौ हल्ङ्या
दिलोपः अत्र इयत् शब्दे परतः अंगसंज्ञास्यात् भसंज्ञा चेतित [illegible] निमित्तो यस्ये
ति लोपः प्रसज्येत ईशादेशस्य यो यस्येति लोपः तस्यासीयस्याप्यसिद्धत्वं न सव
तिं प्रागसादसिद्धत्वमिति केषांचिदभ्युपगमात् स्थानिवद्भावोपि नास्तिपदांतर
निरपेक्षे हीयतिशब्दे अधुस्यायमानेस्त्री शब्दो नानादि पूर्वः ननु क्रियमाणेपि
विधियद्दणं स्यादेव संज्ञा अस्त्येव यत्र स्त्रीशब्दादिभक्तेः प्रत्ययस्य विधिः इयत
त्यपस्थपरः नैषदोषः सति विधि ग्रहणे प्रत्यासत्तेर्यस्मात् यः प्रत्ययो विहितः तस्मि
न्नेव प्रत्यये परतस्तदायंगमित्यर्थो भवति इह च स्त्रीशब्दाद्विहितो लुप्तः श्र
यमाणस्तु नततो विहितः तदादिग्रहणमनर्थकं यत्तदोर्नित्यसंबंधादेव यस्मा
त्प्रत्ययो विधीयते तदंगमित्यर्थलाभादित्यत आह तदादिवचनमिति स्यादयो

विकरणः आदिशब्देन शबादयो गृह्यन्ते अस्ति तदादि गृह्णो यच्छब्देन तद्
बुद्धस्याध्याहाराद्यस्मात्सूत्रस्य यविधिस्तत्स्यैव संज्ञा स्यात् न तु तत आरभ्य प्रातौ कृ
तस्माद्यः संघातः तस्यैतत्स्य करिष्यामः पचावहै व्यावस्तदावद्रूस्यादावतो
दीर्घो यञीति दीर्घो न स्यात् स्याद्यन्तस्य समुदायस्यानंगत्वात् वावाव द्रूस्यादा
वति वेवतुस्याद्वयेयर्ङ् लुङ् तस्य लोपो व्योर्वलीति यलोपे रूपं कुंडानीति पदायं
नुमूपरादिः तदा सुपि चेति दीर्घः सिध्यति दधीन्यादावनकारान्तत्वान्न सिध्यति नी
पूर्वोत्तपद्ये सामानीत्यादिवत् सिध्यति पदात्वसंक्रपद्यः तदेतत्स्य योजनमादि
गृह्णस्य पूर्वोत्तपद्यतस्तत्र स्थितद्रूत्यप्रयोजनमेतत् ननु च प्रातिपदिकान्तनु १८.
म्विभक्तिषु चेति नुम्ग्रहणं कुर्वतः सूत्रकारस्याभक्तो नुमित्यस्तिज्ञापोलर्ध्य
ते अन्यथा माषवापाणीत्यत्र प्रातिपदिकान्तत्वाद्विभक्तिनकारत्वाद्धाणत्व
सिद्धेः रनर्थकं तस्यात् नैतत् सुष्ठूच्यते तत्र हि समास प्रातिपदिकान्तो नग्रह्य
ते किं तर्हि पूर्वपदादि स्यानुवृत्तेः तदा हिपस्योत्तरपद प्रातिपदिकस्यान्तो गृ
ह्यते समुदायभक्तस्य तु नुमुत्तरपद प्रातिपदिकस्यान्तो न भवतीति तस्य यथा
गर्गाणां भगिनी गार्गीभगिनी यत्र णत्वं न भवतीति तथानुमोपि न स्यादित्य

दानीमिदं भवति गर्गीभगिनीति भवतीपदे तद्वाक्यं भवति गर्गाणां भगोगर्गभग:
सोस्यास्तीति तदानुत्तरपदस्थत्वात्पूर्वपदासंज्ञायामेवेति नियमाभाव:तच्चधा
मात्तभोगायद्भितोमात्तभोगीणाद्रू तिएवमपिमाषाच्चपंतु रीलमस्यामाषवापि
णीअत्रनप्राप्नोतिङीपूअत्रोत्तरपदस्यांतोनपुनर्नकार:नकारएवात्रांत:क
थंगतिकारकोपपदानां कृद्भि:सह समासवचनं प्राक्सुबुत्पत्तेरिति अत:स्या
घुच्चेत्क्रियमाणे तदादियुरुणं नुम्प्रयोषं साधयतीतिमत्वानुमगृहणं कृतंपदितदादी
त्युच्येतकर्तृत्यादौनप्राप्नोतिनह्यत्रतदादिकिंचिदस्ति किंतर्हि तदेवव्यपदेशिवद्भावा
द्भविष्यति वाक्यभेदाद्दायस्मात्प्रत्ययविधिस्तदंगं तदादिचेतिद्वंद्व:त्वदृत्यादिष
त्ययंगमितीयताप्रसिद्धेगुरुनिर्दिष्टाएवलिंगवाक्यभेदस्यअथकथंतिनत्तिसंच
स्कर्तुरित्यत्रस्न्नमंतस्यसमुद्भस्यसमुदायस्यांगसंज्ञाकथंचनस्यात्तद्रूतस्य
वाग्रहणंभवतितदादेर्वानचेदंतत्रापितदादिग्रहणमपितददादितदेतत्कथंभवति
नैवविज्ञायतेसआदिर्यस्यतत्तदादिकथंतर्हितस्यादिस्तदादितदादिरादिर्यस्यत
तदादिउष्ट्रमुखवत्एकस्यादिशब्दस्यलोप:एवंहिविज्ञायमानेसिनत्रीत्यत्र
यस्मात्प्रत्ययविधिर्निर्दिष्टस्तस्यादिर्नकार:सआदि:स्न्नमंतस्यसमुदायस्येतिसि

चो

ध्यति एवं संचस्करतुरित्यत्रापि तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति वोऽस्य यत्र संज्ञासि
द्धिः अथात्र भ्रमः पूर्वस्य त्तिशब्दस्यांगसंज्ञा कस्मान्न भवति न भवतु कोऽत्र दोषः गु
णः स्ताव सार्वधातुकमपिदिति ङित्वादेव न भविष्यति इड्ग्रहणं अनक्ति सेनक्ति अतो दी
र्घो यञीति दीर्घः प्राप्नोतीति ङी इति तत्र वक्तव्यं अथवा यस्मात्प्रत्ययविधिरिति वच
नाद्यस्मिन्प्रत्यये विधीयमाने यस्पंचम्यानिर्दिष्टं तत्तत्रांगमिति तस्मिंश्च विधीयमा
ने ये पंचम्यानिर्दिष्टा रुधादयः न ते तत्र परतः ये च तत्र परतोऽप्ति प्रत्यये न ते
50 पंचम्यानिर्दिष्टा इति संज्ञाभावः श्नप्रत्ययं मिति चतुर्थी तदर्थे इति समासः अ
स्यत्र चतुर्थ्येकवचनस्य विधिरिति असति पुनः प्रत्ययग्रहणे ग्रशब्दस्य संबंधि १८
शब्दत्वाभावादस्यातोऽगमाश्रय इयङ् स्यात् सति तु सप्तमीनिर्दिष्टे प्रत्ययग्र
हणेऽगशब्दः संबंधिशब्दो भवति ततश्चांगस्येयङ् भवत्यश्रीत्युक्ते पदपेक्षं च
दंग तस्य तत्राजादाविति विज्ञानादर्थशब्दे परत इयङुवङौ न भवतः किं पुन
रंगसंज्ञायाः प्रयोजनं अंगस्येत्यधिकारः [illegible] तदास्त्विर्यदेतदंगस्येति एतत्प्रत्यय
इति वक्ष्यामि एवमपि प्राकारो [illegible] उपेदिष्टसोपसर्गस्याडाटागमौ प्राप्नुतः नैष दो
षः प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति पुनरेषा परिभाषा न चैषा प्रवृ

ग्राईतस्य च १ वै

वपोगविभागेन सिद्धाय स्मात्प्रत्ययविधिस्तदादि प्रत्यये इत्येको योगः प्रत्ययग्रह
माणे यस्मात्स प्रत्ययस्य विधिः तदादि गृह्यत इत्यर्थः तेन भित्यादि रियादौ प्रत्यये प्र
त्यये सप्तम्या निर्दिश्यते तत्र तदादे ग्रहणे तेन देवदत्तो गार्ग्य इति संघातस्य नित्यत्वे
न भवति सुप आत्मनः क्यजित्य च तु सुपा कर्मणो विशेषणान्तेदं तस्य विधौ सिद्धम्महान्तं
पुत्रमिच्छतीत्यादाव तिप्रसंगे तदादि नियमेन व्युदासः यदि तदादि नियमः क्रियते
स्त्रीप्रत्यये पि स्यात् ततश्च ष्यङः तस्य पूर्वपदस्योच्यमानं संप्रसारणं परमकारीष
गंधीपुत्र इत्यत्र न स्यात् यत्पूर्वपदं न तत् ष्यङंतं यच्च ष्यङंतं न तत्पूर्वपदं नैष दोषः ने
स्तेनास्त्री युङुवङ्भ्यां नावस्त्रीत्यनुवर्त्तते तेन च स्वरूपपदार्थकत्वेन प्रकृतमपीहार्थपदा
र्थकं संपद्यते तेनायमर्थो भवति प्रत्ययग्रहणे तदादिर्गृह्यते स्त्री चेन्नाभिधीयते स्त्री
प्रत्यये तदादि निषेधयमो नास्तीत्यर्थः यद्येवमतिकारीषगंध्यापुत्र अत्रापि प्राप्नोति प्रधा
नं पास्त्री तस्यामेव तदादि नियमप्रतिषेधः अप्रधाने स्त्रियां तु तदादिनियमो भव
त्येव तेन यावानं शास्त्रार्थं प्राधान्येन प्रतिपादयति तावत् स्त्रीप्रत्ययांतस्य ग्रहणं
ष्य- भवति कुद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति गतिरनेतर इत्यनंतरस्य ग्र
हणेन सापपीति ॥ सुप्तिङंतं पदं ॥ सुप्तिङिति प्रत्याहार ग्रहणमिति सुबिति स

यदि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणमिष्यते तर्हि वतद्दो न कुल स्थितो तत्र एनतूड दकौविशीर्णमिति एनतस
गतिकसमनकुलेन गाग्राणां नैषदोषः २
वन

सप्तमीबहुवचनस्य ग्रहणं न भवति यदि स्यात् ङिसंबुद्ध्योः पदत्वाभावादेव नलोपस्या
प्रसंगान्न ङिसंबुद्ध्योरिति प्रतिषेधोऽनर्थकः स्यादिति भावः सप्तमीबहुवचनस्य
पकारेण प्रत्याहारो न कप् पकारस्यानन्यार्थत्वान्न च स्वरार्थः पकारः यदात्र कप्
पकारेण प्रत्याहारस्तदा स्वरविधावपि तथैवेति सुप्स्वादेव स्वरसिद्धेः पित्वमनर्थ
कमेव स्यात् यदि च सुप् ग्रहणेषु कप् पकारेण प्रत्याहारोऽभिमतः स्यात् सुप्स
र्वनामस्थान इत्येव ब्रूयात् स्वादिष्विति गुरुनिर्देशोऽनर्थकः स्यात् ब्राह्मण इति पद
त्वादुत्वविसर्जनीयौ न नु च यस्मात्प्रत्ययविधिस्तदादीत्यनुवृत्तस्य सुप्तिङन्त्यावि
शेषणादेव तदन्तस्य ग्रहणं सिद्धं नार्थोऽन्तग्रहणेन तत्राह पदसंज्ञायामिति इह १८२
सत्यन्तग्रहणे सुप्तिङन्तमेव संज्ञा स्यान्न तस्याभिनिविष्टस्यादौ सासदाघोरिति षत्वनिषे
धः स्यादित्यात्राक्रियमाणमन्तग्रहणमुक्तस्यार्थस्य ज्ञापकं संपद्यते गौरी ब्रा
ह्मणितरेति तरबन्तस्य घसंज्ञायां सत्यां तत्रोत्तरपदे परतो गौरीशब्दस्य पुंवद्भा
वं बाधित्वा परत्वाद्ध्रस्वत्वं स्यात् तरपि तु परतो ब्राह्मणीशब्दस्य न स्यात् तत
श्च गौरी ब्राह्मणीतरेति स्यात् गौरी ब्राह्मणितरेति चेष्यते न चोत्तरसमासे प्रदर्शि
नपरं वाक्यमुपात्तं न चेत् तत्कार्यो दारूरणं गौरब्राः ह्मणितरेति समासे रूपं॥ नः

क्ये॥ क्य इति क्यङ् क्यषामिति संज्ञायां समजेत्यस्य तु क्यपो ग्रहणं न भवति प्र
योजनाभावात् न तावन्मन्येत्यत्र न लोपः प्रयोजनं सत्यपि पदत्वे प्रातिपदिक
त्वात् सुबंतमित्यनुवृत्तेर्वा क्यपि विध्यर्थमेतन्न भवति ननु क्यङादयः सर्वे सुबंता
द्विधीयंत इति प्रत्ययलक्षणेन सिद्धं पदत्वं नार्थ एतेन तत्राहुः सिद्धे सत्यारंभो नि
यमार्थ इति नांतमेवेति क्य एव नांतमित्येषबुद्धिपरीतनियमो न भवति न ङिः सं
बुद्ध्योरिति निषेधाद्वाच्यतीति अत्र पदत्वाभावात्कुत्वजश्त्वे न भवतः यत्तु गोशब्दाद्दृशं
तान्नुकारांताच्च क्यच्च भवति नान्येस्य इत्याङः तेषां क्यङ् क्यषोरेव नियमस्य व्यावर्त्येषु
दर्शनीयं तपस्यतीत्यादौ॥ ॥क्विति च॥ भवदीयमिति पदत्वाज्जश्त्वं ओर्गुण इति पद
संज्ञया भसंज्ञाया निरस्तत्वाद्यस्येति लोपाभावः एवमस्त्रिय इत्यत्र ओर्गुणेन न
भवति चकारोऽनुक्तसमुच्चयार्थः तेन भुवद्वद्धारयतो मे तौ छंदसि तसौ न व्यर्थ इति
भसंज्ञां बाधित्वा पदसंज्ञा भवति भुवद्वद्ध्यो धारयद्दध्युः॥ ॥स्वादिषु॥ सुशब्दा
त्त्वसंज्ञां बाधित्वा ... सप्तमीबहुवचनात्परस्य ग्रहणं न भवति असर्वनामस्थान
दे कवचनादिति ... राजानं धित इत्यादौ सर्वनामस्थाने सुबंत इति व्याख्यायाः
इति निषेधाद्यदि हि ... स्यात्तत्रेवासर्वनामस्थान इति ब्रूयात् अथ राजवान्त
संज्ञाया निषेधो नेष्टः

नुकि

ह्यवानित्यादौ अंतर्वर्त्तिनिं सर्वनामस्थाने निषेध इति चेन्न लुमताल्लुप्ते प्रत्ययल
क्षणाभावात्तसौमत्वर्थ इति पदसंज्ञाप्रतिषेधाय भसंज्ञाविधानाच्चैवमाक्रप
इति यदि पुनः सप्तमीबहुवचनपर्यंता एकविंशति प्रत्ययाः गृह्येरन् तदा सुब्
ग्रहणमेव कुर्यात् अनुवर्त्तयेद्वा असर्वनामस्थान इत्यनेन संबंधात्तेषां
विपरिणामात् किमर्थं पुनराक्रपः प्रत्याहारे गृह्यंते यावता सुबंतात् तद्धितो
त्पत्तिः समर्थाधिकारात्स्वार्थिकाअपि नत्सुबंतादेव घकालतनेष्विति लिंगात्
५ ततश्च राजत्वं राजतर इत्यादावंतर्वर्त्तिन्या विभक्त्या सुबंतं पदमित्येव सिद्धं स
त्यं भसंज्ञार्थत्वादाक्रपः प्रत्ययाहारे गृहीताः राजत्वमित्यादीनां सुबंतत्वेपि पर
त्वादनेनैव पदत्वं युक्तमित्येषामुपन्यासः राजानौ राजान इति अत्रापदत्वान्न १८३
लोपाभावः राजे इत्यत्र तु प्रत्ययलक्षणेन निषेधो न भवति न ङिसंबुद्ध्योरिति लिं
त्रि गात् नैतल्लिंगमुपपद्यते हे चर्मन्निति नपुंसके लुमताल्लुप्ते वा सर्वनामस्थाने
निषेधाभावादस्यैव पदत्वमिति तत्रार्थवान्प्रतिषेधः एवं तर्हि नायं प्रसज्य
प्रतिषेधः सर्वनामस्थाने नेति किं तर्हि पर्युदासोयं यदन्यत्सर्वनामस्थानादि
ति सर्वनामस्थाने न विक्षिन्नप्रतिषेधः । यदि केन चित्स्याप्नोति भवत्येव पूर्वेणाव

प्राप्नोति अथवाऽनंतरा या प्राप्तिः सा प्रतिषिध्यते कुत एतदनंतरस्य विधिर्वा भवति
प्रतिषेधो वेति अथ वा सर्वनामस्थान इत्ययं योगविभागः पक्षष्यसे व ध्रौव्यते तंत्रं तेन
यज्ञादौ पदसंज्ञा निषिध्यते न हलादाविति राजेत्यादौ स्वादाविति वा सुबंतमिति वा
भवत्येव अथ कस्माच्छसादिष्विति नोच्यते एवं ह्यसर्वनामस्थान इति न वक्तव्यं भ
वति उत्तरार्थं तु सु च पि नपुंसके भसंज्ञा प्रथा यथा स्यात् सामनी इति मा भूत् इह सं
ज्ञा विभाषा ङिश्योरिति वचनसामर्थ्यादेवास्या पि लोपो न भविष्यति तत्राय
मप्यर्थः यच्चेत्यादौ श्यां प्रतिषेध इति न वक्तव्यं भवति असत्वादेव सिद्धं इह तर्हि
सुपदी ब्राह्मणी कुल्वे इति पद्भावो न स्यात् असत्वात् इह च सामानि पश्येति भत्वा
ल्लोपः स्यात् इति यथान्यासमेवास्तु ॥ ॥ यचि भं ॥ यकारादावित्यादि यस्मि
न्विधिस्तदादावल्ग्रहण इति तदादिविधिः गार्ग्य इत्यादौ भत्वाद् यस्येति लोपः न
भो गिरो मनुष्यामिति द्वे अप्येते उपसंख्याने छंदोविषये इत्याहुः नभ इव नभ
स्वदिति तृतीया समर्थाद्वतेर्विधानात्तुल्यार्थोपदर्शनमेतत् न भसांतुल्यं व
र्तत इति विग्रहः पदनिबंधनकार्यनिवृत्त्यर्थमेव चैषां भसंज्ञा विधीयते न तु भ
त्वनिमित्तं कार्यं यथा स्यादिति असंभवात् न भस्वत् अंगिरस्वदिति अत्रापदत्वा

डुत्वा सावः सनुष्वदिति अत्र पदत्वे रुत्वं स्यात् न तु षत्वं अपदांतत्वात् रषाभ्यां एव सुव
र्णेण श्वुइति पदत्वे सति पदांतस्येति प्रतिषेधात् णत्वं न स्यात् नलोपश्च स्यात् स
त्वे प्यत्वे पोन भवति अनंगत्वात्॥ तसौ॥ मत्वर्थे ॥ येनाद्विष्टा याः प्रकृतेस्तकार
सकाराभ्यां विशेषणं तदंतविधिरित्याह तकारसकारांतमिति मत्वर्थे प्रत्यय इ
ति व्यधिकरणा सप्तम्यौ मतोरर्थो मत्वर्थः तत्र यः प्रत्ययो वर्त्तते तस्मिन्नित्यर्थः अ
थवा समानाधिकरणो मतुप् शब्देन साहचर्यान्नित्यो लक्ष्यते मतुरर्थो यस्य स
मत्वर्थः उदश्वितानिति भत्वात् पदत्वाभावे जश्त्वं न भवति मयङ् इति वत्वं उदके न स्थ स
उक यतिवर्द्धते उदश्वित् क्विप् उदश्वितान्यतरस्यामिति निर्देशात् प्रसारणं भावः
संज्ञायामुदभावः पयस्वीति अस्मायामेधास्रजो विनिः भत्वात् डुत्वा भावः अर्थो ।२४
ग्रहणं किमर्थं न मतावित्युच्यते स्वामिति वर्त्तते व्यधिकरणे सप्तम्यौ मतो यस्वादयः
कथं पुनः शब्दे नामशब्दो वर्त्तते शब्दे असंभवादर्थे वृत्तिर्विज्ञास्यते पद्येवं लक्ष्ये
नै तकथं स्यात् तत्तु न लभ्यते न हि सामानाधिकरण्ये संभवति वैयधिकरण्यं शक्यं
विज्ञातुं तत्र मतावेव स्वादौ स्यात् पयस्वान् यशस्वानिति इह तु न स्यात् पयस्वी
ति यशस्वीति अतोर्थग्रहणं कर्त्तव्यं यद्यर्थग्रहणं क्रियते मतुबपि न प्राप्नोति तस्या
५३

र्थविशेषणत्वासत्यमर्थविशेषणं मतुप् विशेष्याकारोपितत्वास्ति अस्यास्त्यस्मिन्नि
ति च मतुपोर्थः स च विनादीनामिव मतुपोप्य विशिष्टः तत्र यथा देवदत्तशाला पामा
सीना ब्राह्मणा आनीयंतामित्युक्ते विशेषणभूतोपि देवदत्तः सति ब्राह्मण्ये आनी
यते पत्र तु उपलक्षणाकारस्यासंभवः तत्रैवोपलक्षणस्य कार्ययोगः तद्यथा चित्र
गुरानीयतामिति न हि चित्रगवीनां चित्रागावः संति ॥ ॥ अयस्मयादीनि ॥ यद्यत्र संज्ञावि
धीयेत आनंतर्याद्भसंज्ञाविधानद्वारेणैव निपातनं स्यात् पदसंज्ञानं स्यात् सपदसंज्ञ
यां भसमावेशो न स्यात् तस्मात्साधुत्वमेव युक्तं विधातुमिति मत्वाह यस्मादयादीनि
दि साधुत्वप्रकारविशेषं दर्शयति भपदसंज्ञाधिकार इत्यादिद्वारं मुख्यमुपायः अय खे
स्मयमिति अयसो विकारः छंदसीति मयट् ॥ ॥ बहुषु ॥ बहुवचनं विहितमिति ।
ततश्च तस्य विधेयविभक्तिनिर्दिष्टस्यापि प्राधान्याद् बहुत्वादेव न तु विधेयत्वमिति भावः ।
बहुत्वसंख्यानुभूतविभक्तिनिर्दिष्टाप्यप्राधान्याद्विधीयेत इत्याह तस्यानेनेति इदंशा
मन परमनेन ग्रंथेन दर्शितं स्वादिविधिवाक्येन हि सिद्धमेतद्वाक्यं तत्रापि विध्यर्थे नानि
यमार्थमिति पदार्थ बहुवचनं विहितमिति बहुत्वसंख्यावाच्यत्वेन विधीयत इति च ।
यदि पुनरेकवाक्यतया विशिष्टविधिः स्यात् इतरेतराश्रयं प्राप्नोति विहितानां

51

सादीनां बहुवचनादिसंज्ञासंज्ञयाच विधानमिति किं चाव्ययेभ्यो निःसंख्येभ्यः
स्वादयो न स्युः अ[illegible] तोत्तिन्न वाक्यत्वमेव पुंक्त तत्रापि विध्यर्थमेवं इत्येके चिन्नन्यं
ते स्वार्थद्रव्यलिंगसंख्याकर्माद्यात्मकः पंचकः प्रातिपदिकार्थ इति आदितस्त्रिक
इत्यन्ये तत्र शब्दप्रवृत्तिनिमित्तं वै स्वार्थः सचानेकप्रकारः स्वरूपं जातिः गुणः क्रि
याद्रव्यं संबंध इति डित्थः गौः शुक्लः पाचकः यष्टिः पुरुषो दण्डीति जात्यादि शब्दे
ष्वपि जात्यादिमात्रस्वरूपनिर्देषु स्वरूपमेव निमित्तं अभिधानाभिधेययोरभेदा
ध्यासात् शब्दस्वरूपोनुक्तो र्थोभिधीयते अस्य गौरिति नाम अयं गौरिति च प्रती
तिविरूपोभिधीयते तत्र हेतु वैय्यधिकरण्यं सामानाधिकरण्यं च तत्र जात्यादिवत्स्वरू १८५
पमपि शब्दत एव प्रतिपन्नमर्थस्य विशेषणं मन्यते उक्तं च ग्राह्यत्वं ग्राहकत्वं च द्वे
शक्ती तेजसो यथा तथैव सर्वशब्दानामेते पृथगवस्थिते तेन स्वरूपमपि स्वार्थो
युज्यते स्वार्थस्य यत्र विश्रांतिर्वा यो द्रव्यं तदिष्यते। पर्यवसानभूमिरित्यर्थः तच्चाने
कप्रकारं जातिर्गुणः क्रियाद्रव्यं स्वरूपमिति गौः शुक्लः पाचकः डित्थः लिंगं स्त्री
त्वादि संख्या एकत्वादि कर्मादि यो वक्ष्यमाणः कारकविशेषाः तदिह द्वितीयं दर्श
नं वृत्तिकारेण प्रदर्शितं अन्वयव्यतिरेकाभ्यां हि शब्दार्थ निश्चयः यस्य शब्दस्या

स्त्रोषोनि

तूष्णीमनुवहति

द्विवचनैकवचन एवेति एवं कर्मणि द्वितीये त्यादौ कर्मणि द्वितीये वेत्येवमादिको
ऽर्थनियमो वेदितव्यः एवं हि प्रत्ययानामनियतत्वादव्ययेभ्यो निःसंख्येभ्यो निःका
रकेभ्यश्च स्यादयः सिध्यन्ति अथवा प्रत्ययनियमः बहुष्वेव बहुवचनं द्व्येकयोरेक
स्मिन्नेवैकवचनं न संख्यान्तरे द्वित्व एव द्विवचनं न संख्यान्तर इति एवं कर्मण्येव
द्वितीया न कारकान्तरेषु अव्ययेभ्य एव द्विवचनैकवचने इति तुल्यजातीयस्य च निय
स्वादयः मेन व्यावृत्तिः बहुष्वेव तु बहुवचनं न द्व्येकयोः एकस्मिन्नेवैकवचनं न संख्यान्तरे द्वि
त्व एव द्विवचनं न संख्यान्तर इति एवं कर्मणि द्वितीये त्यादावपि कर्मण्येव द्वितीया
न कारकान्तर इति एवमपि ह्यव्ययेभ्यः सिध्यन्ति ॥ ॥ द्व्येकयोः ॥ द्विशब्देन सोरुच
र्यादेकशब्दः संख्यावाची अयमपि भावप्रधानो निर्देशः अत एव द्व्येकयोरिति
द्विवचनं तदाह द्वित्वैकत्वयोरिति यत्तदपीत्यादिना ऽस्यापि विषयत्वं दर्शयति क
थं तर्हि सामान्यविहितयोरिति यावता नियमार्थत्व एतन्न घटते उच्यते साधार
णपर्यायः सामान्यशब्दः ससंख्यनिःसंख्यसाधारण्येन विहितयोरित्यर्थः अ
र्थाभिधानामिति अर्थो वाच्योऽभिधीयते कथ्यते येन तदर्थाभिधानं द्व्येकयोरित्य
त्र संख्याया अल्पीयस्त्वादेकशब्दस्य पूर्वनिपातो अस्मादेव निपातनान्न

भवति संख्येयत्वनेयं द्वारकमल्पीयस्त्वमित्यन्ये॥ ॥कारके॥ अधिकारोनै
कप्रकारः संज्ञाविशेषणं स्थानीप्रकृतिर्निमित्तमादेशाइति प्रत्ययः शेषे पूर्व
परयोः धातोः ज्याप्रू प्रातिपदिकात् आर्द्धधातुके मूऊन्यइति तदिह विधेया
निर्देशात्स्वरितत्वाच्चाधिकारत्वे स्थितेप्रकारमाह कारक इति विशेषणमधि
क्रियत इति न तावत्संज्ञात्वे वाधिकारः संज्ञाया भाव्यमानत्वात्सत्तमप्यनुपपत्तेः
अथ संज्ञानुरूपः प्रथमानिर्देश एव कस्मान्न कृतः युक्तं चैतत्कारकसंज्ञाब्द
नेषु वक्ष्यमाणानामपादानादीनां षण्णामेव कारकसंज्ञया ग्रहणस्येष्टत्वा १८
त् अन्यथा नटस्य शृणोतीति कारकशेषस्यापि प्रसंगात् उच्यते संज्ञापक्षेः
पाये यद्ध्रुवं तत्कारकसंज्ञं भवति अपादानसंज्ञं चेति अयमर्थो भवति एवम
न्यत्रापि तत्र अकारकापादानसंज्ञयोर्युगपद्विधानात् परस्परनिमित्तनिमि
त्तिभावाभावादकारकस्यापि व्यापारशून्यस्यापादानसंज्ञा प्राप्नोति वि
शेषणाधिकारे तु कारकेषु मध्ये यदपाये ध्रुवं कारकमित्यर्थो लभ्यते निर्वि
शेषणस्य सजातीयविषयत्वादिति व्यापारशून्यस्य न प्राप्नोतीत्यतो विशेष
णानुरूप एव निर्देशः कृतः ननु संज्ञानुरूपः कारकसंज्ञात्वं चार्थत्वाद्वा

पारश्चान्यस्य न तत्त्ववर्ति किंच कारकसंज्ञाया अपादानादिसंज्ञाप्तिः समावेशो
न प्राप्नोति तत्रश्च स्वतंत्रं बेरमदुत्पन्नसप्तम्यां अयमालायां गतिकारकोपपदादितिस्व
शेन स्यात् कारक इति निर्द्धारणे सप्तमी सामान्यापेक्षं चैकवचनं कारकशब्दोय
मस्ति ण्वुलन्तः करोतीति कारकमिति अस्य व्युत्पन्न एव संज्ञाशब्दो निमित्तपर्यायः
राक्षे तत्र प्रकर्षस्य ग्रहणे पादानादिषु कारके न प्रवर्तते तद्यथा कर्तृशब्दः तेषामस्वतंत्रत्वा
त्स्यात्तेष्वेवापक्षे कर्तृसंज्ञा प्रसज्येत नैष दोषः सर्वमेव खलु कारकं यथायथमवां
तरव्यापारं निर्वर्त्तयत्प्रधानक्रियायामुपयुज्यते सकलकारकजन्यफलभूता वि
क्लित्यादिरूपा क्रिया प्रधानक्रिया यदपेक्षा सामान्यरूपा क्रिया प्रधानक्रियाफलजननी
मसर्वाणि हि कारकाणि फलजननाय प्रवर्त्तन्ते अतो यत्फलजननरूपेण सर्वका
रकेषु विशिष्टं किंचित्खलु कारकं केनचिदेव रूपेण फलं जनयति फलजननी स
र्वेषामभिन्नरूपा अवांतरभेदविवक्षायां तु करणादिरूपोन्मेषः न च वैशेषिका
णामिवास्माकमेका क्रिया नानेकत्र समवेता धात्वर्थो हि क्रिया न परिस्पंदन ए
व धातुना च सकलकारकानुपायी ओदनादिफलावच्छेदेनैकीकृतो व्यापारो
ऽभिधीयते तस्यामेकस्यां प्रधानक्रियायामुपयोगाय यथायथमवांतरव्यापारमु

स्वेनेत यथा अपादानस्यावधिस्तावोपगमनं व्यापारः संप्रदानस्य प्रेरणानुम
त्यनिराकरणादिः करणस्य काष्ठादेर्ज्वलनादिः अधिकरणस्य संस्तवेन धा
रणादिः कर्मणो विक्लित्यादिः कर्तुः प्रसिद्ध एव प्रयोजकस्य प्रेषणादिः नचैवं सति
करणादीनामपि कर्तृसंज्ञाप्रसंगः परतंत्रत्वाभिधानेन हि कर्तृसमवाये करणादी
नि परतंत्राणि व्यवायेस्वतंत्राणि तद्यथाऽमात्यानां राज्ञा सह समवाये पारतंत्र्यं
व्यवाये स्वातंत्र्यं यद्येवं कारकव्यपदेशोपि करणाद्यवस्थायां न स्यात् करणं कारक
मिति अधिकरणं कारकमित्यधिकारसामर्थ्यात् कारकशब्दोपनतं स्वातंत्र्य
मवस्थांतरगतं विज्ञास्यते अवस्थांतरे यस्वतंत्रं तत्साधकतमं करणमिति कर्तु
रेवत्वेकस्य सांप्रतिकं स्वातंत्र्यं तत्र कर्तृसंज्ञांगतया चोदितं यदि तर्हि व्युत्पत्ति पक्षे १८८
पावस्थांतरगतमेव स्वातंत्र्यं एवं तर्हि करणाद्यवस्थायां निमित्तत्वाद् एवास्युप
गतो भवति यद्येवं किं दोषप्रतिविधानव्यसनेनेति निमित्तपर्यायस्यैव यद्ग्रहण
मस्त्विति मन्यमान आह कारकशब्दश्चेति कस्य हेतुरिति द्रव्यविषयोपि हेतुः
कारकं प्राप्तमित्यत्ति प्रायः कारकशब्दोयं क्रिया हेतावेव प्रसिद्धः इत्याह कि
या पाकृतिं अनाश्रितव्यापारं निमित्तं हेतुः आश्रितव्यापारं निमित्तं कारकं उक्तं

वृक्षादि विषयो हेतुः कारकं नियतक्रियमिति अनाश्रिते तु व्यापारे निमित्तं हे-
तुरिष्यते इति वै कथं तर्हि एवमुक्तं अनर्थान्तरमिति नहि सामान्यविशेषवचनानामन-
र्थान्तरवाचित्वं सत्यं सामान्यशब्दस्याप्यर्थप्रकरणादिना विशेषे वृत्तिमत्ति प्रेत्यनु-
तयोक्तं वृक्षस्य पर्णं पततीति पर्णविशेषत्वेनात्र वृक्षो विवक्षितः नत्वपायस्य निमित्त-
त्वेनेत्यपादानसंज्ञा न भवति ननु चापायस्याविवक्षितत्वादपादानसंज्ञा न भविष्यति।
सति ह्येव ध्रौव्ययोगे तिरपायो भवति नान्यथा। न चात्र वृक्षो वधित्वेन न विवक्षितः तथाहि वृ-
क्षमजहत्यपि पर्णं वृक्षस्य पर्णं पततीति भवति प्रयोगः यदा वृक्षाच्छिन्नः पतति सत्य-
मत एवास्मिन्नेतत् प्रसन्नाहं माणवकस्य पितुरमिति अत्रापि पितुः संबंधित्वेन माणवको
विवक्षितः ननु यस्य क्रियां प्रति निमित्तत्वेनेति कर्मसंज्ञा न भवति असति कारका-
कारे तस्यापि स्यात् शेषलक्षणा तु षष्ठी अकथिते दुह्यादिपरिगणनाद्राज्ञः पुरुषद्-
त्यादौ सा च कारकाख्या यदि तर्हि विशेषेभ्य इदं ध्रुवादीनां न संज्ञा कारकाद्दत्तश्रुतयोरेवाशि-
षीत्यादौ यत्र कारकशब्दः संश्रूयते तत्रापादानादीनां वक्ष्यमाणानां षण्णामेव ग्र-
हणमिष्यते तत्र सिद्ध्यति संज्ञापक्षे तु न दोषः संज्ञा ह्यावर्तमाना संज्ञिनं प्रत्यायय-
तिस्यादेतत्पक्षे शेषेऽपि निमित्तपर्यायस्य कारकशब्दस्योपादाने तत्रैव निमित्त-

तदधिकारविहिताभ्यामपादानादीनां ग्रहणं भवतीति

पु

मपादानाद्येवेति तदसत् नटस्य शृणोतीत्यादौ कारकशेषस्यापि संभवादत आह
कारकसंज्ञाबद्धं नैवेति कारकग्रहणं प्रदेशेषु स्वर्यते स्वरितेनाधिकारावगतिर्भव
तीति भावः ।१ ॥ध्रुव॥ ध्रुवमिति ध्रु गतिस्थैर्ययोरित्यस्मात्कुटादेः पचाद्यच् विरूपं पय
च ध्रुव स्थगतिस्थैर्ययोरिति पठंति तेषामिगुपधलक्षणः कप्रत्ययः अपायो विश्लेषो
विभागस्तद्धेतुभूतश्च गतिविशेषोवधिसापेक्षः तत्र विभागस्य द्विष्ठत्वान्नकेवल
मपपन्नेवापाययुक्तः किं तर्हि यतोपैति सोपि युक्त एवेत्याह ध्रुवं यदपाययुक्तमि
ति कथं पुनः सप्तमीनिर्देशे अपाययुक्तमिति प्रतिपद्यते इत्याह अपाये साध्ये इति
साध्यत्वेन विषयत्वात्सामर्थ्यलभ्यो योग इति भावः ध्रुवमित्येकरूपमुच्यते ध्रुव
मस्य रूपमिति इह तु तदपायेन विशेष्यते अपाये ध्रुवमिति न तु सार्वत्रिकमिति तत
श्चापाये ध्रुवमुच्यते यदपायेनाविश्यते उपयुज्यते चापायेतश्चार्थादवधिभूत
मित्याह यदवधिभूतमिति एवं च साम्ये धावतोरश्वयोः पततो धावतः पतित इ
त्यादौ सत्यपि क्रियांतरावेशाच्चलत्वे तद्गमनादिक्रियावेशाभावात्तन्निमि
त्तमपायं प्रत्यौदासीन्यादस्त्येव ध्रुवत्वमिति भवत्येव संज्ञा उक्तं च अपाये य
दुदासीनं चलं वा यदि वाचलं ध्रुवमेव तदावेशात्तदपादानमुच्यते इति पततः

र्या

पतितइत्यत्रापिपरगतपातापेक्षया ध्रौव्यमस्त्येवतथाद्विपततोध्रुवएवाश्वोयस्माद
श्वात्पततिअश्वोतस्यतस्माद्स्य पतनेकुड्यादि ध्रुवइष्यते' इहतुपरस्परस्यान्मेषावपसृ
रतइतिमेषांतरक्रियापेक्षमवधित्वं एषयकूष्टयकूमेषयोः स्वक्रियापेक्षंकर्त्तृत्वंचएच
कृष्टयकूगतिर्विनावधिनानापायइतिकथ्यतेजुगुप्सेतिसंश्लेषपूर्वकोविश्लेषोपायः
सचात्रनास्तिबुद्धिपरिकल्पितस्तुगौणः नचमुख्येसंभवतिगौणस्ययुक्तंयुक्तंअतए
वसीत्राचार्यानामित्यादेरारंभइतिवार्त्तिककारस्याभिप्रायः अत्रचकारकंत्रोषवाक्य
ष्टीप्राप्नोतिनरस्यस्त्रणोतीतिपथाप्रत्याख्यानेतुसाधकतममितितमयरूएलिंगका
रकप्रकरणेयथासंभवमेवसाधुत्वमितितदिशा धर्माज्जुगुप्सतइत्यादौजुगुप्सादि
पूर्विकापायोनिवृत्तोजुगुप्सादीनांप्रवृत्तिरितिस्थितेयएषमनुष्यःप्रेक्षापूर्वकारीभवति
सपश्यतिदुःखहेतुरधर्मोनैनंकरिष्यामीतिसबुद्ध्यातंप्राप्नोतिप्राप्यचततोनिवर्त्तते
धर्मोस्त्रमाघातिधर्मान्मुह्यतीतियएषनास्तिकः पुरुषः सपश्यतिनानेनधर्मेणकिं
चिदाप्यतेनैनंकरिष्यामीतिसतंबुद्ध्याप्राप्नोतिप्राप्यचततोनिवर्त्ततेतत्रैवमपाय
इत्येवसिद्धमितितच्चैतानि द्विष्टविषयंकिंचिदुपात्तविषयंतथा अपेक्षितक्रियंचेति
त्रिधापादानमुच्यतेयत्रधातुनापायलक्षणसंज्ञाविषयानिर्दिश्यतेयथाग्रामादा

गच्छतीति तन्निर्दिष्टविषयं यत्र धातुर्धात्वंतरार्थं गिंस्वार्थमारूपया बलाहकाद्विद्योत
तइति अत्राहि निःसारणांगे विद्योतने विद्युतिर्वर्तते बलाकान्निःसृत्य विद्योतत इ
ति एवं कुसूलात्पचतीत्यत्रौदनं गेपाके पचिर्वर्तते कुसूलादादाय पचतीति तत्
उपात्तविषयं अपेक्षितक्रियं तु यत्र क्रिया न श्रूयते प्रमाणांतरेण प्रतीयते यथा आ
गच्छतं पुरुषं प्रत्युक्तेन पप्रच्छ कुतो भवानिति सोपि प्रत्युक्तवान् सिद्धमागमनमुपजी नदेव
वयन्नाह पाटलिपुत्रादिति ध्रुवग्रहणं किं ग्रामादागच्छति शाकटेनेत्यत्र शाकटस्य
माभूत् अपचक्रियमाणेपि ध्रुवग्रहणे दूरत्कस्मान्न भवति धनुषा विध्यतीति अत्राहि
त्रासाणामपायं प्रत्यवधिर्भावे नैव धनुषः साधकतमत्वं सत्यं उभयप्रसंगे पर
त्वात्करणसंज्ञैव भविष्यति नन्वेवमक्रियमाणेपि शाकटस्य न भविष्यति एवं स सेव
त्यंतर विषये सर्वत्र वृक्षस्य पर्णं पततीत्यत्र त्वपायस्याविवक्षितत्वादकारकत्वा
च्च न भविष्यति संज्ञिनिर्देशार्थं तु नहि कारकमिति सप्तम्यंतेन शाक्यः संज्ञी निर्देष्टुं १९०
सिद्धं तु निर्द्धार्यमाणस्य संज्ञित्वात् अपायविषयेषु कारकेषु मध्ये यत्कारकं सं
ज्ञांतरस्याविषयः तदपादानमिति तदेवं ध्रुवग्रहणं चिंत्यप्रयोजनं॥ ॥भीत्रा॥
त्यर्थीः त्राणं त्राः संपदादिपाठात् भावे क्विप् भीश्च त्राश्च भीत्रौ अर्थौ येषां ते भीत्रार्थाः षष्ठीव

६

योगापेक्षया कारकापेक्षया वेत्याक बिभेत्यर्थानामित्यादि अत्र बिभेति त्रायति
शब्दौ तदर्थयोः वर्त्तेते तदर्थौ यो येषामित्यर्थः त्राणं बाधकस्योरक्षणं बाधकाश्च
भयहेतव इति चार्थानामपि भयहेतुः कारकं भवत्येव चोरेभ्य इति चोरयतेः पञ्चा
द्यचि चोराः क्वचित्तु चोरेभ्य इति पाठः तत्र स्वार्थिकप्रज्ञाद्यण् छत्रादिषु वा चुराद्रा
ब्दः पठ्यते स चाऽत्रस्ययादित्यस्यण्पासम्ञः योयुजितियुचि बाधके प्राप्ते स्मादेव नि
पातनादकारप्रत्ययो णिन्तु किंच वुत्पाद्यते ततश्चुरा स्तेयं शीलमस्येति णो कृते स
एवार्थो भवति बिभेतीति जुहोत्यादिः उ द्वि अत इति ओ विजी भयचलनयोः तौदादि
को नुदात्तेत् अरणप इति अत्र तस्करेभ्यो वृकादिभ्यो पि सर्पेनारण्यात् ननु च ध्रुव
मित्यनुवर्त्तिष्यते न चौरणमवधित्वेन विवक्षितं परत्वाद्धाधिकरणसंज्ञैव भवि
ष्यति सत्यं पूर्वस्यैवायं प्रपंचः कथं भयादिपूर्विकायां निवृत्तौ भ्पादयोवर्त्तते बिभे त्रो
भेतीति कोऽर्थः भीत्या निवर्त्तत इत्यर्थः त्रायत इति कोऽर्थः चोरहस्ताद्धधात्र संतत्रा
णेन निवर्त्तयतीत्यर्थः कथं तर्हि चोरमध्यवर्त्तिनि चोरेभ्यो बिभेतीति प्रयोगः न
ह्यत्र निवृत्तिरस्ति अत्रापि भीत्या निवर्त्तितुमिच्छतीत्यर्थो द्रष्टव्यः तदेवं बुद्धिप
रिकल्पितोपायोस्तीत्युपात्तविषयमिदमपादानमिति हस्तनवयोगप्रपं

वेकिमवयव एव पर्येनुयोगेन॥ ॥पराजेरसोढः॥ अत्र धातुपाठगतस्य जीत्येताव
न्मात्रस्यानुकरणं ततः पराप्रवीत्ति: पराज्जिरित्युत्तरपदलोपी समासोऽदृष्टव्यः
ननु प्रकृतिवदनुकरणं भवतीत्य धातुरितिप्रातिपदिकसंज्ञायाः प्रतिषेधादसु
बंतात्समासो न प्राप्नोति नात्र प्रतिषेधात् नायं प्रसज्यप्रतिषेधः धातोर्नेतिकिंतर्हि
पर्युदासोयं युदन्य द्धातोरिति धातोर्न विधिर्न प्रतिषेधः एवमपीयउः देशः प्रा
प्नोति परत्वाद्धेर्ङि तीति गुणेन त्र विप्रतिसमुदायस्य वासमुदायोनुकरणं कस्य
स्य समुदायस्य प्रयोगस्तस्य यद्येव मध्ययनात्पराजयते अत्र च न प्राप्नोति न
ह्यत्र पराजीति रूपमस्ति कं तर्हि स्याद्यत्र जिरूपमस्ति अध्ययनात्पराजितइ पप
तित्यत्र उदाहरणे पराज्जिर्न्यूनीभाववृत्ते अध्येतुं क्रसति ग्लायतीत्यर्थः अक
६० र्मकस्यायमत्रार्थे तत्र षष्ठ्यां प्राप्तायां वचनं प्रत्युदाहरणे वृत्तिप्रवेवर्त्तते विप
रास्पांजेरित्यत्रार्थ द्वयेपि वर्त्तमानस्य ग्रहणं अयमपि प्रपंचः न्यूनीभावपूर्विकायांनि १०
वृत्तौ वर्त्तेः सिद्धं अध्ययनात्पराजयत इति कोर्थः न्यूनीभावेन ग्लान्या ततो निवर्त्तत
इत्यर्थः तेन प्रत्युदाहरणे परत्वात्कर्मसंज्ञा प्रविप्रतिर्न चोदनीयं॥ ॥वारणा॥ ईप्सि
तत्राब्दोस्य ... सि प्रेतपर्यायः अस्ति च क्रियाशब्दः आप्तुमिष्ट ईप्सित इति तत्र पूर्वस्य

जाधिष्यते पादानसंज्ञेति

ग्रहणे यवानामभीप्सितत्वेन गवां च परकीयत्वे एव स्यात् न विपर्ययो न खल्वस्यैतद
सि प्रेप्सितं यदुतान्मीया गावः परकीयान्यवान् माघसन्निति माभूत् वन्यवावार्थेवि
तुरीप्सिता वा पर्माणानां तु गवामीप्सिताः न चात्र विशेषः कृतः कर्तुरीप्सितम् इति न२
इदं तु तर्हि न स्यात् अग्नेर्माणवकं वारयति कूपादंधमिति न ह्यग्निकूपौ वारयितु
र्वार्यमाणस्य चाप्तिप्रेतौ क्रियाशब्दस्य तु ग्रहणे वार्यमाणस्यो धादगमनादि क्रि
यापाकूपादेराप्यमानत्वात् सिध्यति अंधस्यापरस्य पन्नपि गंतव्यं जिगमिषति अन्य
यानन कश्चित्तस्य प्रवृत्तिः स्यात्। यवेभ्यो गां वारयतीति ईप्सितम् आवरणे चुरादिः
अथात्र गवामपादानसंज्ञा कस्मान्न भवति ईप्सिततमो ईप्सितोऽभवत्येव यथा व
मुक्ततमोऽपि मुक्तः न परत्वात्कर्मसंज्ञा भविष्यति कर्मसंज्ञाया अवकाशः वार जिहि
णार्थेभ्यो अन्यः अपादानसंज्ञायास्तु प्रकर्षरहितमीप्सितं ईप्सिततमस्योभय
प्रसंगे परत्वात्कर्मसंज्ञा। अयमपि प्रपंचः इति अस्तित्वज्ञापि बुद्धिव्यवस्थितोपा
यः कथं पत्रपत्ययं यदि गावः क्षेत्रं गच्छेयुः ध्रुवः सस्यविनाशः अथ मंत्रराज
नयं च संबुध्या संप्राप्य निवर्तयति अतो न चोदनीयं प्रत्युदाहरणे क्षेत्रस्याधि
करणसंज्ञा भविष्यतीति॥ ॥अंतर्द्धौ येनादर्शनमिच्छति॥ अंतर्द्धौ निमित्तात्कर्मयो

गे इति सप्तमी यथा चेतनेन धान्यं लुनाति यत्र चेतनस्य धान्येन योगो नास्ति तथेहापि
दर्शनमिच्छतीति इच्छाकर्मणाऽदर्शनेनांतर्द्धे योगो नास्ति अथादर्शनस्य पंचमी कथमा
ख्यमात्मनो दर्शनमिच्छतीति तेनांतर्द्धेर्योगोऽस्ति यस्यैवादर्शनं तस्यैवांतर्द्धानमिति
चोत एवमपि निमित्तात्कर्मयोग इति सप्तमी किं निमित्तं गृह्यते कारणं प्रयोजनं वा
कारणं चेज्जाड्येन बद्धः अत्रापि चाप्नोति यैरेव बद्धः तैरेव तत्र जाड्यं भवतीति त
स्मात् प्रयोजनस्य तत्र ग्रहणं यथा चर्मणि द्वीपिनं हंतीति द्वीपिहननस्य चर्म प्रयोजनं
इहत्वंतर्द्धानमदर्शनस्य कारणं अंतर्हितः खल्वसौ न दृश्यते तस्माद्विषयसप्तम्येषा
सा सप्तमी वा यत्नेनेति कर्तरि तृतीयाननु चादर्शनेन योगात्कर्तृकर्मणोः कृतीति षष्ठ्या भा
व्यं उभयप्राप्तौ कर्मण्येवेति नियमात् तृतीया च भविष्यति कर्मत्वं चादर्शनस्य मान
चात्मन इति नश्यते मा माविप्रेनादर्शनमिच्छतीत्यस्मिन्नुक्ते कस्येत्यपेक्षायां स्वमा १०२
त्मन गम्यते। अंतर्द्धिनिमित्तमिति अंतर्द्धिनाकारणेनेत्यर्थः निमित्तकारणहेतु
षु सर्वासां प्रायदर्शनमिति प्रथमा अथवा बहुव्रीहिरदर्शनस्य समानाधिक
रणं विशेषणं स्यात् तेनु पात्तोपि तद्वृत्तोपत्तदो नित्यसंबंधाल्लभ्यत इत्याहतत्का
रकमिति अंतर्द्धत्त इति तिरोभवतीत्यर्थः निलीयत इति लीङ् श्लेषणे दैवादिकः

चोरान्निवर्तयति इति आम्नानं ते माध्या हुरित्येवमर्थः। ननु परत्वात्कर्मसंज्ञात्र विष्यति।
सत्यमयमपि प्रपंचः क्वचित्पुनरपत्ययं यथा उपाध्यायः प्रत्ययेत् ध्रुवमेवं प्रेक्षणमुपालं
वर्गि भावेति सम्बुध्याप्राप्य निवर्तते तस्मिन्न सति अदर्शनमिच्छतः शिष्यस्यैवस्या ध्रुव
८ मित्यनुपपत्तिरिष्यते एवं तर्हि सूत्रस्यावाचकत्वमापद्यत इति असतीति तस्मिन्नन्तर्द्धौ
ध्रुवमपादानसंज्ञं भवति तत्र ध्रुवमदर्शनमिच्छतीत्यर्थः स्यात् न च ध्रुवमिच्छति
यश्चेच्छति न तत् ध्रुवमित्यवाचकं स्यात्॥ ॥आख्यातोपयोगे॥ नियमपूर्वकं विद्याग्रहणं
मिति तत्रैवोपयोगशब्दस्य रूढत्वात् यथा तेषां मंत्राणामुपयोगे द्वादशाहमधःशा
य्येति नियमोत्तिष्ठाचरणादिः नटस्य शृणोतीति किं पुनर्नटः कारकमुताहो न यदि
कारकं कर्मसंज्ञा प्राप्नोत्यकथितं चेति अथाकारकमुपयोगग्रहणमनर्थकं स्यात्
अस्त्वकारकं न ह्युपाध्यायान्नटस्य व्यापारे कश्चिदन्यो विशेषः अन्यतो नियमा ८
त् दुह्यादिपरिगणनात्तु कर्मसंज्ञा न भवति किं तु नटस्य गाथां शृणोतीति यं चि
कैस्यकथां शृणोतीति पाठः तत्रापि नटादिनिमित्तं गाथादेः श्रवणं करोतीत्यर्थः
न तु गाथादिविशेषणं नटादिः अकारकत्वप्रसंगात् ग्रंथिकः कथापाठाच
लि मिता अयमपि प्रपंचः कथं उपाध्यायान्निःसरंतं शब्दं गृह्णातीति स्फुट एवा

क्षि

त्राणपायः इदं तर्हि प्रयोजनं उपयोग इति वक्ष्यामि नटस्य मा शृणु इति ननु नटस्य सत्यप्य
वधित्वे शेषरूपेण विवक्षिते तत्रास्य षष्ठी भविष्यति यथा न माषाणामश्नीयादिति वस्तु
तः कर्मत्वेपि माषाणां सत्यं स एव विवक्षानियमः सूत्रकारेण प्रदर्श्यते उपयोगे
अवधित्वं विवक्षितं अन्यत्र तु शेषत्वमिति ॥ ॥ जनि ॥ जननं कर्तृ जनि कर्तेति कर्म
णि षष्ठ्या समासः अयमेव निर्देशो ज्ञापयति कर्तरि चेति प्रतिषेधो नित्य इति कः
६४ पुनरसावित्याह जन्यर्थस्येति एतदुक्तं भवति जनिशब्दो यजिमिङ्र यज्ञादिभ्य इति
जनेर्णाव इत्यमुत्पाद्य जन्यर्थवाची व्युत्पादितः जनिवध्योश्चेति वृद्धेः प्रतिषेधः
सि न त्विक् श्तिपौ धातुनिर्देश इति इक्प्रत्ययान्तः गमहनेत्युपधालोपप्रसंगात् ना
प्यागन्तुकेनेकारेण धातोर्निर्देशः कर्तव्यः शब्दान्तरकस्य धातोः कर्तृसंबंधा
योगात् अपाप्यर्थद्वारको योगः स्यात् एवमपि धातुनिर्देशे तस्यैव प्रयोगस्या
त्र न पर्यायस्य अंगाद्दंगा शरो भवतीति अर्थग्रहणेन त्रापि भवतीति प्रकृतिरि
त्यस्य विवरणं कारकमिति उपादानकारणमित्यर्थः अन्ये तु ध्रुवग्रहणानु १०३
वृत्तेरेव प्रकृतिपरिग्रहे सिद्धे प्रकृतिग्रहणं कारणमात्रपरिग्रहार्थं वर्ण
यंति अत एव वृत्तावप्युक्तं कारणमिति न पुनरुपादानकारणमिति तेन पु

मो पि २

शास्त्रयौ दो जायते इत्यादावपि स्त्वतीति किं पुनस्तज्जायते उतासत् न सत्त्व ज
न्मवैयर्थ्यात् यदि जन्मनः प्रागेव सत् किं जन्मना अथैवमपि जन्म जापि स्व जायस्वे
त्येवं च दोजायेत नाप्यसत् असतः कर्तृत्वायोगात् शशविषाणादेरपि जन्मप्रसंगा
द्यो त् उक्तमत्र पूर्वं विस्तोम विजह स्मं स्प शान्चेममुत्तरं संप्रकिं तइवार्थाल्लोजायमा
नोस्ति धीयत इति यतश्चोन्मदते इत्यत्रोपपादयिष्यामः किं चास्माकमनेन दुस्तर्के
ण अस्ति तावत् शृंगाच्छरो जायत इति प्रयोगः स उपपादनीय इत्येतावत् अयम
न पि च पंचः लोके हि यद्यस्माज्जायते तत्ततो निर्गच्छतीत्युच्यते लोकप्रसिद्ध्यनुसारेण च
शब्दप्रयोगः अर्थ तत्त्वं तु तथा वा स्त्वन्यथा वा ॥ ॥ सुवः । सवनं सूरिति संपदा
द्रवे दित्वात् क्विप् अत्रापि प्रशब्दो द्रष्टव्यः न हि केवलस्य सवत्यर्थस्य सवनेन योगः प्र
किं तर्हि प्रशब्दविशिष्टस्य सुवः कर्त्तेति सवत्यर्थस्य कर्त्तेत्यर्थः सुवो वाधातोः कर्त्ता
कथं पुनर्धातोर्नामिकर्त्ता स्यात् धातुर्वै शब्दः शब्दे असंभवाद र्थे कार्यं विज्ञास्य
ते त स उपपद्यते सावेक्ष्य विगतस्त्रात्स्त्री अशोष्यो यधः प्रथमं उपलक्ष्य इत्यर्थ
इत्युपलक्षते कर्मव्यापारे प्रसवति वर्त्तत इत्यर्थः प्रकाशात इति यावत् यतेन जन्य
पि स्तावास्तर्वेणास्तिद्धिं दर्शयति अनेकार्थत्वाद्धातूनामस्मिन्नर्थे वृत्तिः अयमपि

वि

कर्म॰ अभि
प्राणाक्रि
पाया ३

63

प्रपंचः कथं प्रसवनपूर्वके निःसरणे च सत्वतिर्वर्त्तते॥ ॥कर्मणायम्॥ कर्मणा करण
भूतेनेति कथं पुनरेकमेव वस्तु युगपत्कर्म भवति करणं च क्रियासेदात् दानक्रि
यायां करणं दीयमानं यागवाश्विषाद्युपाध्यायमभिप्रैति संबध्नाति ईप्सति वा अ
भिप्रपूर्वो हि इण् ईप्सतिना समानार्थः अभिप्रेतमित्युक्ते ईप्सितमिति गम्यते उक्तं
च अनिराकरणात्कर्तुस्त्यागांगं कर्मणेप्सितं प्रेरणानुमती चाचलक्षते संप्रदा
नतामिति त्यागो दानं तस्यांगं शेषभूतं कारकं कर्मणा गवादिनेप्सितमाचुमिष्टसं
प्रदानतां लभते अनिराकरणप्रेरणा देवमख्यिस्यनुमानाद्धाद्देवेभ्यः सुमनसो
ददाति पाचकाय पत्तिं ददाति उपाध्यायायगां ददातीति न तु निराकुर्वन्संप्रदानं
भवतीति श्लोकार्थः अत्र केचिदाहुः कुगतिप्रादय इत्यत्र वार्त्तिके उदात्तवता तिङा न
गतेः समासवचनमिति योजात एव प्रथमो महस्वान्देवो देवान् क्रतुना पर्यभूष ने
त् यः शंबरं मन्वविदत् यस्मान्न ऋते विजयन्ते यो वै प्रजा वंपतामपथ्ये न प्रतिपद्य
ते इत्यादीन्युदाहरणानि अत्र सर्वत्र यद्वृत्तान्नित्यमिति निघातप्रतिषेधात्तिङन्त
मुदात्तवत् तत्र अयमभिप्रैतीत्यत्रापि समासे सति प्रातिपदिकार्थत्वाद्विभक्त्युत्प
त्तिः स्यादिति नेति वयं तस्य छंदोविषयत्वात् यदि कर्मणायमभिप्रैति स संप्रदानं

अजां नयति ग्राममिति अजो नयति क्रियाकर्मत्तिः संबंध्यमानस्य ग्रामस्य संप्रदा
न संज्ञा प्राप्नोति न प्राप्नोति किं कारणं कर्मत्वेति करणे तृतीयेत्युक्तं न च यथा शिष्य
स्योपाध्यायसंबंधे गोः कारणं एवमजा ग्रामसंबंधे ईप्सिता नासमानार्थे तु सुतरामप्राप्तिः
तथा ह्ययमस्ति चैत्री स्रुक्तेयमिति निर्दिष्टस्य शेषित्वं कर्मणेति निर्दिष्टस्य गवादेः करण
त्रे स्य शेषत्वं प्रतीयते यथाकर्मास्ति ज्ञापे क्रियाफल इति कर्तुः शेषित्वं क्रियाफलस्य च शे
षत्वं न चात्र शेषशेषिभावः तृतीयते किं च नीवह्योर्हरतेश्चापीति द्विकर्मकेषु नयतिः
परिगण्यते अतोपि ग्रामस्य न भविष्यति अथ किमर्थं महती संज्ञा क्रियत इत्युच्यते अन्व
दिव्यादि र्थसंज्ञाविज्ञानार्थमिति सम्यक्प्रदीयते यस्मै तत्संप्रदानमिति एवमन्वर्थत्वात्संज्ञाया
ददाति कर्मणा यमभिप्रैति स संप्रदानमिति विज्ञायते एवमपि रजकस्य वस्त्रं ददाति
घ्नतः पृष्ठं ददातीत्यत्र कस्मान्न भवति अदानत्वात् किं पुनर्दानं किंचिदुद्दिश्य पुनर्ग्र
५ हणाय स्वत्वत्यागः यथा ब्राह्मणाय जलं ददाति देवेभ्यः सुमनसः पाचकाय त्तिज्ञा उपा
ध्यायाय गां खण्डिकोपाध्यायस्तस्मै चपेटिकां ददाति नष्टायमति दण्डादिति कर
तलप्रहारश्चपेटिका रजके पुनर्ग्रहणाभावः उपमानात्तु ददाति प्रयोगः त
त्रकारकस्य शेषत्वान्नटस्य शृणोतीति वेत् षष्ठी कर्मणेति किं यावता उपाध्याया

यगांददातीति गोरुपाध्यायस्य चाप्तिप्रेयमाणत्वं यतो गोदानक्रियया करणभूत
याप्तिप्रेयते गवा च उपाध्यायः तत्र परत्वात् गोः कर्मसंज्ञेति पारिशेष्यादुपाध्याय
स्यैव संप्रदानसंज्ञा न तु विप्रतिपत्तिर्नैतदस्ति सत्युभयोरप्तिप्रेयमाणत्वे अंतरंगत्वा
त्कर्मण एव गवादेः स्यात् कर्मसंज्ञा तु ददातिकर्मणोन्यत्र सावकाशा कारकप्र
करणे प्रकर्षेणाश्रीयते न त्वंतरंगबहिरंगभावोपि यं सग्रहणेक्रियमाणेसिद्धेतु
नैव संप्रदानसंज्ञा स्यात् श्रुतपदार्थसंबंधे सति तेनैव निराकांक्षत्वादध्याहारा
नुपपत्तेः सत्यपि वाध्याहारे यः स इत्येवाध्याहारः स्यात् तत्र उपाध्यायायाक्रो
शेण गोदीयते इत्यत्रार्थे शिष्यायोपाध्यायस्य गोदीयते इति स्यात् कर्मसंज्ञायां
हि कर्तृग्रहणं स्यात् तस्योपलक्षणार्थमिति शिष्यस्य कर्तृत्वाभावेपि गोः कर्मसंज्ञा
युज्यत एव तथा च सार्थाहीयत इति कर्मणि लकारोत्पत्तिः अस्तु यग्रहणं किं याव
ता कर्मणा यमेति गच्छति प्राप्नोति संबध्नातीत्यर्थः अभिप्रैतीत्युक्तेपि स एवाभि
अग्रहणे क्रियमाणे कार्यविवक्षा स्यात् ततश्च यमेव संप्रैति तत्रैव स्यात् य
मगात् यं चेष्यति तत्र न स्यात् अभिप्रग्रहणे पुनः क्रियमाणे न दोषो भवति अ
भिरामुख्ये वर्तते प्रशब्दः स्वादिकर्मणि ततश्चोपसर्गद्वयोपादानसामर्थ्यात्

न

कालांतरांवच्छिन्नाक्रियाश्रीयतेननुयथातेनदीव्यतीत्यादौसंख्याकालयोरविवक्षा
तथेदमपिसंख्यावत्कालस्यापिविवक्षास्तिक्वासर्वंअयमेवन्यायस्सिद्धो॥ ५॥ उपसर्गवि
योपादानेनप्रदर्श्यतेयदातुअतिष्ठेतीयस्यदृश्यतीत्यर्थः तदास्तिप्रयग्रहणंकर्त
व्यमेवक्रियाग्रहणमपिकर्त्तव्यमितिवार्त्तिकं एतद्व्याचष्टेक्रिययेत्यादिनाननुक्रि
यामपिलोककर्मत्युपचरंतिकिंकर्मकरिष्यसिकांक्रियामितितत्रकर्मणायम
त्तिष्ठेतीत्येवसिद्धंएवमपिकर्त्तव्यंकृत्रिमाकृत्रिमयोःकृत्रिमेकार्यसंप्रत्ययो
भवतिसंदर्शनिप्रार्थनाध्यवसायैरिप्यमा[illegible]त्वात्क्रियापिकृत्रिमंकर्मतथाहिय न
एषमनुष्यःप्रेक्षापूर्वकारीभवतिसबुध्यातावत्किंचिदर्थंपश्यतिदृष्टमीदृशामि
स६ तितंदृष्टंप्रार्थयतेअपिमेइदंस्यादितिततस्तदुपायंपश्यतोक्रियांसपश्यतिअ
स्यापतस्फलमितिततःप्रार्थयतेकथमिदंनिष्पाद्यतामितिततःसाधनानिस
मवधायकर्तुमध्यवस्यतिप्रतीयमानक्रियापेक्षोपिकारकभावोभवत्येवयथा
प्रविशपिंडीमित्यत्रभक्षयेतिगम्यतेभ्रूचकारश्चास्यत्रयतिक्रियापोपपदस्य
चकर्मणिस्थानिनोरतिएवमपिक्रियाग्रहणंकर्तव्यंप्रददातिकर्मत्वात्नि
गर्हतइतिनास्तिकायान्निंदतीत्यर्थःगर्हगल्हकुत्सायाअनुदात्तेत्पुद्वीयतेयु

द्ध विपर्यस्तत्वादपूर्वं निश्चयं करोतीत्यर्थः नश्यति स्वपिति तेत्रप त्वे शेत इति पतिम्नुप
स्कृत्य शेत इत्यर्थः ॥ यदि तर्हि क्रियया सिषेवयिषमाणस्य भवति कटं करोतीत्यादाव
पि प्राप्नोति वचनाद्धि कर्मसंप्रदानसंज्ञयोः पर्यायः स्यात् नैतत्सार्वत्रिकं किंत
र्हि प्रयोगदर्शनवशेन नियतविषयं कर्मणः करणसंज्ञेत्यादिषु तच्छन्दो विषयं
65 सर्वे विधयः छन्दसि विकल्प्यन्त इति यथाप्राप्तमपि प्रयोगो भवति भाष्येतु ददाति
कर्मणेति नाश्रितं। प्रयोगाश्च बहवः अयं मोचरुं निर्वपेत् देवेभ्यो ब्राह्मौदनम
पचत् देवेभ्यो हव्यं वहन्तः छन्दांसि वेदे देवेभ्यो हव्यं मृदायदं गदाश्रुषेवं ब्राह्मन्तः
करस्वैते इत्यादयः तन्मते क्रियया ग्रहणं न कर्तव्यं कथं यच्च संप्रदानत्वमिष्यते
तत्प्रदर्शनादीनां क्रियायाश्च भेदो विवक्ष्यते ततश्च ते राप्यमाना क्रियापि कृत्रिमं
कर्मेति सिद्धं तया सिषेवयिषमाणस्य संप्रदानत्वं यत्तु नेष्यते तत्रान्तेदो विवक्ष्यते २०८
ततश्च ओदनाद्येकफलावच्छेदेन एकीकृतया क्रियया प्राप्यमानस्य कर्मत्वमेव
न विष्यति कटं करोति ओदनं पचतीति गत्यर्थेष्वप्येवं विवक्ष्यते भेदो भेदश्च भेद ग-ा
विवक्षायां ग्रामाय गच्छति अभेदविवक्षायां ग्रामं गच्छतीति प्रयोग इति गत्यर्थ
कर्मणीत्येतदपि न वक्तव्यमिति ॥ ॥ रुच्यौ रुचिना समानार्था रुच्यर्था इति वस्तु

कथनमेतद्विग्रहस्तु रुचिरर्थो येषामिति ते च रुचिना धातुनासमानार्था भवन्ति प्री
यमाण इति प्रीभूत पर्णो इत्यस्मात् ...कादिकास्सकर्मकाल्लमीणि लृ दे वादिकस्त्त
त्रि-दकर्मकः तर्प्यमाण इत्यर्थः अन्यकर्तृक इति योभिलाषस्याश्रयः प्रीयमाणस्त
तोन्यकर्तृक इत्यर्थः कथं पुनरन्याश्रयस्याभिलाषस्यान्यः कर्ता भवति यावता पदा
श्रयं व्यापारं धातुराचष्टे नाचष्टे स कर्ता नेदं कर्तृलक्षणं किंतु स्वातंत्र्यमेव तच्च
कश्चिदास्त्वं कश्चिद्वैवक्षिकं तदत्रमाधुर्यातिशयेन स्वविषयं देवदत्ताश्रयमभिला
षं जनयन्मोदकस्तत्र कर्तेति गीयते न चैवं लक्षणेऽपि प्रसंगः देवदत्तो मोदकमभिल
षतीति अभिधानशक्तिवैचित्र्यादाश्रयकर्तृकोभिलाषो लक्षेर्वाच्यः रुचेस्तु विषय
६ कर्तृकः इष्टश्चायमभिधानप्रकारनियमोन्यत्रापि तद्यथा घटं पश्यतीति दृशेराश्र
यकर्तृकं ज्ञानं वाच्यं कटः प्रकाशत इत्यत्र प्रकाशो विषयकर्तृकं विषय एव हि स्प
ष्टालोकमध्यवर्तित्वादिना सौकार्येण देवदत्ताश्रये ज्ञाने कर्तेति व्यपदिश्यते न तु ज्ञा
नेन कश्चिद[illegible]तिशयो विषये जन्यते कोयं प्रकाशो नाम यं प्राक् धूमाचक्षते भाट्टाः
तत्र कारकश्रेषत्वे नषष्ठीप्रसंगे वचनं अन्ये तु प्रीयमाणं देवदत्तं मोदकः प्रीणा
तीति कर्मसंज्ञां प्राप्तामन्यते अपरे त्वाहुः देवदत्तो रोचयति मोदकमिति हेतुत्वेप्रा

त्तेवचनं देवदत्तं हि प्राप्यरोचते मोदकः न सर्वेनानेकाद्धि प्राप्तानि इति एवमुत्तरेष्वपि
रुच्य३ योगेषु द्रष्टव्यं उक्तं च हेतुत्वे कर्मसंज्ञा योऽशेषत्वे वापि कारकं रुच्यर्थादिषु शास्त्रेण सं रु२
प्रदानार्थमुच्यते इति हेतुकर्मसंज्ञावदधिकरणसंज्ञापि बाध्येतेति भावः किं चज्ञी
ज्ञा प्समाण ग्रहणादीदित्यो रोचत इति दीप्तिवाचिनाम ग्रहणं ॥ ॥श्लाघ॥ ॥ज्ञीप्स्यमान इ
ति मारणतोषणनिशामनेषु ज्ञा इति घटादिषु पठ्यते तस्मान्निशामनेर्थे हेतुमति
66 विसन् आप्तज्ञप्यृधामीत् अत्र लोपोभ्यासस्येति कर्मणि लटः शानच् आदेशः निशा
मनं च ज्ञानमात्रमुच्यते न चक्षुर्विज्ञानमेव पदार्थबोधयितुमभिप्रेत इति कथं
तर्हि प्रयुज्यते तत् ज्ञापयत्याचार्यः विज्ञापनात्तत्तेषु सिद्धिमेतीति तस्मान्निशाम
नेष्विति पाठः चोतनत्करणोत्सुकः संज्ञापितः पशुरित्युपपद्यते ज्ञीप्स्यमानः ज्ञा
पयितुमिष्यमाण इति च प्रयोगो ज्ञपमिच्चेति चुरादिणिजन्तस्य अन्ये तु मितां ह्र
स्व इत्यत्र वा चित्तविरागे इत्यतो वेत्यनुवृत्तेर्व्यवस्थित विभाषा विज्ञानार्थानि ह्ये
विषये ह्रस्वाभावमाहुः देवदत्तं प्रति श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमि ९७
च्छतीत्यर्थ इति श्लाघास्तुतिः प्रत्यक्षेण देवदत्तं स्तौतीति यावत् एवं हि तां देवदत्तः
शक्यते ज्ञपयितुं अन्ये त्वाहुः देवदत्तायात्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति।

तथा च त्वद्दिकार्थं श्लाघमानः परस्त्रीभ्यस्तत्रागाड्डाहृतसाधिप इति आत्मानं श्लाघ्यं
प न स्त्रीभ्यः कथयन्नित्यर्थ इति एवं देवदत्ताय ह्नुत इति ह्नुङ् अपनयने देवदत्तं प्रति ह्नु-
वानस्तां ह्नुतिं तमेव ज्ञपयन्तुमिच्छतीत्यर्थः [illegible] इत्येष एवं शब्दार्थः निह्नुतिरपलापः सं-
निह्नुतमेव देवदत्तं धनिकादेरपलपयतीत्यर्थः अन्येषु तु ज्ञातव्यं देवदत्तं ज्ञपय-
तीत्यर्थ इत्याहुः देवदत्ताय तिष्ठत इति इ[illegible]वोहमिति देवदत्तस्य स्थानेन प्रकाशय-
तीत्यर्थः देवदत्ताय शपत इति शपथेन किं विप्रकाशयतीत्यर्थः देवदत्तं श्लाघमान तद्दीनाद्वी स्पर्ध
इति वचनात्कर्मसंज्ञैव बाध्यते न कर्तृसंज्ञेत्यर्थः एवं शाटिकयोः श्लाघते सभाया-
मिति करणाधिकरणसंज्ञेन बाध्येते क्वचित्तु देवदत्तं श्लाघत इति पाठः तत्रायं भा-
वः यस्मा याख्यायते स ज्ञीप्स्यमान इत्याख्यायमानाद्वितीयैव न्याय्येति ये त्वाख्याय-
मानं ज्ञीप्स्यमानं वदन्ति तेषां यस्मा याख्यायते ततः षष्ठी भवति देवदत्ताय श्लाघते
यज्ञदत्तो विष्णुमित्रस्येति ॥ ॥धारे॥ उत्तमर्णं पश्येति उत्तममुत्कृष्टं उत्कृष्टार्थवित्ते-
रुद्धत्वात्तमपि इत्यपकर्षत्वादामभावः अन्तैः ऋः ऋणं ऋणमाधमर्णे इत्यत्र का-
लान्तरदेयविनिमयोपलक्षणार्थमाधमर्ण्ये ऋणमिति उत्तमर्णे पूर्णत्वं भवति। न २
तत्र बहुव्रीहौ निष्ठापूर्वनिपाते जातिकालसुखादिभ्यः परवचनमिति सुखादेरा-
पाः

इ. इतिगणत्वादस्मादेवनिपातनाद्वा आणाराद्वस्यपरनिपातः घातं धारयतीतिध
र्म अवस्थानेध्रियमाणंस्वरूपेणावतिष्ठमानंस्वसत्तावादप्रच्यवमानंघातंप्रयुङ्क्ते
तिणिच् ग्राममिति ननु अत्रैपरत्वादधिकरणसंज्ञैव भविष्यति उत्तमर्णे पितरि स्वं हेतु ३
ज्ञास्यात् ॥ ॥स्पृहे॥ चुरादावदन्तः पठ्यत इति तेन स्पृहयतीत्यत्राल्लोपस्यस्थानिवद्भावा
ल्लघूपधगुणो न भवतीति भावः ईप्सितइतिमितिबुद्धीत्यादिना वर्तमाने क्तः ईप्सित
मात्र इयं संज्ञा प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञैव भवति पुष्पाणि स्पृहयतीतिय
दा त्वीप्सितमीप्सिततमं वा शेषत्वेन विवक्ष्यते तदा षष्ठी भवति ॥ ॥क्रुध॥ युक्तोष्वितिक्रो
षा धाद्याचारादि पुद्रो विस्फुरणमिति दत्तादि दोषाध्यास इत्यर्थः तत्र क्रुधद्रुहावकर्मकौ
67 विति कारकशेषत्वात् न रस्य प्रणोतीतिवत् षष्ठ्यां प्राप्तायां वचनं इतरयोस्तु स
कर्मकत्वाद्द्वितीयायां प्राप्तायां वचनं अत्र च चित्तदोषरूपत्वे यद्यपि क्रोधादीनाम
विशिष्टं तथाप्यन्येषामेवं जातीकानां द्वेषादीनां अग्रहणार्थं भवान्तरभेदविवक्षा
यां प्रयोगमेनिर्दिष्टान् न तु चित्तदोषार्थानामिति तेनास्मान् द्वेष्टीत्यत्र न भवति अ १८
नस्तिनं दनं हुस्योर्थः तथा चाचेतनेष्वपि प्रयुज्यते औषधं द्वेष्टीति कथं पुनरके
न कुपितो भवेत् क्रुधादयः शाक्याविज्ञातुमतआह क्रोधस्तावदित्यादि। भाषायामी

नी प दोषपि

तीति अत्र केवलं परैर्दृश्यमानां सार्यां न द्यामतेन तु तां प्रति कोपः ॥ ॥क्रुधद्रुहोः॥ उपसर्गे
णसंबद्धयोरिति उपसर्गाः क्रियायोगे उपसृज्जतीत्युपसर्गाः पचाद्यचि न्यंक्वादित्वा
त्कुत्वं तेन उपसृष्टयोरित्युपस्योपसर्गेण संबद्धयोरित्यर्थो भवति स्वनिकायप्रसि
रव द्धिर्वा॥ ॥राधी॥ यस्येति कर्मणि षष्ठी यद्विविधं पृच्छतीत्यर्थः यत्संबंधीत्यादितत्संबंधि
नः शुभाशुभस्य विप्रश्नः तस्य विप्रश्न इति भावः राध्यतीति राधेरकर्मकाद्धातोरेवे
ति दिवादेः पद्यते तत्र रद्धाविति उपलक्षणं अकर्मकादिति वचनाद्धावकर्मके वा
व्यत्तिवारात् एवकारस्तस्मिन्न क्रमः राधेरकर्मकादेव श्यन् भवति यथा रद्धावि
तितेन सत्यप्येवकारे पर्यालोचने स्यच्न्निरविरुद्धा तत्र धात्वर्थे नोपसर्गो ग्रहात्मी
वतीत्यादिवद्धातोः कर्मकत्वमविरुद्धं निमित्तवेदीनैमित्तिकउत्सादिषु वसंतादिषु वा क्ष्या
निमित्तशब्दो दृष्टव्यः यस्य ग्रहणमनर्थकं यं प्रीतीत्येवं तत्र यं प्रति विप्रश्न इत्यनेन
चेत्किं नाम विवक्षितं न सिध्यति॥ ॥प्रत्याङ्॥ द्विवचननिर्देशात् प्रत्येकमुपसर्ग च
संबंध इत्याह प्रति पूर्वस्याङ् पूर्वस्य चेति कः पुनरत्र पूर्वो व्यापार इत्याह प्रति
आङ् पूर्वस्येत्यादि परेण प्रयुक्तस्येति इदं मे देहीत्येवं प्रवृत्तिनिस्येत्यर्थः पूर्वस्याः
क्रियाया इति सूत्रे तु व्यापाररूपविवक्षायां पूर्वस्येति निर्देशः तत्र हेतुसंज्ञायां

प्राज्ञायां देवदत्तेन प्रतिशृणोतीति प्रयोगवृत्तये वचनमित्याहुः विवक्षांतरे च देव
दत्तो गां प्रतिश्रावयतीति भवत्येव ॥ ॥ अनुप्रति ॥ पूर्वेणासादृच पदि द्राणि प्रत्येक
मुपसर्गसंबंध इत्याहानुपूर्वस्य प्रतिपूर्वस्य चेति कः पुनरत्र पूर्वो व्यापार इत्या
ह होता प्रथममित्यादि अन्य इति अध्वर्युः कथं पुनस्तौ पते अनुपूर्वो गृणातिः शं
सितुः प्रोत्साहने वर्त्तते इत्याहानुगरः प्रतिगर इत्यादि अनुगीर्यते प्रोत्साह्य
ते येन शब्देन सोनुगरः एवं प्रतिगरः ओथामोदैवेत्येवमादिकः शब्दः तेन हि
प्रतिगीर्यते ॥ ॥ साधक ॥ षिधु संराद्धावित्यस्य हेतुमत्यं तस्य सिध्यतेरपार लौकिक
इत्याल्वे राध साध संसिद्धावित्यस्य वा णिं तस्य साधक शब्दः क्रियात्मक स्वार्थः प्रयो
ज्यः कर्त्ता सिध्यतेः साध्यतो वा क्रियात्मनोर्थस्य प्रयोजकतमं साधकतमं नानुसा
मग्र्यधीना कार्यसिद्धिः नो खलु काष्ठादीनामोपायेपि क्रियानिष्पद्यते तस्मिन्नपेक्षः
कारकाणां मध्ये एकस्यातिशययोगः स्यात् उच्यते दात्रादेः छेद इत्यानुप्रवे
शो व्यापारः काष्टादेः पाके प्रज्वलनजनितोग्नेः स्पर्शानुप्रवेशः तदनंतरमे
व च क्रियासिद्धिः न चैवं कारकांतरे प्यनुप्रवेशः तद्व्यापारानंतरं वा क्रियानि
ष्पत्तिः समस्ति अतः क्रियायाः फलनिष्पत्तिः पद्व्यापारादनंतरं विवक्ष्यते य

द्वि३ व्या०२

दातत्रकरणत्वं तदास्य तं विवक्ष्यत इत्यनेनैतद्दर्शयति देवदत्तकाष्ठावृक्षादिना देवदत्तो
न यस्य क्रियोत्पत्त्युपयोगातिशायेन व्यापारः तथा सोऽहं मे नैव विवक्ष्यते तदा तस्य करण
त्वं भवतीति तथा स्थाल्या अधिकरणत्वेन प्रसिद्धायास्तस्या अपि प्रतनुतरकपालतया प्र
कर्षविवक्षायां करणत्वं भवति स्थाल्या ओदनं पच्यत इति उक्तं च वस्तुतस्तदा निर्देश्यं
न हि वस्तु व्यवस्थितं स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति न चैवं कर्तुरपि क
रणत्वविवक्षाप्रसंगः तन्न जातीयत्वात् सकलसाधनविनियोगकारी स्वल्प सौन
च्यते धनो निष्क धनेन सहस्पर्द्धते कथं तर्हि अश्वेन दीपिकया रथेन संचरत इति
बहूनां करणत्वं यावता तेषु पि यथासन्नोपकारकं तदेव करणं युक्तं । उच्यते का
रकान्तरापेक्षा करणस्यातिशायो न स्वकक्ष्यायां तेन सर्वेषां क्रियानिष्पत्तौ सन्नि
पत्योपकारकत्वात् सिद्धं करणत्वं तमपग्रहणं किमिति कारकाधिकारात् सिद्धे का
रकत्वे पुनः साधकस्मृतिः प्रकर्षार्था भविष्यतीति प्रश्नः गंगायां घोष इति असति
तमपग्रहणे कआरोप्यापि य ग्रा आधारात्माव्याप्तौ भवत्याधेयेनतेने हे वस्यात्तत्तिले
षु तैलं दध्नि सर्पिरिति गंगायां घोष इत्यत्र तु न स्यात् तमपग्रहणं तु ज्ञापयति इह
प्रकरणे सामर्थ्यगम्य प्रकर्षो नाश्रीयत इति तेनात्रापि भवति यदा चदेत्राधर्मो घ

पथ्या

व्या०३

षंज्ञस्याधार भावः स्यौतस्तु पर्चर्यते तदेदं तमग्रहणस्य प्रयोजनं यदा तु गंगात्रा बुद्धस्तीरे वर्त्त
ते तदा न प्रयोजनं आधेयेन व्याप्यमानत्वात् मुख्य एवाधारत्वावद् इति॥ ॥दिवः॥ ननु च
अक्षान्दीव्यतीत्यत्र पातयतीत्यर्थः तत्र कर्मत्वं सिद्धं अक्षैर्दीव्यतीति क्रीडतीत्यर्थः तत्र
करणत्वं सिद्धं किमर्थमिदमित्याशंक्याह पूर्वेणाकरणसंज्ञायामिति अक्षैः क्रीडती
69 त्यस्यामेव विवक्षायामक्षान्दीव्यतीतीष्यते अत्र च करणसंज्ञैव प्राप्नोति अक्षैक्षान्पा
तयतीत्यत्र चार्थेऽक्षैर्दीव्यतीति नेष्यते अतः साधकतमस्यैव करणसंज्ञायां प्राप्ता
यामयमारंभ इत्यर्थः अथ किमर्थं चकारः करणसंज्ञापि यथा स्यादिति नैतद
स्तिप्रयोजनं वक्ष्यमाणमन्यतरस्यां ग्रहणमिहैव करिष्यामि तत्राह चकारात्क
रणसंज्ञेति युगपदेवेति भावः अन्यतरस्यां ग्रहणे तु पर्यायः स्यात् यदा कर्म न त 200
दा करणं यदा करणं न तदा कर्म चकारात्तु युगपदेव संज्ञाद्वयं भवतीत्यर्थः योग
पदोप्रयोजनं मनसादीव्यतीत्यत्र कर्मत्वाद्धण् प्रत्ययः करणत्वाच्च तृतीया मनसः
संज्ञायामित्यलुक् मनसादेवः इह चाक्षैर्देवयते देवदत्तो यज्ञदत्तेनेति तृतीयाप्र
योगेपि धातोः सकर्मकत्वात् गतिबुद्धीत्यादिना ऽणौ कर्तावस्थायां कर्तुर्यज्ञदत्तस्य क
र्मसंज्ञा न भवति अणावकर्मकादिति परस्मैपदं च यदा तर्हि समावेशः अक्षान्दी

व्यतीत्यत्र परत्वा त्तृतीया प्राप्नोति पर्यायेतु नायं दोषः। कर्मसंज्ञापक्षेकरणसंज्ञाया
असंभावात् समावेशे तु करणसंज्ञाया अवकाशः विदेवना अक्षाः करणाधिकरण
योश्चेति ल्युट् कर्मसंज्ञाया अवकाशः दीव्यते अक्षाः भावकर्मणोरिति यगात्मनेपदे।
अक्षानित्यत्र तु भयसंज्ञाकार्यप्रसंगे परत्वात् तृतीया स्यात् नैष दोषः कार्यकाले सं
ज्ञापरिभाषेति तस्य कर्मणि द्वितीयेत्यत्र यदस्योपस्थानं तदनवकाशमिति द्वितीया
सविष्यति अयं तर्हि समावेशो दोषः दीव्यतेऽक्षाइति कर्मणएव सिद्धितेपि करणस्या
नुक्ति सिद्धित्वा त्तृतीया स्यात् तथाविदेवनाअक्षाइति ल्युटा करणस्याभिधानेपि क
र्मणोनभिधाना द्वितीया स्यात् नैष दोषः एकैव कारकशक्तिः संज्ञाद्वयोपयोगि
नीतत [illegible] स्वैकस्मिन्कारके सिद्धिते कारकांतरमप्युक्तिसिद्धितमेवंशा
क्तेरेकत्वात्॥ ॥परिक्र॥ परिक्रयणशब्दे धातुगतमेव रेफमाश्रित्य रषाभ्यामिति
णत्वं प्रयमोपनिपातित्वाघयो पसर्गाभावे क्रयणमिति नत्वपसर्गस्थमाश्रित्य।
कृत्यचइत्यनेन तस्यपश्चादुपनिपातित्वेन बहिरंगत्वात् हेतनादिनेति वेतनं भृतिः।
नियतकालत्वमेवस्पष्टयति नात्यंतिकः क्रय एवेति परिशब्दः सामीप्यद्योत
पति क्रयोनामात्यंतिकं स्वीकरणं नियतकालं तु तस्य समीपमेवेति परिशब्द

स्यार्थः ॥ ॥आधारो॥ आध्रीयंतेस्मिन्क्रिया इत्याधार इति अध्यायन्यायेत्यादिनाधिकर
णो घञ् क्रियापेक्षत्वात्कारकभावस्य क्रियाग्रहणं यदि क्रियाधारस्याधिकरणसं
ज्ञा कर्तृकर्मणोरेव स्यात् कर्तृस्था हि क्रिया भवति कर्मस्था वा कर्तृसंज्ञायाः कोव
काशः ये कर्मस्थक्रियाः पचत्योदनं देवदत्त इति न च त्राप्यधिश्रयणदेशाधारः
70 कर्त्तेति स्यादेव प्रसंगः अयं तर्ह्यवकाशो देवदत्ताय रोचते मोदक इति उक्तं ह्यत्र दे
वदत्तस्थस्याभिलाषस्य मोदकः कर्त्तेति अथापानवकाशा कर्तृसंज्ञा एवमपि प
र्यायः स्यात् । अथ कर्मसंज्ञायाः कोवकाशः ये कर्तृस्थक्रियाः आदित्यं पश्यतीति अतः
कर्तृकर्मणोरेवाधिकरणसंज्ञाप्रसंग इत्यत आह कर्तृकर्मणोरित्यादि कथं पु
नः साक्षात्क्रियाधारे भवति क्रियाधारभूतकर्तृकर्मव्यवधानेन क्रियाधारस्य
गौणस्य ग्रहणं शक्यं विज्ञातुं करणसंज्ञायां तमप्ग्रहणेन ज्ञापितमेतत् यथा २०१
कथंचित् क्रियाधारस्याधिकरणसंज्ञा भवतीति मुख्यस्यापि तु कस्मान्न भवतीति
तावत्तदपि न परत्वात्कर्तृकर्मसंज्ञाभ्यां बाधितत्वादिति गतमेतत् आस्ते इति क
र्तृस्थायाः क्रियाया उदाहरणं पचतीति कर्मस्थायाः त्रिविधं चैतदधिकरणं
औपश्लेषिकं वैषयिकं अभिव्यापकं चेति कटे आस्ते गुरौ वसतीति तिलेषु तैल

मिति॥ ॥अन्ति॥ नेरल्यानर्न्तरस्यापूर्वनिपातादन्तिनिचिन्हादूतिसमुदायानुकरणंमित्यादा
प निपूर्वस्येति अन्यथा न्तिपूर्वस्य निपूर्वस्यचेतिब्रूयात्॥ ॥उपा॥ वसेरर्स्यैर्थस्येतिअ
र्थश्चाब्दोनिवृत्तिनिवनः अधिकरणेषष्ठ्यौ अर्स्येर्थस्ययोवाचकस्तस्येत्यर्थः भोजननि
वृत्तिवाचिनइतियावत् यद्वाशीङोर्थः स्यर्थः। तदर्थस्यअस्ख्वाभार्थस्येत्यर्थः स्वाने
दिशीङ्वृत्तेजल्पाश्चायइतियथातेनग्रामेतिष्ठतीत्यत्रार्थेग्राममुपवसतीतिअर्
स्वानार्थत्वेतुग्राममउपवसतीतिसवतीतिसतर्हि प्रतिषेधोवक्तव्यः न वक्तव्यः नो
चोपपूर्वस्यवसेः ग्रामोधिकरणं। किंतर्हि नुपसर्गस्यग्रामेत्यसौवसन्त्रिरात्रमुप
वसतिएतदुक्तं सवतिविशिष्टाधारावस्थितत्वेननिश्चितेदेवदत्तेभोजननिवृत्तिविशि एं
कालप्रतिपादयितुमिदं प्रयुज्यतेग्राममउपवसतीतितत्रांतरंगत्वात्सतीयमानोवसितिक्रि
यापेक्षोग्रामस्याधिकरणभावः उपवसनंतुस्वरूपेणेवकालमपेक्षतइतिकाले
नैवांतरंगः संबंधोग्रामादिनातुबहिरंगइत्यप्रयुक्तमपित्रिरात्रादिकर्मत्वतीति॥
॥कर्तुः॥ कर्तुः क्रियपेत्यादिकर्तुर्यदाप्तुमिष्टतममित्यन्वयः कर्तुरितिचेप्सितापेक्षया
तस्यचवर्त्तमानइतिकर्त्तरिषष्ठी ईप्सितइतिमति बुद्धीत्यादिनावर्त्तमानेक्तः क्रियपेति
करणेतृतीयाकर्त्रादिनामयः क्रियामनुतिष्ठतितेनकर्तुर्यदिष्टतममित्युक्ते पत्रि

यावेत्रादसौकर्त्तासंपद्यतेतयाकरणभूतयेतिगम्यतेकर्त्रीयदाप्नुमिष्यतेआत्मी
ययाक्रिययेत्यर्थः ईप्सिततरशब्दोयमस्यन्तिप्रेतेरूढः ईप्सितोन्तिप्रेतइतिअस्तिक्रि
याशब्दः आप्लृव्याप्तौसन्आपज्ञप्यधामीत्आप्तुमिष्टः ईप्सितइतितत्रक्रियाशब्द
स्यैदंग्रहणमितिदर्शितंआप्तुमिष्टतममितिकर्मणइतिअश्वस्यसदृशस्तृणलवि
71 ययाभाषान्आप्तुमिच्छतियद्येवंयथाश्वस्यवस्तोतोस्तृणाकर्तृत्वेसत्यपिसंप्रति
बंधनंप्रतिकर्मत्वेनविवक्षितत्वादकर्तृत्वाभाषाणांकर्मसंज्ञानस्तवतितथासा
र्थोहीयतइत्यत्रापिहीयमानंसार्थेजहातीतिवस्तुवत्तेनस्योगेनकर्तुरपिसार्थ
स्यसंप्रत्यपादानरूपेणविवक्षितत्वादकर्तृत्वात्कर्मणोपगात्मनेपदेनस्यात्तो
अत्राहुः कर्मकर्त्तर्यत्रयगात्मनेपदेकथंजहातिरपगमनार्थेवर्त्ततेदेवदत्तंसा
र्थोजहातिअपगमयतीत्यर्थः एषैवसार्थस्यापगमनायंतद्धेतुहुपाघातादिना ३
देवदत्तस्यापगमेतस्मात्थाविरणांयदातुद्युदादिनास्वयमेवापगच्छतितदाक 202
र्मकर्तृत्वंतदायंप्रयोगः ततश्चहीयतइतिकोर्थः स्वयमेवापगच्छतीतिपुनःकुतो
हीयतइत्यपेक्षायांसार्थेनसंबंधइतितमपग्रहणंकिमितिईप्सिततमस्यापि
ईप्सितत्वसंभवादुदाहरणसिद्धिंमन्यतेपयसोदनंभुंक्तइतिकरणसंज्ञानुदा

त्रेण लुनातीत्यादौ सा व काष्ठानां हि दात्रं लवनेन ईप्सितं तथा युक्तमित्यनेनापि न स
वति द्वेष्यौदासीन्यप्राप्ययोस्तत्र ग्रहणात् सत्यपि पयसो भुजिक्रियायां प्रकृष्टोपका
रकत्वे ईप्सायां प्रकर्षाभावः यत्र तद्धि पय एवेप्सिततमं तत्र प्राप्नोतीति यथा कश्चित्
वि कंचिदाह सि ... भुज्यतामिति स आह प्रत्युत भुक्तमस्मात् सिरिष्टं ... इतर आह पयो भ
विष्यतीति अपरस्त्वद्रमाण आह पयसा खलु भुञ्जीयेति अत्र प्राधान्याप्राधान्यविवेकेन प
यस एवेप्सिततमत्वं न त्वोदनस्य अत्राप्योदन एवेप्सिततमः पयसस्तु संस्कारक
त्वात् करणत्वं न ह्ययं केवले गुण आदरः किं तर्हि संस्कृते ओदने न ह्ययं केवलस्य
पयसः पानेन संतुष्यति यदि तमयं रूपं तृप्यते पयसौदनं भुङ्क्ते इत्यत्रैव स्यात् पयस्यो
दनमित्यादौ न स्यात् न हीप्सिततमं युक्तमसति प्रतियोगिनि वस्तु यत्तु ल्यजातीयं
तदेव प्रतियोगितां भजते कारकं वा न किंचिद् दृष्टमीप्सितं पयसस्त्वीप्स्यमानत्वा
द्युज्यते प्रतियोगिता नैष दोषः अत्रापि क्रियापेक्षः प्रकर्ष आदौ हि कर्ता फलार्थं
क्रियामीप्सति अतः फलार्थमिष्यमाणत्वादीप्सिता क्रियाफलं तु स्वरूपेणेष्य
माणमीप्सिततमं क्रियाया अपि कर्मत्वं संदर्शनादि विशेषांतरस्पर्द्धया यत्र त
द्धि फलाभावस्तत्र न स्यात् क च फलाभावः विकार्ये काष्ठानि भस्मी करोतीति न हि

काष्ठानि फलरूपाणि भान्तवंस्तानि स्वरूपेण फलानि सम्भमनातु फलानि प्राप्येन हि न
स्यात् आदित्यं पश्यति हिमवंतं शृणोतीति नह्यत्र क्रिया कश्चिदतिशयो जन्यते अ
त्राप्यतिशयो जन्यते प्राकृतो नाम यो हि यं पश्यति शृणोति वा तस्यासौ प्रकटो भवति ।
न प्रतिपच्चे व्यतिरिक्तपुरुषापेक्षया तु विशेषो नास्तीत्युच्यते यद्वा तम गुरुणेन यत्राप
कृष्टेद्धातद्वेव्यावर्त्यते तेन पश्यत्यादावादित्यादीनामपि प्रतियोगिनो । सत्वेनाप
72. कर्षाभावात् भविष्यति अत्र च लिंगं ललाटकुकुट्यो पश्यतीति कर्मण्यनुवर्त्तमाने इ
ति अधिशीङ्स्थासामित्यत आधारनिवृत्त्यर्थमिति प्रवृत्तं कर्म यद्गुणमाधारेण सं
बद्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यादिति भावः । आधारानुवृत्तौ को दोषः तत्रा
ह आधारस्यैव हि स्यादिति वेत्याह गेहमित्यादि यत्र तु न स्यात् तदाह ओदनं पचती
त्यादि एतच्च ईप्सिततमं कर्म त्रिविधं निर्वर्त्यं विकार्यं प्राप्यमिति तथा युक्तं द्विविधं द्वे २०३
ष्यमितरच्च अकथितं चेत्यपरं संज्ञांतरप्रसंगे चान्यत् तदिवः कर्म चेत्यादि तदेवं स
प्तविधं कर्म उक्तं च निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतं तत्रेप्सिततमं कर्म च
तुर्द्धान्यत्तु कल्पितं । औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं । संज्ञांतरैरना
ख्यातं यद्यच्चान्यपूर्वकमिति तथा पदसंज्ञा यतेस द्वाजन्मनायत्र प्रकारातेतान्हि

प्य

र्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितं। प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत्। किंचिद्
गुणांतरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते दर्शना
दनुमानाद्वा तत्प्राप्यमिति कथ्यते इति तत्र निर्वर्त्यं घटं करोतीति व्याप्तिरस्ति प्रायेण जन्मसा
मान्यात्तु प्रायेण प्रकारान्तरेण ननु यदि घटो न कर्तव्यः कर्त्तव्यो न घट इत्यनुपपन्नं घटं क
रोतीति नैष दोषः तथाविधं वस्तु करोति यस्य निष्पन्नस्य घट इति संज्ञेत्ययमत्रार्थः
एवमोदनं पचतीत्यादावपि विकार्यं काष्ठानि भस्मीकरोति सुवर्णं कुण्डलं करोति।
प्राप्यं आदित्यं पश्यतीति न ह्यत्र प्रत्यक्षेणानुमानेन वा क्रियया जन्यः कश्चिदति
शयो दृश्यते यथा निर्वर्त्यविकार्ययोः रज्जुं सृजति काष्ठं दहति देवदत्तं शोषयती
ति कारककर्म तु प्राप्यस्याभासोपगमादिरिति आदित्योऽप्याभासमुपगच्छति यतो द
श्यते असिव्यक्तिं प्रयाति पुतो व्यक्तमुपलभ्यते सदृतेन दर्शनं यतः शक्यते द्रष्टुं।
तदेवं आभासोपगमो व्यक्तिसौकर्यमिति कर्मणः विशेषाः प्राप्यमाणस्य क्रिया
सिद्धो विवक्षिताः। ॥तथायुक्तं॥ तचेति पृथक्पदं नोपसमस्तं लक्षणाभावात्
चकारोऽवधारणे अनेकार्थत्वान्निपातानां तथेत्यस्यानन्तरं द्रष्टव्यः इत्याह तेनैवेति
ईप्सितादन्यत्सर्वमनीप्सितमिति यथाऽधर्मानृतादिरिति उत्तरपदार्थप्रतिपक्ष

स्यतं पदस्य तस्य निषेधं द्वारेणाभि धीयते तेन येनापीप्सितप्रतिपक्षस्य तद् द्वेष्यमेव ना
न्तिधीयते किं तर्हि अनभ्यालोष्टृद्दत्यादिवदीप्सितव्यतिरिक्तं सर्वमिति सर्वत्रावद्यस्यार्थः।
विषं भक्षय तीति न कस्यापि विषमीप्सितमिति भाव: ननु य एव मनुष्यो व्याध्यादिना
सर्वतः पीडितो मरणमेवङ्गापोमन्यते तस्य विषमीप्सितमेव यो पि गुडादिभ्रान्त्या वि
93 षे प्रवर्त्तते तस्यापि तदीप्सितमेव यद्धि तादृषं गुडादि तद्बुद्धिरेव तत्र वर्त्तते अतो त्रप्र
वृत्ते वसिद्धमित्युदाहरणान्तरोपन्यास: ग्राममगच्छन्निति नात्र वृक्षमूलानीप्सित
तमानि पूर्वमनन्तिसन्निहितत्वात् नान्तरीयकं हि तदुपसर्पणं न च त्रापि यावत् ग्रामं
प्र गच्छन्निति नियुज्यते तावन्नान्तरीयकतान प्रतीयते इति पूर्वेणैव सिद्धं यथा नदीकूलं
कृषतीत्यत्राचेतनत्वादीप्साभाव: पदान्तरसंबंधात्प्रतीयमानो बद्धिरंग सोकर्म
संज्ञान प्रतिबध्नातीति सवत्ययं प्रतिपत्तारं प्रत्युपपादनप्रकार: यस्तु प्रयुंक्ते स पूर्वमे २०४
वेप्सा प्रकर्षाभावं जानन्कथं प्रयुंक्तामिति पूर्वेणासिद्धिरेव प्रवचनदीकूलमित्य
त्रापि अनेनैव संज्ञा तथा यत्र क्रियया मेवता स्यर्थं न फलेनान्तरीयकी तु फलसिद्धि:
तत्राप्यनेनैव सवति अथ क्रियाफलयोगि कर्मेति कस्मान्नोक्तं यदीप्सिततमं यद्वेष्य
मितरद्वा सर्वत्रानुगतमेतत् यदुत क्रियाफलयोगित्वं गन्तुरपि तर्हि कर्मत्वं स्यात् अ
क्रियाफलस्य संयोगस्य तत्राप्यभावात्
७३

यपरसमवेतक्रियाफलयोगीति लक्षणमेवमप्यात्माज्ञातव्योऽत्र न स्यात् संविदस्यस्व
यंप्रकाशायामस्मिमतायाः कर्मत्वं स्यात् घटमहं जानामीत्यत्र हि त्रितयमवभासते घ
टो ज्ञानमात्मा चेति तत्र ज्ञानं क्रिया तत्फलं शब्दप्रयोगादिरूपो व्यवहारः तेन युज्य
मानस्य घटस्य यथा कर्मत्वं तथात्मनोऽपि स्यात् ज्ञाने हि क्रिया भवति व्यवहार
रूपस्य फलस्याश्रयभूतं तस्यैव ज्ञानस्य यद्रूपं तद्रूपेण तया परः आत्मा तत्र च सम
प वैतीत्यलमि[illegible]ता। चौरात्त्रस्यत्रापि कर्तृका भोवो भिन्नादिरूपेण नुपर्यस्यमानो वा चौरा
नुपसर्पतीति पूर्ववदेव सिद्धं॥ ॥अकथितं च॥ अकथितशब्दो यमस्य प्रधाने रूढः तद्य
था अकथितो हमस्मिन् ग्रामे अप्रधानभूत इति गम्यते अस्ति क्रियाशब्दोऽकीर्तितपर्या
यः कथवाक्यप्रबन्धे चुरादावदन्तः पश्चात्तेतत्र पूर्वस्य यहलोपाणिनाकोस्य पाठ्यगोदो
ग्धि पय इत्यत्र पालिकोस्य पाठ्योरपि स्यात् करणाधिकरणसंज्ञायोस्त्र पञ्चम्यादि
रवकाशः न हि तत्रास्य प्रसंगः दुहियाचीति परिगणनात् तस्माद्वितीयस्य ग्रहणं
तदाहकेनाकथितं अपादानादिभिर्विशेषकथाभिरिति विमतं चेमाणं पदाहक
रणानिर्दिष्टाः स्थ्रि शब्देषु युष्मत्यर्थमेव क्रियोपादीयते न तत्र करणादि संबध्य
ते न हि गच्छतीति गोरीत्य चकेनेति प्रश्नः एतेनेति प्रतिवचनं भवति दूरकारकइत्य
वी

नुवर्त्तनास्त्येवकारकलेऽकथितस्यसंज्ञया भाव्यमितिसामर्थ्याद्विधेरोषकृत्या नि
रित्युक्तं परिगणनं कर्त्तव्यमिति नटस्यशृणोतीत्यादौ धात्वैतरप्रयोगेमाभूत् प्राप्ति
सिद्धीत्यत्र द्वेचेति तुक् प्राप्नोऽनित्यत्वादागमशास्त्रनस्यनहृतः सनाद्यन्ता धातवः
74 इकोयणचीति वत् उपयुज्य तत्र त्वुपयोग इति असंज्ञायामपि कर्मणि णिद्य न्त तस्य
निमित्तं गवादीति अनेन गां दोग्धि पय इत्यादौ पयः प्रवृत्ते रूपयुज्यमानत्वात् ईप्सि
ततमत्वं गवादेः तदर्थत्वादुपादानस्यानीप्सिततमत्वं चेदत्रपि तत्तथायुक्तत्वात्ता
नापि वाच्च गवादेस्तथायुक्तमित्यनेन न भवति एतदेवदर्शयति तस्येत्यमित्यादि उपयुज्य
मानस्य पयः प्रवृत्तेर्यन्निमित्तं गवादि तस्येत्यर्थः पाण्यादिकर्मण्युपयोगनिमित्तमपि
तितेनापि विनाउपयोगस्य पयसोऽसंभवात्तदर्थमाहेतितस्य करणादेः कर्मसंज्ञा
निवृत्त्यर्थमित्यर्थः प्रयोजनवचन एव चार्थशब्दः निर्देश्यमात्ततया तु प्रयोजनत्वं। 204
लुङ् मुख्यस्वरोपचाराः प्रयोजनमितिवदपूर्वविधावितिय त्रान्यो विधिर्नास्तितत्र
त्यर्थः पूर्वग्रहणमन्यमात्रोपलक्षणं तेन वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोरपि
विषयेकर्मसंज्ञा न भवति सूत्रेप्य कथितमिति कथननिवृत्तिपरायां चोदनायां
भूतकालो नविवक्ष्यते तत्र यथा पराजेरसोढ इत्यत्रासहिष्णमापास्यापपादा

णा

७४

न संज्ञा भवति अध्ययनात्पराजेष्यत इति तद्वदत्रापि साधनमिति साधनं हि प्र
धानभूतां क्रियामपेक्ष्य गुणो भवति प्रधानकर्मेति धर्मादि तस्य प्राधान्यं तदर्थ
त्वात्प्रवृत्तेः संबध्यत इति स च तदितिपि स्यार्थकथनमेतत् षष्ठ समवायेस्वरि
ते तत्केचित्तु परस्मैपदिनः सहधातुमेनं पठंति षष्ठसमवायोरपलपव्युत्क्रायां
वाचीति तत् आहुः षष्ठसेचन इत्यस्यानुदात्तेतोनेकार्थत्वाज्ज्ञानं समवाये वृत्तिरि
ति संबध्नातेश्च कर्मव्यापारे सविर्वर्त्तत इति कर्तृपदस्य कर्मणेदेनार्थकथनं नानु
पपन्नं यथा राध्यत्योदन इत्यस्य पच्यत इत्युक्तमित्यादि चरितं मेत्यस्य विवरणस्
त्रकारेणोतिकविरोधो मेधाविमात्रवचनोपि प्रकरणात् सूत्रकारेणात्र युक्त इति
दर्शयति गां दोग्धि पय इति न चात्रायमर्थः गोः पयस्यजति गोदोग्धा गवा पयस्या
ड्यतीति तत्र प्रयोजकव्यापारेणाप्यमानत्वात् सिद्धा गोः कर्मसंज्ञा न च वाच्यं प्र
योजकव्यापारेणाप्यमानस्य यदि भवति गयपादिवेत्युत्तरसूत्रे नियमनानतत्र
प्राप्नोति यथा पचं तं देवदत्तं प्रयुंक्ते पाचयति देवदत्तेनेत्यत्रेति एपं तेष्वेव हि सनि
यमः अयंतु अण्यंतः नैतदस्ति यथा एपं तेषु धातुषु क्रियाविशिष्टस्य प्रयुक्तिः प्र
तीयते गमयतीति नैवमत्र निक्षिपस्यापि गवादेर्दोहनादिषु विनियोगात्तसं

तैर्याह्य दुह्यमानापि गौर्दुह्यते आगच्छंतोपि भासादयः क्षीरस्थानीयं ते तस्माद्दोग्धि इत्ये
कस्यापायवक्रियायाआश्रयणाज्ञोपयसोत्सैंदेन कर्मत्वं न संभवति त्तिविसति प्र
कृत्यं चास्य च प्रत्ययार्थास्य च भेदेन द्विक्रियेवाच्ये इति कर्मसंदोपपत्तिः गमयति ग्रामं
देवदत्तमिति पदार्थपि दुष्टः हारणमर्थः हरति गोः क्षीरं तत्हारयति देवदत्त इति तदा
घ यद्यपि गोरपाये विधिर्भावो वि[illegible]ते तथाप्यविवक्षिते तस्मिन्निमित्तत्वमात्र विव
क्षायामुदाहरणोपपत्तिः एवं चावधित्व विवक्षायामपादानसंज्ञास्त्वेव गौर्दुह्य
75 ते पय इति पदार्थ पयसो विशेषणं गौः तदा षष्ठी गोः पयो दोग्धीति पौरवं गां याचत
इति पुरोरपत्यं पौरवः ननु चाविदितात्रापादानसंज्ञा पौरवाद्ध्यसौ गामादत्ते न या
चनादेवादत्ते याचितोसौ यदि ददाति तत आदत्ते न नु मानामपदितो दि[illegible]ते तावत् ल
तदपि न यतः स्वभावं परिच्छिद्य सुरनादि तु समानोपि याचते ग्राममवरुणद्धि व्रज
मिति न नु च गां व्रजं प्रवेशयतीत्ययमत्रार्थः ततश्च सिद्धं व्रजस्य गोः कर्मत्वं अपव्र २०६
जे ग्राममवस्थापयतीत्यर्थः तर्हि कथितात्राधिकरणसंज्ञा यदा तर्ह्यवरोधनक्रि
यां प्रति निमित्तत्वमात्रं विवक्ष्यते न कर्मत्वं नाधिकरणत्वं तदेदमुदाहरणं व्रजे
न हेतुनास्थापयतीत्यर्थः माणवकं पंथानं पृच्छति इति प्रच्छ ज्ञीप्सायां तुदादिः

ग्रहिज्यादिसंप्रसारणं ननु चाविहिता चापादानसंज्ञा सद्धि तस्मादुपदेशमादत्ते
ननु प्रश्नमात्रमादत्ते प्रष्टो साधु पुपदिशतीति ततआदत्ते मानामादित आदिस्तते ताव
त्तदपि न अनादिसमानोपि स्वभावपरिज्ञानाय प्रवृत्तिसिद्धियो विवक्ष्यस्य: किं
मर्थं पुनर्याचितिस्योरूसपोरूपादानं न ह्यनयोरर्थभेदोस्ति अर्थोप्रियाचेयं संज्ञा
नदुह्यादि वस्तुरूपाश्रया समानार्थोपि विहिग्रह्यते देवदत्तं शतं याच्यते इति उच्य
ते अनुनयार्थस्य याचेर्ग्रहणार्थ्यते नाविनीतं विनयं याचते इत्युद्ध प्रसादं याचते तद्
स्यत्रापि भवति सद्दुपात्तस्य चौरस्य परूपानुपपत्ते सिद्धिरपि गृहीत: वृक्षमव
चिनोति फलानीति यद्यप्यवचिनुवृक्षात्फलान्यादत्त इत्यपादानसंज्ञाया अयं
विषय: तथापि यदा वृक्षो नावधित्वेन विवक्ष्यते निमित्तरूपेण तु विवक्ष्यते तदो
दाहरणं ब्रूते अनुशास्तीति ब्रूञ् व्यक्तायां वाचि शासु अनुशिष्टौ अदादीय
चपच धर्मेण वचनानुशासने कर्मणामावकस्यास्ति प्रेयमाणत्वं तथापि
ददाति कर्मत्वाभावात्संप्रदानसंज्ञाया अप्रसंग: ये तु तत्र ददाति कर्मेति
नाअयंति तेषामपि निमित्तत्वमात्रं विवक्षितं नास्ति प्रेयमाणत्वमित्युदाहरणो
पपत्ति: अथान्येपि द्विकर्मका: नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च द्विकर्म

पानाध्यातूनामु

केषु ग्रहणं उष्टव्यमिति निश्चय: गत्यर्थानामित्युत्तर सूत्रोपलक्षणं नीअजांचयति
ग्रामं सारं वहति ग्रामं चकारेणजय सादय: समुच्चीयंते शातं जयति देवदत्तं शातम
स्मीति देवदत्तं शातं दंडयति देवदत्तं कर्षयति ग्रामं शास्वा इदं विचार्यते द्विकर्मके
स्वोधातुस्व: कर्मणिल्लादयउत्पाद्यमाना: किमीप्सिततमे कर्मणि प्रधाने उत्पद्य
ते आहोस्विदन्ने नयस्य कर्मत्वं तस्मिन्नगुणकर्मणीति तत्रोक्तं प्रधान कर्मण्याख्ये
येलादीनां द्रुर्द्विकर्मणां। अप्रधाने दुहादीनां एयं तेकर्तुश्च कर्मणा इति अयमर्थ:
76 ये द्विकर्मका: धातव: तेषां प्रधाने कर्मणीप्सिततमे वाच्ये लादीनां कृत्यादयो भ
वंतीत्याहु: लादयोलक्षसखलर्था: प्रधानाप्रधानयोर्सन्निकृष्टयो युगपदसि
धानां सं सवे प्रधानस्येबा सिधानं न्याप्यं प्रधानत्वादेवेति भाव: नीयते ग्राममजा
जानेयानीतासु नयावदिउत्पते सारो ग्रामवोढव्य: ऊढ: सुवह: ह्रियते सारो ग्रा
मं हर्त्तव्य: हृत: सुहर: कृष्यते शाखा ग्रामं कृष्ट्वा कृष्टा सुकर्षा अप्रधाने दु
हादीनामिति अत्र दंडिप्रत्तयोपि गृह्यंते न तु दुहियाचीति शास्त्रोक्त पठिता एव 209
एतेषां दुहादीनाम प्रधानेकर्मण्याख्येयेलादीनाहु: एतदपि न्यायसिद्धं य
त: पयोर्थी प्रवर्गवि प्रवर्त्तते अत: सुद्धस्य दुहे गवादिस्ति: संबंध: गो दोहे

ननुपयस इत्यंतरंगत्वात् अकथितकर्मण्यत्रैव लादयो भवंति एवं सर्वत्र दुहि गौ
दुह्यते पयः दोग्धा दुग्धा सुदोहा याचि पौरवो गां याच्यते याच्यः याचितः सुयाचः रु
धि व्रजो ऽवरुध्यते गां अवरोध्यः अवरुद्धः स्ववरोधः प्रच्छि माणवकः पंथानं पृ
च्छ्यते प्रष्टव्यः पृष्टः सुपृच्छः भिक्षि पौरवो गां भिक्ष्यते भिक्षितव्यः भिक्षितः सुभि
क्षः चिञ् वृक्षो ऽवचीयते फलानि अवचेतव्यः अवचितः स्ववचयः ब्रुवि उच्यते माण
वको धर्मं वक्तव्यः उक्तः सुवचः शासि अनुशिष्यते माणवको धर्मं अनुशासि व
तव्यः अनुशिष्टः स्वनुशासः दंडि गर्गाः शतं दंड्याः दंडिताः सुदंडाः जि देवदत्तः ना
ऊेत शतं जीयते जेयः जितः सुजयः मुषि मुष्यते देवदत्तः शतं मोषितव्यः मुषितः सुमोषः)
ण्यन्ते कर्तुश्च कर्मण इति अभिधान इति शेषः अण्यन्तावस्थायां कर्तुर्ण्यन्तावस्थायां
कर्मणः सतो ऽभिधाने लादीनां इत्यर्थः एतदुक्तं भवति ये गत्यर्थादयो ऽण्यंतावस्था
यामपि सकर्मकाः ण्यंतावस्थायां उत्तरसूत्रेण द्विकर्मका जाताः तेषु ण्यंतावस्था
यां यदुत्तरसूत्रेणोपजातं कर्म तत्र लादयो भवंति गत्यर्थः गमयति ग्रामं देवदत्तो
गम्यते ग्रामं देवदत्तः गमयितव्यः गमितः सुगमः बुध्यर्थः बोध्यते माणवको धर्मं
बोधयितव्यः बोधितः सुबोधः प्रत्यवसानार्थः भोज्यते माणवक ओदनं भोजयि

तव्यः भोजितः सुभोजः शब्दकर्म पाठ्यते माणवको वेदं पाठितव्यः पाठितः सुपाठः अ-
कर्मक आस्यते माणवको मासं आसितव्यः आसितः स्वासः बुद्धिप्रत्यवसानार्थ-
शब्दकर्मकेषु गुणकर्मणि लादय इति मतांतरं बोध्यते माणवकं धर्मः भोज्यते मा-
णवकमोदनः पाठ्यते माणवकं वेद इत्यादि तदयमत्र निर्णयः नीवहिहृकृषिस्यः
प्रधाने कर्मणि लादयः तत्संबंधस्य पूर्वभावित्वात् दुह्यादिभ्यो जिदंडिमुषिस्यः चा-
प्रधाने तत्संबंधस्यांतरंगत्वात् बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्मणि प्रधा-
ने वा यचेष्ट गत्यर्थाकर्मकयोर्हृक्रोश्च ण्यंतयोः प्रयोज्ये कर्मणीति प्रयोज्यस्य प्राधा-
न्ये नासिध्यीयमानप्रयोजकव्यापारेण प्यमानत्वात् प्राधान्येपि गुणभूतप्रयोज्य-
व्यापारकर्मणस्तु गुणभावः आर्थेन न्यायेन प्रयोज्यव्यापारस्य प्राधान्यं तदर्थ-
त्वात्प्रयोजकव्यापारस्य तु प्राधान्यात् तत्कर्मणोपि प्राधान्यमित्यन्ये सर्वथा लादयः
प्रयोज्यकर्मणीति स्थितं अकर्मकाणां च धातूनां कालभावाध्वगंदेशाः कर्मसं- २०८
ज्ञा इष्यते उक्तं च कालभावाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणां देशश्चाकर्मकाणां
च कर्मसंज्ञो भवतीति वक्तव्यमिति गंतव्यो ध्वाऽध्वगंतव्यः कडोदिषध्वशब्दोऽध्व-
व्यः गंतव्यत्वेन प्रसिद्धस्य नियतपरिमाणस्य देशादेर्ग्रहणं पंथा गंतव्यग्रहणं ।

गा२

तेनाध्वानं स्वपितीति न भवति ननु कालाध्वनोरिति सिद्धाद्वितीया किं कर्मसंज्ञया।
देशस्य तावद्वक्तव्या। कालाध्वनोरपि ल्यादिविधानार्थं कर्मत्वमेषितव्यं आस्यते मा
सः आसितव्यः आसितः स्यासः एवं चाप्यते क्रोश इत्यादि भावगोदोहमास्ते याव
ताकालेन गोदुह्यते तावन्तं कालमास्त इत्यर्थः गोदोहादीनां मासादिवत् कालत्वे
नाप्रसिद्धत्वात्॥ भावस्य पृथक् ग्रहणं॥ देशा कुरून् स्वपिति। कुरवः सुप्यत इत्या
दि कालाध्वनोरत्यन्तसंयोग इति सूत्रं तु अक्रियासंयोगार्थं मासं गुडधानाः स
र्वरात्रं कल्याणी क्रोशं कुटिला नदी तत्राद्वितीया वक्तव्यं कालभावाध्वगंतव्या इति न व
क्तव्यं नात्रासिरासनमात्रे पर्यवस्यति। किंतु तत्पूर्वके व्यापने वर्तते मासमास्ते को
र्थः मासमासनेन व्याप्नोतीत्यर्थः। एवं सर्वत्र। एवं च कृत्वा सकर्मकेष्वपि काला
दयः कर्म भवंति मासं वेदमधीते मासं वेदाध्ययनेन व्याप्नोतीत्यर्थः अथ कर्तृक
र्मणोः कृतीति षष्ठी द्विकर्मकेषु किं प्रधाने कर्मणि भवति आहोस्विद्गुणे आहोस्विदुभयोः 5
कुभयोरिति ज्ञापकं द्वितीयावत् भाष्यकारवचनाद्गुणकर्मणि विकल्पेन षष्ठी प्र
धानकर्मणि नित्या नेताश्वस्य स्रुघ्नस्य स्रुघ्नमिति वा इहाकथितं कर्मेत्येतावदे
व सूत्रमस्तु मास्तु पूर्वसूत्रद्वयं तद्विषयस्याप्यकथितत्वात्सत्त्वे नटस्य शृ

णो तीत्यत्र मा भूदिति दुह्यादि परिगणनमवश्यं कर्त्तव्यं तस्मिंश्च क्रियमाणे ओद
नं पचति वृक्षमूलान्युपसर्पतीत्यत्र न स्यादिति पूर्वकमपि योगद्वयमारभ्यमिति।
॥ गति ॥ गमयति माणवकं ग्राममिति कथमत्र ग्रामस्य कर्मत्वं यावता कर्तुरीप्सि
ततममित्युच्यते न च माणवकः संप्रति कर्त्ता अनेन कर्मसंज्ञकत्वात् तत्र यथा माषे
ष्वश्वं बध्नातीत्यत्र वस्तुतो भक्षणेनेप्सितानामपि माषाणां कर्मसंज्ञा न भवति
तत्कस्य हेतोः अश्वस्य स प्रत्ययकर्तृत्वात् तद्वदत्रापि न प्राप्नोति मा भूत् लिङ्युत्पन्ने
७४ माणवकः कर्त्ता प्राक् तु तस्य दुःसन्तेः प्रकृत्यर्थे कर्त्ता भवति तदानीमेव च ग्राम
स्याप्तिसंबन्धः ग्रामकर्मकश्चासौ गमनेऽपेक्ष्यते यावद्गच्छति अतो यस्यामवस्था
यां ग्रामस्य कर्मत्वं न तस्यां माणवकस्य कर्मत्वं यस्यां चावस्थायां माणवकस्य
कर्मत्वं न तस्यां ग्रामस्य कर्मत्वं पूर्वप्रवृत्तत्वात् माषेष्वश्वमित्यत्र तु नैवं संभवति। २०१
यापयतीति याप्रापणे इति अत्र प्राप्त्यागतिर्लक्ष्यते इति यातिर्गत्यर्थः नीवह्योरि
ति नन्वेतयोर्गतिफलं प्रापणमर्थः न गतिहिंसार्थेभ्य इत्यत्र च सार्थं न वह्नेः र्ग
त्यर्थ इति सत्यं गुणभावेनापि तावद् गतिः प्रतीयते इति मुख्यात्वतिषेध उक्तः व
हेरत्र नियन्तृकर्तृकस्येति वक्ष्यामीति चोपक्षेपः वाहयति पवान्बलीवर्दी र्द

नितिअत्राणौ बलीवर्दाः कर्त्तारः एवं ते तु नियंता सारथिः कर्त्तेति तत्र वृत्तौ व्रतिषे
धाद्विधिरेव भवति बुद्ध्यर्थेग्रहणेन ज्ञानमात्रवाचिनामेव ग्रहणे न तद्विशेषवाचि
नां स्मरत्यादीनामिति आहुः वृत्तौ वृपितथैवोदाहृतं आदिखाद्योरिति अपर आ
ह सर्वमेव प्रत्यवसानार्थं कार्यमदेर्न भवति नाव्यप्रमियमेव कर्मसंज्ञेति निग
रणचरलार्थेभ्यश्चेति परस्मैपदमपि न भवति इदमेकमिष्यते क्तोधिकरणे च ध्रौव्य
गतिप्रत्यवसानार्थेभ्य इदमेषां जग्धमादितमिति भक्षेरिति गत्यर्थादिषु ज्ञापयेण
हनु मतमिच्छो विधिरिति प्रतिषेधोपि प्रत्यासत्तेस्तस्यैव न्याय्य इति चुरादिणिजंतो
प्य एपं तरवेति सहो प्राप्तिः भक्षयति बलीवर्दाः सस्यमिति हो त्रसानां यवानां
छिद्यमानानां हिंसा भवति तस्यामवस्थायां केचिच्चैतन्याभ्युपगमास्थामिनो वा
हिंसा इष्टव्या इह कर्मशब्देन कश्चिन्नियागृह्यते यथा कर्त्तरि कर्मव्यतिहार इति
कृत्रिसाधनकर्मत्वं शब्दकर्मण इति इह तु शब्दक्रियाणामिति चेत् ह्वयत्यादी
नां प्रतिषेधः ह्वयति पुत्रं देवदत्तः ह्वाययति पुत्रं देवदत्तेन क्रंदति पुत्रं देवदत्तः
क्रंदयति पुत्रं देवदत्तेन शब्दायति देवदत्तः शब्दापयति देवदत्तेन अकर्मकत्वा
दप्यत्र प्रसंगः शब्दरैः हुणस्यकर्मणोंतर्भावात् कर्मांतरायोगाच्च स्मरणे

तेश्चोपसंख्यानमशब्दक्रियत्वात् शृणोति श्लोकं देवदत्तः श्रावयति श्लोकं देवदत्तं।
न च बुद्ध्यर्थत्वादत्र सिद्धं चेन्न स्यादयो हि ज्ञानमात्रवचनाः बुध्यर्थाः अस्तु तर्हि सा
धनकर्मणो ग्रहणं शब्दकर्मण इति चेन्न जल्पप्रभृतीनामुपसंख्यानं जल्पति पु
त्रं देवदत्तः जल्पयति विलापयति पुत्रं देवदत्तं आभाषते पुत्रं देवदत्तः आभाषय
ति पुत्रं देवदत्तं दृशेः सर्वत्रोपपद्येत क्रियाग्रहणं अथापि साधनग्रहणं अथा
प्युभयग्रहणं सर्वथा दृशेरुपसंख्यानं पश्यति रूपतर्कः कार्षापणं दर्शयति रूप
तर्कं कार्षापणं यदाचार्य दृशिः चक्षुःसाधनके ज्ञानविशेषे वर्त्तते तदैवं वक्तव्यो ज्ञा
नमात्रवचने तु बुद्ध्यर्थत्वादेव सिद्धं तदेवमुभयोरपि पक्षयोः दोषाभासं न चान्य वत्वात्
तरः पक्षो निरणापि वृत्तिकारस्त्वये शब्दक्रियाः शब्दसाधनकर्माणश्चैतान
विवादसिद्धानुदाहरति अधीते इत्यादि अध्यापयतीति क्रीङ्जीनां णेरि
त्यात्वं अत्ति क्रीसादिना पुरूनिर्णयस्त्व साधनकर्मणो ग्रहणं कर्मग्रहणा
त् अन्यथा गतिबुद्धिशब्दत्रयस्य वसानार्थाकर्मकाणामित्येव सिद्धं जल्पत्यादी
नामुपसंख्यानं कर्त्तव्यमेव अन्यस्मात् जल्पति देवदत्त इति वचनेन बोधय 209
तीत्यर्थः एवमन्यत्रापि तत्र बुद्ध्यर्थत्वादेव सिद्धं यद्यप्यन्या बुद्धिरन्या बोधना

 का ३

उपसर्जनीभूताऽपि तावद्बुद्धिरस्तीति बुध्यर्थत्वमस्त्येव उपसर्जनीभूतो गत्यर्थादिर
र्थोऽत्र गृह्यते अन्यथा गमयतीत्यादीनामगत्यर्थत्वादेवात्र संग्रहादणि ग्रहणमन
र्थकं स्यात् इति वस्तुचेतनविषयं एवं अचेतनविषयेऽपि कथं यत्किं विजल्पति तमन्यो
जल्पयतीति न ह्यत्र बोधनार्थत्वमस्ति अकर्मकाणामिति कालाध्वदेशव्यति
रिक्तकर्मरहितानामित्यर्थो ग्राह्यः अन्यथा मासमास्ते देवदत्तः मासमासयति दे
वदत्तं गोदोहमासयति क्रोशमासयति कुरूनासयतीत्यत्र न स्यात् कालादिक
र्मणा सकर्मकत्वात् एवं लः कर्मणि चेत्यादावपि यच्चाकर्मकग्रहणं तत्र सर्वत्र
दृष्टव्यं तेन मासमास्यते देवदत्तेनेत्यादौ भावे लादयः सिद्धा भवन्ति उक्तं च सिद्धं
तु कालाद्यकर्मकाणामकर्मवद्वचनादिति कालाद्यग्रहणमुपलक्षणं तेन करणस्या
प्ययमपि भवति मासमास्यते देवदत्तेन मासे कर्मणि लो भवति स तर्हि सकर्म
कवद्भावो वक्तव्यः न वक्तव्यः अकर्मकाणामित्युच्यते न च कालादिभिः केचिदक
र्मकाः कालादिभिरप्यकर्मकाः यदा तेन वक्ष्यते तदा यथा शेते देवदत्तो न भुङ्क्ते इति
प नाविवक्षितकर्माणोऽकर्मकाः किं तर्हि ये त्यन्ताविद्यमानकर्माणः धातवस्त्वक
र्मकानार्थाः यस्य धातोः स्वरूपावधिकमकर्मकत्वं न च कालादिकर्मणा स्वरू

पावधिकमकर्मकत्वं कस्यापि संभवतीति सामर्थ्यात्तद्व्यतिरिक्तेन कर्मणाऽकर्मक
त्वं विज्ञापयते किमर्थं पुनरिदमुच्यते यावता स्वव्यापारे स्वतंत्रस्यापि प्रयोज्यस्य
प्रयोजकधीव्यापारे विवक्षिते तेन प्रधानभूतेनाप्यमानत्वादेतद्गतत्वेन पूर्वप्र
वृत्तामपि कर्तृसंज्ञां बाधित्वा कर्मसंज्ञा प्राप्स्यति एवं तर्हि सिद्धे सत्यारंभो नि
यमार्थः प्रयोजकव्यापारेणाप्यमानस्य यदि भवति गत्यर्थादीनामेव नान्येषा
मिति तेन पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यत्र पूर्वप्रवृत्तायाः कर्तृसंज्ञाया बाध
नात् कर्तरि तृतीया भवति उक्तं च गुणक्रियायां स्वातंत्र्यात्प्रेषणे कर्मतां गतः । नि
यमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते इति कर्तुः स्वधर्मस्तृतीया अथ कथं मया
पितारं नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेति स्वतंत्राः कवयः पक्षांतु तांग्रा
ति न किंचिद्बुद्ध्याहृ विषयं ग्राहयितुं बोधयितुं शशाकेत्येवं व्याख्येयं तत्र बुद्ध्य
र्थत्वात्सिद्धं ॥ ॥ हृक्रोः ॥ गत्यर्थादयो निवृत्ताः तेनोत्तरत्र विशेषोऽयं यदा हरति २११
र्गतौ वर्त्तते हरति भारं देवदत्त इति अभ्यवहरति माणवक ओदनं इति करो
ति स्वाकर्मकः ओदनस्य पूर्णस्थाताविकुर्वते इति तदा पूर्वेण प्राप्ते यदा हर
ति स्तेयादौ वर्त्तते हरति सुवर्णं चोर इति करोतिश्च सकर्मकः तदा अप्राप्ते नतु

अंतरस्य विधिर्वा स्तव तिप्रतिषेधो वेति नियमस्यैव विकल्पो युक्तः गत्यर्थादिष्विति
योयं नियमः सहक्रोरन्यतरस्यामिति ततश्च पक्षे नियमाभावात् गत्यर्थादन्यत्र
पक्षे कर्मत्वं पक्षांतरे कर्तृत्वं च भवति गत्याद्यर्थत्वेतु नित्यवत्कर्मसंज्ञा प्राप्नोति ए
वं तर्हि वार्त्तिककारेणोत्तरपत्र विशेषाश्चियं पठिता तत्सामर्थ्यादनंतरस्य विधिरिति नाश्रीय
ते अविशेषेण हृक्रोर्विकल्पः प्रवर्त्तते अभिवादिदृशोरिति अभिवादयतेर्ग्राहे विभाषा
हृक्रोर्बुद्ध्यर्थवाद्दृशोः सर्वत्रेति वा प्राप्ते अभिवादयत इति णिचश्चेत्यात्मनेपदं परस्मैप
दे तु अभिवादयति गुरुं देवदत्तेनेति कर्तृसंज्ञैव भवति दर्शयत इति कर्मसंज्ञाभाव
पक्षे कर्मांतरस्याभावात् णेरणाविति आत्मनेपदं अन्यत्र णिचश्चेति॥ स्वतंत्रः ॥ स्वतंत्र
शब्दोयं तंतुवायपर्वनोप्यस्ति स्वं तंत्रमस्य स्वतंत्रः विततास्तंतवः स्वतंत्रमित्युच्यते अ
स्ति च साधारणे द्रव्ये पुरुषे वर्त्तते साधारणं सर्वेतत्त्रं स्वं धनं तंत्रं साधारणमस्य स्व
तंत्रः अस्ति च प्रधानवचनः स्वआत्मा तंत्रं प्रधानमस्य स्वतंत्र इति तत्राद्ययोर्ग्र
हणे तयोरपादानादिविषयेपि कर्तृसंज्ञा स्यात् परत्वाद्विशेषविहितत्वाच्च तंतु
वायाद्गच्छतीत्यादौ द्रू च न स्यात् देवदत्तो गच्छतीति इममाद्ययोर्ग्रहणे दोषं
दृष्ट्वा तृतीयमर्थमाश्रित्याह स्वतंत्र इति प्रधानभूत उच्यत इति स्वतंत्रशब्दस्य

तत्रैव प्रसिद्धतरत्वादिति भावः। किंच कारकाधिकारात् क्रियाविषयं स्वातंत्र्यं गम्य-
ते न च तंतुवायस्तंतुवायतया क्रियायामुपयुज्यते किं तर्हि प्रधानतयैवेति तद्वा-
चिन एव ग्रहणं युक्तं यदि प्रधानभूत उच्यते एवं सत्यप्रधानापेक्षत्वात्प्रधानभाव-
स्य यत्राधिकरणादीन्यप्रधानानि कारकाणि संति काष्ठैः स्थाल्यामोदनं पच-
तीत्यादौ तत्रैव स्यात् न त्वासनं शेते इत्यादावित्याशंक्य प्राधान्येनागुणभावो लक्ष्य-
त इति दर्शयति अगुणभूत इति येन यस्य गुणभावो नास्ति स कर्त्ता कारकांतरा-
विवक्षायामपि चागुणभावोऽस्यैवेत्युक्तः पुनः कारकाणां गुणप्रधानभावः यदा-
काराभावेऽपि क्रिया न निर्वर्त्यते उक्तं मत्रैवागन्यतः शक्तिलाभात्स्वकूभावापाद- ग्य
नादपि तदधीनप्रवृत्तित्वात्स्वप्रवृत्तानां निवर्त्तनात् अदृष्टत्वात्प्रतिनिषेधे प्रविवे-
केऽपि दर्शनात् औदासीन्योपकारित्वे स्वातंत्र्यं कर्तुरिष्यत इति काष्ठादीनि कर्त्रा प्र-
वर्त्तितानि करणादिशक्तिं प्रतिलभंते कर्त्ता तु प्रागेव कर्तृसंनिधौ च करणादी- २०२
नि न्यक्कृत्य वर्तते तदधीने च तेषां प्रवृत्तिनिवृत्ती कर्तुः स्वप्रतिनिधिर्न दृष्टः करणा-
दीनां तु दृष्टः व्रीहिप्रचारे हि नीवारैरिज्यते प्रविवेकोऽभावः करणाद्यभावेऽप्या-
स्ते शेते इत्यादौ केवलः कर्त्ता दृश्यते न तु कर्तुरभावे करणादीनि दृश्यंते आरा-

दप्युपकारित्वइतियद्यप्पसौत ५८ स्व: फलसिद्धावुपकरोतिनतुकरणादिवद्दहु
ग्रविवक्ष्यतेतथापीत्यर्थ: एतत्तु प्राधान्याचेतनेष्वेवसंभवति नाचेतनेषु रथो गच्छती
त्यादौ नैषदोष: उक्तलक्षणे कर्त्तरि हृष्टं प्राधान्यमगुणभावश्च तत्रागुणसा
वोऽचेतनेष्वपिसंभवतिसमवायमगुणसावोन प्रतिनियतविषय: यस्यैवतुविव
क्षातेतस्यैवेत्याहस्वातंत्र्यविवक्ष्यतइतिविवक्ष्यतद्रव्यस्योदाहरणं स्थालीपचती
ति अन्येतुव्याचक्षतेअगुणभावेनात्रिधीयमानव्यापारोऽगुणभूत: अगुणभू
तधात्वर्थाज्ञव्यापार: कर्त्तृत्वमर्थ: कस्यचव्यापारो धातुनागुणभावेनोपादीयतेय
स्यविवक्ष्यतेतस्येतिसर्वत्रप्रसिद्धमिति ॥ तत्प्रयोजकोहेतुश्च ॥ तदित्यनेनकर्त्ता
संबध्यतइतिकर्तृसंज्ञाविशिष्ट: स्वतंत्रइत्यर्थ: ननुचप्रयोजकसन्निधौप्रयोज्य
स्यपारतंत्र्यं कर्तृसन्निधावधिकरणादीनां तत्कथंस्वतंत्र: परामृश्यतेकथंतरांच
कर्तृसंज्ञाविशिष्ट: कथंतमांचपाचयत्योदनं देवदत्तोयज्ञदत्तेनेतिप्रयोज्येत्वतीपा ने
रवतित्वमेवस्वतंत्रस्यकर्तु: सत: प्रवृत्तिरपिकिमर्था मायंविरंसीदितिप्रयुक्त
इतिचेत् सत्यदेवंपरवृत्तप्रवर्त्तनेयत्रबलात्कारेणप्रवर्त्यतेतत्रकथंउच्यते अ
प्रवृत्तप्रवर्त्तनेपिपावस्वार्थदर्शनात्प्रयोज्यो न प्रवर्त्ततेतावत्प्रयोजकः प्रवर्त्त

पतीति न व्यपदिश्यते प्रयोज्यप्रवृत्त्युत्तरकालमेव तु व्यपदिश्यते तदानीमपि वस्य त्या
रूढा प्रयुक्तिर्विघात एव अनुवर्त्तमानादि प्रयुक्तिः प्रयोज्यस्या फलनिष्पत्तेः प्रवृत्तौ
हेतुर्न मध्ये विच्छिन्ना। लोडादिवाच्यस्तु प्रैषः प्रयोज्यस्याप्रवृत्तावपि तत्र वर्त्ततेतुक्तं चउ
व्यमात्रस्य तु प्रैषे पश्चाद्दलोद्भिधीयते प्रवृत्तस्य यदा प्रैषः तदा स विषयो लिङ्
इति तदेवं णिचूवाच्या प्रवर्त्तना प्रवृत्तप्रवर्त्तनारूपेण प्रतीयत इति प्रकृत्य ॰ र्थे क
र्तुः सतः प्रयोजकत्वस्य विरुद्धं इममेवार्थं दर्शयितुं तद्ग्रहणोपादानं अन्यथा कस्य
प्रयोजकत्वस्य पेक्षायां प्रकृतत्वादेव स्वतंत्रस्य प्रयोजक इति लाभादनर्थकं
न स्यात् तत्र स्य प्रयोजकस्तत्प्रयोजक इति ननु च तृजकाभ्यां कर्त्तरि चेति निषेधा
त्कथमस्य समास इत्यत आह निपातनात्समास इति अत्र विचार्यमास्ति समा
सप्रकरण एव विचारयिष्यामः संज्ञासमावेशार्थश्चकार इति असति हि तस्मि
न्नेकसंज्ञाधिकारात्कर्तृसंज्ञा न स्यात् कुर्वाणं प्रयुङ्क्त इति कुर्वाणं दर्शायां
याप्रयुक्तिः स्मृत्या रूढा सेवणिज्वाच्ये त्येवं वियन्त्रार्थः अतः हेतुत्वादित्यादिना स २७३
मावेशास्य प्रयोजनं दर्शयति॥ ॥च्याणी॥ प्राक्विकाले देशो वा प्राक् अधिरीश्वरे
इति वक्ष्यतीति तत्र ईश्वरे पदे प्रकृति भाग ग्रस्य पूर्वपदांते न रूपेण सहानुकार

णां द्रष्टव्यं अनुकार्येणार्थवत्त्वादिनस्तत्युत्पत्तिः। चवाहेति अत्र निपातत्वे सति स्व
रादि निपातमित्यव्ययत्वे संज्ञा भवति निपाता आद्युदात्ता इति नु स्वरो न भवति
उदाहृतानामनुदात्तानां गलोपाठात्। अन्येषां तु तदपि भवति ननु च यथा त्रस
प इत्यादिरधिकारो विनाप्यवधिनिर्देशेन नास्तिमते विषये प्रवर्त्तते तथा अयमपि
प्रवर्त्तिष्यते निपात इत्येवास्तु नार्थो ऽवधिनिर्देशेनेत्यत आह प्राग्वचनमि
ति प्राग्रहणद्वारेणावधिनिर्देशस्यैव प्रयोजनमुच्यते अयमर्थः असत्यव
धिनिर्देशे निपात इत्यस्य प्रतियोगमनुवृत्तौ सत्यामपि एकसंज्ञाधिकारात्
पर्यायः स्यात् ननु समावेशः सति तु तस्मिन् रीश्वरात् प्राक् यावतः संज्ञिनः

कहलभि सर्वांस्तान् निमित्तमुपेक्ष्य सहक संज्ञा विधीयते प्रतिसूत्रमधिकाराच्चापराव
त्तिः तस्याश्च समावेशः प्रयोजनमिति अथवा प्राग्वचनं किमर्थं यावता पंचम्येव
प्रागिति दिक्शब्दोऽध्याहरिष्यते परागित्यस्य त्वध्याहारो न भवति वादयोसत्वे
प्रादय इत्यनयोर्विधेयासंभवेनानार्थक्यप्रसंगादत आह प्राग्वचनमिति।
अयं भावः अध्याहारेणैव सिद्धे प्राग्ग्रहणसामर्थ्यात्तन्त्रेण द्वौ प्राक्शब्दावु
च्चार्येते तेनायमर्थो भवति प्राग्रीश्वरादेव स्थिताः ते प्राक् निपाता भवन्ति नि

पाताः संतोगत्यादिसंज्ञा इति तेन निमित्तमेव निपातसंज्ञागत्यादिसंज्ञानामिति स
मावेशासिद्धिरिति। ईश्वरादिति सहरेफेणानुकरणे प्रयोजनमाह री ईश्वराद्रीश्वरा
न्मा भूदिति रीश्वरादित्युच्यते अधिरीश्वरमित्ययमीश्वरशब्दो वधिर्यथा स्यात्
शाकिणमुलु कमुलावीश्वरे तोसुन्कसुनावित्ययं माभूदित्येवमर्थमित्यर्थः। प
दास्मदित यास्त्रशालि पद्यंते तदा वीश्वरशब्दोप्यस्तीत्यस्ति चेत्यवीश्वरादित्युक्तं।
९३ ज्ञापकात्सिद्धं यदयं हन्मेजंत इति हतोमांतस्य एजंतस्य चाव्ययसंज्ञां शास्ति
तज्ज्ञापयत्यनंतरशब्दोवधिर्नव्यवहित इति अन्यथा सेनुप्रस्तीनां णमुल्कमु
लोर्निपातत्वादेवाव्ययसंज्ञायाः सिद्धत्वादनर्थकं तत्स्यान्नैतदस्ति ज्ञापकं हृ
न्मेजंतः परोपि सर्ईश्वरे तोसुन्कसुनाविस्यस्मात्परोपि हन्मांत एजंतश्चास्ति
हत्याचैतवैकेनित्यादिरेजंतः स्वमुशादिश्च मांतः तदर्थमेतस्यात् यत्तर्ह्यव्ययी २९३
भावस्याव्ययत्वं शास्ति तज्ज्ञापयत्यनंतरस्य ग्रहणमिति अन्यथाद्वितीयेपि नि
पातसंज्ञायाव्यापारादव्ययीभावस्यापि निपातत्वादेवाव्ययसंज्ञायाः सि
द्धत्वादनर्थकं तत्स्यात् नैतदस्ति समासेप्यव्ययीभावः तुल्यजातीयस्य वच
ये नियमार्थमेतत्स्यात् नत्वनंतरस्य ग्रहणे ज्ञापकमित्यर्थः एवं तर्हि लौकिक

न्यापादनंतरस्यग्रहणं सविषयतिलोके द्योदकांतात्स्त्रियंप्रोयमनुव्रजेदिति ॥ य
एवानंतर उदकांतः आततोनुव्रज्यबाधवानिवर्त्ततेतद्वदत्रापितत्राहलौकिकं
वानिवर्त्ततइतिलौकिकमपिन्यायंलोकएवानिवर्त्ततेइतिपतोद्वितीयमप्युदकांतं
स्नेहातिरायादनुव्रज्यनिवर्त्ततेतस्माद्रीश्वरादित्युच्यतेवीश्वरोन्माभूदितिस्थि
तंननुचनलोकाव्ययेस्तत्रलोकादीनामव्ययत्वादेवषष्ठीनिषेधेसिद्धेपुनरूपा
दानेज्ञापकंभविषयतिअनंतरस्ययुरूणमितिनेतदस्तिअव्ययसंज्ञायांएवास्मा
ज्ञापयेत्निपातसंज्ञातुस्याद्वेवतत्रअचिकीर्षं यमित्यादौनिपातएकाजना
ङितिप्रगृह्यसंज्ञास्यात्सोयमितिपर्याप्तमित्यर्थः। प्राप्वे पूर्वापत्तोपचाद्य च् क्रि
पाविशेषणत्वान्नपुंसकत्वं॥ ॥वादयोसत्वे॥ नचेत्सत्ववत्तेतइतिसत्वेचेद्वर्त्तते
तदासंज्ञानभवतीत्यर्थः। तदाहप्रसज्यप्रतिषेधोयमिति अथपर्युदासेकोदोषः।
पयुरावदोत्रपद्यते। सजातिविशिष्टेद्रव्येवर्त्ततेतस्यनिपातत्वंस्यात्जातिद्रव्य
समुदायोह्यर्थः। केवलाद्द्रव्यादन्योभवतितथाप्यादयइत्यत्रविप्रातीतिविग्रः आ
तश्चोपसर्गइतिकः अत्रप्रशब्दः क्रियाविशिष्टेद्रव्येवर्त्ततेतत्रक्रियाद्रव्यसमुदा
यस्यद्रव्यादन्यत्वान्निपातत्वेसत्यव्ययसंज्ञायांतदंतविधेरभ्युपगमाद्विप्रश

बहुस्याव्ययसंज्ञा स्यात् प्रसज्यप्रतिषेधे तु यत्र द्रव्यगन्धस्तत्र सर्वत्र प्रतिषेधो भावविति
क्तत्वाद्विवर्त्तमानः पशुशब्दो सत्त्ववचनो भवति दृश्यर्थे यो धं नयति पशुमन्यमाना
इत्यत्र दृश्यर्थे मननं विशेष्यते दर्शनमेतन्मननं सम्यङ् मन्यमाना इत्यर्थः ।स
त्त्वेशब्दोयं सतो भावः सत्त्वमिति सत्ता जातिवचनो गम्यत इति भाष्ये तिं वा नयति
सत्त्वमिति च द्रव्यमुच्यते इति इदं तदिति सर्वनामपरामर्शयोग्यं वस्तु द्रव्यमुच्यते ।
तदुक्तं च वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते द्रव्यमित्युच्यते सोर्थो स्त्रीत्वेन विव
क्षित इति स्वार्थे नेति शेषः सिद्धरूपो योर्थः स्वार्थेन विशेष्यतया विवक्षितः तद्द्रव्य
मित्यर्थः उक्तं च स्वार्थस्य यत्र विश्रान्तिर्बोध्यं द्रव्यं तदुच्यते इति एवं च त्वतलासदिति
निर्दिशते तत्र जात्यादिकं शब्दप्रवृत्तिनिमित्तं विशेषणभावेनेति सत्त्वं द्रव्यं सदे
शेणादिकस्त्वप्रत्ययः ताभ्यामन्यत्रोणादयः इत्यधिकरणसाधनस्त्विति पक्षो २१४
ते सत्त्वे दर्थे वर्त्तते णकारश्च एकश्चिद्घत्रयुक्तमिति विशेषणार्थः नञो नकारो न
लोपो नञ विशेषणार्थः नलोपो नञ इत्युच्यमाने वामनपुत्रः अत्रापि प्राप्नोति
पाक्षिक एष दोषः अस्तु युत्तरपदे इति वर्त्तते यदा उत्तरपदेनाक्षिप्तं पूर्वपदं त
स्य विशेषणं तदा पूर्वपदं नु तेन नस्य लोप इत्युच्यमाने नैवात्र प्राप्नोति नञ्शब्दे

ननु पूर्वपदे विशेष्यमाणे तदंतविधिसद्भावादत्रापि स्यात् अ चास्मिन्पक्षे नञ
इत्युच्यमानेपि स्त्रैणपुंनाऽइत्यत्र नञः कस्मान्न भवति अतुल्यत्वात्सत्यपस्य अका स्फ
रोवद्धि स्वर यो ऽस्वरितार्थः निपातस्यत्व चरितार्थः तथेति पठ्यते सोनुपपन्नः स
मुच्चये वर्त्तते थालंतस्यतु लिङ्गचरणम् ध्युदात्तत्वं सिद्धं अवायम त्वमपि नद्धितश्चा
सर्वविभक्तिरित्येवं सिद्धं अकस्मान्नस्यापि विभक्तिप्रतिरूपकाइत्येव सिद्धं सत्यंप्र
पंचार्थः पाठः एवं वेलायां मात्रायां इत्यादेरपि स्वरप्रतिरूपकाः अ ए ऐ इत्यादयः
तेषां निपातसंज्ञाविधानद्वारेण सद्भावएव प्रतिपाद्यते न पुनरेषां निपातत्वे किंचि
त्प्रयोजनमस्ति ॥ ॥ प्रादयः । अयं योग उत्तरस्माद्विभज्यते पूर्वस्माच्च यदि पुनः प्रा
दय उपसर्गाः क्रियायोग इत्यक चेत नैवं वाक्यं इत्याह एकयोगकरणमिति उत्तर
स्या उपसर्गसंज्ञाया एव क्रियायोग इति विशेषणं यथा स्यात् निपातसंज्ञायामा
भूदित्येवमर्थं उत्तरस्माद्योगादस्य विभाग इत्यर्थः अथ चादिष्वेव प्रादीनप
ठित्वा पूर्वस्माद्योगान्न विभज्यते तत्राप्याह उपसर्गाः क्रियायोग इति चादीनामिति
चलोपोऽच इष्टव्यः इति च चादीनामिति पराजयंति सेना इति परा उत्कृष्टा परदे
शास्त्राबाड्व्यत्वान्न च वर्त्तमानस्य पराशब्दस्य न भवति यत्त्वेकवचनांतं पे
स्यौ

ध्युते परासेनेति तत्र रूपोदाहरणं दृष्टव्यं रु अग्रापरस्पद इति सुलोपात्स्वरात्रादस्या
घुदात्तत्वाच्च। उपसर्गाः क्रियायोगे इति सद्गोगे तृतीयानिपातनात्समासः कर्तृकर
णे कृता बहुलमिति बहुलवचनाद्वा क्रियया करणभूतया प्रादीनां धातुभिर्योगा
त्करणे तृतीयया एव समासः प्रणयतीति उपसर्गादसमासेपीति णत्वं वचनापक
इति न वचापि गमि क्रियायोगेस्येव सत्यं प्रादयः पुनरेवमात्मकाः यदुतक्रतायां
क्रियायां तामेव विशिंषंति अकृतायां तु ससाधनां क्रियामाक्षिपंति तत्र क्रियायो
गग्रहणसामर्थ्याद्य क्रियायुक्ताः प्रादयः तामेव च तिगत्युपसर्गसंज्ञा भवंतीत्य
यमर्थो भवति अत्र यत्क्रियायुक्तेन सगच्छति प्रयुज्यते पुश्च प्रयुज्यते नतो क्रिया स
युक्ता इति नास्ति णत्वं पसर्गः मरुद्वृद्धस्येति उपसर्गसंज्ञेव बाधते न निपातसंज्ञा
तस्याहि सत्यां निपाताद्युदात्तत्वे तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरेण स्यात्।
अंतोदात्तश्च मरुद्वृद्धः षपतेन नुपसर्गसंज्ञायामपि उपसर्गाश्चाभिवर्जमिति २९५
आद्युदात्तत्वं स्यादेवं नानेनापूर्वमाद्युदात्तत्वं विधीयते किंतर्हि निपाता इत्येव
सिद्धेः असिद्धप्रतिषेधार्थमेतत् किंच निपातसंज्ञायामप्युपसंज्ञापि स्यात् अथो
पसर्गे घोः आतश्चोपसर्ग इत्येतौ विधी कस्मान्न भवतः अनभिधानात् मरुत्तद्

ब्रू:

तकारस्य लोपे वा रूप

तिमरुच्छब्दतकारस्यानचि चेति द्विर्वचने झरो झरीति मध्यमस्य मध्यमयोर्मध्य
मानो वा लोपे चैरुप्यैकत्वं पुनरस्य तत्त्वं पावता अमरुंत इत्यत आद संज्ञावि
धानसामर्थ्यादिति उक्तः प्रयोजनांतराभावः एवं तु मरुत् भवतीति तकारस्य वाचे
ण त्वं प्राप्नोति तस्मान्न विधावेवेति वक्तव्यं अच्छब्दस्य अङ् विधावेवेष्यते किं प्रत्ययो न
नास्ति धानान्न भवति तदारु आतश्चोपसर्ग इति सिदादि पा ग संज्ञा अङ्श्चेति ति
कौ पातनाद्वा सिद्धं ॥ ॥ गतिश्च ॥ गतिरनंतर इति पुल्लिंगनिर्देशात् मित्यादि तिगतिः त्रि
कौ तौ च संज्ञायामिति त्रि च निपातनाच्च नत्रिचि दीर्घश्चेति दीर्घो न भवति प्रकृ
त्येति अत्र गतित्वात्स्वरोस्सवति समासस्तु प्रादित्वादेव सिद्धः प्रादिभ्योन्यत्र समासो
पि प्रयोजनं प्रकृतं इति गतिरनंतर इति पूर्वपदप्रकृतिस्वरः यत्प्रकरोतीति तिति
ङ् लक्षणस्य निघातस्य निपातैर्यद्यदीति प्रतिषेधे तिपः पित्वादनुदात्तत्वं विकरण
स्य प्रत्ययस्वरः धातोः शेषनिघातः तिङि चोदात्तवतीति प्रशब्दस्यानुदात्तत्वं प
तत्र प्रयोजनचतुष्टयं गति संज्ञाप्रकरणे सर्वत्र इष्टं चकारः समावेशार्थ इ
ति अन्यथा एकसंज्ञाधिकारादेकत्र संज्ञाद्वयविधानाच्च पर्यायः स्यादिति भावः।
कारिकाशब्दस्येति कारिका क्रियामर्यादा स्थितिरित्यर्थः। यत्र इत्यपरे धात्वर्थे

निर्द्देश इति ण्वुल्। यस्तु कर्तरि कारिकाशब्दः कारिकादासीति यस्य श्लोकवाचीत
यो ग्रहणं न संभवति क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणात्। क्रियाव
त्ते ग्रहणात्। यत्कारिका करोतीति निपातत्वादव्ययत्वे सति विसत्ते र्लुक्। पुनरुत्स्य
तमिति गतित्वात्समासः गतिर्गताविति निघातो भवतीति यद्यप्यत्र पूर्ववज्ज्ञादी
नां चेति उत्तरपदान्तोदात्तत्वेन शेषनिघातः सिद्धः तथापि परत्वाद्यमेव युक्त
इति भावः। इह च पुनराधेयमिति गतित्वात्समासे कृदुत्तरपदप्रकृतिस्वरे
ण यतोऽनाव इति धेशब्द उदात्तः चनो हित इति निपातत्वाद्युदात्तस्य चनः शा
ब्दस्य गतिरनन्तर इति प्रकृतिस्वरः॥ ॥उर्यी॥ च्व्यन्ताडाजन्ताश्चेति यद्यपि पदसंज्ञा
यामन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्तीति ज्ञापितं। तथापि
क्रियायोग इत्यनुवर्तनेस्तदन्तस्यैव ग्रहणमिति भावः। न हि प्रत्ययमात्रस्य क्रिया २७६
योगः संभवति स्वार्थिकत्वेन स्वयमनर्थकत्वात्। च्वेर आवितत्वाच्च हस्त्वस्तियो
गे गतिसंज्ञा विज्ञायत इति न केवलं गतिसंज्ञाप्रयोगोऽप्यन्यत्र न भवति उरीप
चेति। ओषडादीनां स्वाहापर्यन्तानां चादिषु पाठादक्रियायोगेपि निपातत्वं।
आविः शब्दस्य साक्षात्प्रभृतिषु पाठात्कृञो योगे विकल्पः॥ स्वस्तियोगेत्वनेन

यथा लोके ... स्या ज्ञः किमर्थः कस्यचित् ... प्रयोगाउदा... तः चुंबनस्य गः सास्या ... ताद् ... दरा नमा ... नोवस्तानां ... (वि ...)

घुगप

८०

नित्याकचंतर्द्धिआविश्वच्चुषोत्सवदसौविवरागः असर्वौद्धिलोलजिह्वायुगल्लीहेतो
सपस्य च्कभागमाविरिति स्वतं त्राः कवपः स्फुल्लीकस्येति अस्य चाविती वंपटप
टाशब्दो वाक्यषड्यत्र व्युत्पादितः॥ अनुकरा॥ इतिः परो यस्मादिति इतेः परमिति
पंचमी समासस्तल्लक्षणाभावान्नाश्रितः तेन इति खाट् कृतेत्यत्र इतेः परत्वेपि
भवतिखाडिति ह्रत्वानिरष्ठीवदिति अत्रासतिप्रतिषेधे गतिसंज्ञायां समासःस्या
त्धातोश्चानंतरः प्रयोगइति रूपमेवैतन्नसिध्येत् ष्ठिवुनिरसनेलङिः ष्ठिवुक्लम्वा
चमांश्चितीति दीर्घः ऋतव्ळस्पष्टं खादिति हृत्वानिरष्ठीवत्॥ ॥ आदरा॥ प्रीतिसंभ्रमइति।
प्रीतिपूर्वकाप्रत्युद्धानादिविषयात्वरेत्यर्थः। परिभवोदासीन्यमिति अवज्ञया कर्तव्यं
प्रत्युद्धानादिकं प्रत्युपेक्षेत्यर्थः असदनादरः गृहणं किमर्थं असत्कृत्येत्यत्रापि यथा
स्यात् मा भूदसच्छब्दस्य गतिसंज्ञासत्कृत्येत्यनेन नञ्समासोपि भविष्यतिनैवं शक्यं।
सतिशिष्टत्वात् उत्तरपदप्रकृतिस्वरं बाधित्वाव्ययपूर्वपदप्रकृतिस्वरेणाद्युदा
त्तत्वं स्यात् असत्कृतमित्यत्र तु सत्कृतशब्देगतिरनंतरइति स्वरे प्रवृत्ते पश्चान्न
ञ्समासेपि तस्यैव स्वरः। असच्छब्दस्यापि केतशब्दे नसमासे तस्य निपातत्वा
दाद्युदात्तस्य गतित्वासत्कृति भावेतिं स एव स्वरइति नास्ति विशेषः इरुच पदस्य

दा

पि

त्कारोतीत्यसच्छब्दस्य निपातो न स्यात् अव्ययसंज्ञापि तस्य न स्यात् इति। असच्छ
ब्दस्य वगतिनिपातसंज्ञे एषितव्ये। न चात्र सच्छब्देन तदंतविधिर्लभ्यते विशेष्य
स्याभावात् न चात्र सच्छब्दस्यैव संज्ञास्ति कार्यप्रदेशेषु ग्रहणं तस्य तेन तदंतवि
धिर्भविष्यति अव्ययसंज्ञायां तावदस्यैव तदंतविधिः परमोच्चैरिति यथा स्यात् कु
गतिप्रादय इत्यत्रापि सुबिति वर्त्तते सुपेत्येव निवर्त्तते इति नाविशेष्यते गति
रनंतर इत्यत्रापि पूर्वपदं गतिर्गतावित्यत्र पदस्येति प्रकृतं स वर्तुत तदंतविधि
ना कार्ये अनादरा वगतिस्तु कुतः स्यात् असत्यनादरग्रहणेन सदसदित्या
दरप्रतिषेधात् नैव चाक्यं आदरप्रसंग एव हि स्यात् गुरुमसत्कृत्येति चेत् अल
मसत्कृत्येत्यत्र तु न स्यात् यथा अब्राह्मण इति ह्यत्रिपादिरेवोच्यते नलोपश्चाद
यः अनादरग्रहणे तु सति बहुव्रीहिर्विज्ञायते अविद्यमानादरो नादर इति।
बहुव्रीहिश्चात्यंताभावे प्रसक्ताभावे च भवतीति सर्वत्र संज्ञा सिध्यति तस्मा २१७
दनादरग्रहणं कर्त्तव्यं असद्ग्रहणे तु वाक्यमकर्त्तुं आदरानादरयोः सदित्येवा
स्तु तत्र यथा गोष्पदं सेविता सेवितेत्यत्रासेविते गोष्पदशब्दो न संभवति इस
गोष्पदोऽर्थमसेवितग्रहणेनैवाभिलाप्यमानादरे सच्छब्दो न संभवतीत्यनादर

गुरूणामसच्छब्दार्थं तत्र विष्यतिसत्कृत्वाऽसत्कृत्वेति शोभनवचनो विद्यमानवचनो वा सच्छब्दः तद्विपरीतवचनोऽसच्छब्दः॥ ॥अलं भूषणे॥ अलमिति प्रतिषेधरूपसा
दितद्यथा अलंकृत्वा अलंकृत्वा सोऽन्तुं अलंभुंक्ते अलंकरोति कन्यामिति॥ ॥अंतर॥
अंतरितेवेति मध्ये भवेत्यर्थः अंतःशब्दस्येति उपसर्गसंज्ञायामेतन्नोक्तो अंतःश
ब्दः प्रसंगे वक्ष्यामीति यदा चतु उपसर्गसंज्ञोच्यते तदा तर्णे एणमित्यादिवदंतर्हणापा | पत्र ५
तुअंतर्हणनमित्यादावपि हृते रस्य वस्येत्येव णत्वसिद्धं अंतरयणमित्यत्रापिकृ
तेऽपि चेत्यैवसिद्धमिति अंतरदेशोऽपनंत्वे ति सूत्रद्वयमपि देशप्रतिषेधार्थं द्रष्टव्यं॥
॥ ॥कणे॥ कणेशब्दः सप्तमीप्रतिरूपको निपातोऽत्तिलाषातिशयेवर्त्तते मनः श
ब्दोपि सादृश्यपादभिलाषवृत्तिरेव वचित्ते यः कणेहत्यैति अतिशायेनाभिलषितं
निवृत्तिपर्यंतं पिबतीत्यर्थः तदाहतावदिति श्रद्धाप्रतिहन्यत इति यावदस्येत्यपि
कृणा हृत्येते प्रत्युदाहरणे शब्दः सूक्ष्मतडुलावयवे विधिकरणे भते वर्त्ते ते मनः शब्दो
पिवतत्ति॥ ॥पुरो॥ असिप्रत्ययांतः पुरः शब्दोव्ययमिति पूर्वापराधराणामसिपु
रधवश्चैषामित्यसिप्रत्ययः पूर्वशब्दस्य च पुरादेशः तद्धितश्चासर्वविभक्तिरित्य
व्ययसंज्ञा विसर्जनीयस्थानिकः सकार उपचारः पुरस्कृत्येति पूर्वस्मिन्देशे कृत्वे

त्यर्थः । पूः पुरौ पुरः कृत्वेत्यत्र प्रत्युदाहरणं इतरथोपन्यासस्तस्याह चर्यौ पुर
इति शासं तं नाव्ययमिति प्रदर्शनार्थं अत्र नमस्पुरसोर्गत्योरिति सत्वं न भवति ।
समासस्यान भवति ॥ ॥अस्तं च॥ अस्तं कृत्वेति अस्तु ह्येपलं निष्ठा उदितो वा यस्यैतो विभाङ्के
नु तिषेधः ननु लाक्षणिकत्वादेवात्र न भविष्यति किमव्ययग्रहणानुवृत्त्यानं त
६४ दनुवृत्त्यैव हि अस्तं शब्दो मकारान्तोव्ययमस्तीति ज्ञापयते न ह्यपञ्चादिषु स्वरादिषु
वा पठ्यते ॥ ॥अच्छगत्यर्थवदेषु॥ अच्छेत्यनुकरणं त्वप्यविभक्तिकोनिर्देशः सुपां
दि सुलुगिति विभक्तेर्लुप्तत्वात् अभिशब्दस्यार्थ इति आप्तिमुखे अच्छो द्योतितयजा
दित्वात्संप्रसारणं उदकमच्छमिति अकलुषमित्यर्थः । ॥अदोनु॥ उपदेशः प
रार्थ इति वाक्यप्रयोग इत्यथा गम्यते अदः कृत्येति एतत्कृत्वा एतत्कर्तव्यमिति
स्वयमालोच्येत्यर्थः ॥ ॥तिरो॥ तिरोभूयेति समासस्वरो प्रयोजनं तिरोभूत २१८
मिति । भवतेरकर्मकत्वात्कर्त्तरि क्तः गतिरनन्तर इत्यत्र च कर्मणीत्यनुवर्त्तते तत्स्मा
त्समासः पाथादिस्वरावत्र प्रयोजनं तिरोभूत्वेति पार्श्वतो भूत्वेत्यर्थः ॥ ॥विभा
षा ॥ तिरस्कृत्येति तिरसोन्यतरस्यामिति सत्वं प्रत्युदाहरणे तु न भवति तत्र ग
तिग्रहणानुवृत्तेः । ॥उपाजे॥ अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात्सूत्रे
६६

विसक्यसाव:। ॥साक्षात्त॥ साक्षात्प्रभृतिष्विति अस्साक्षाद्भूतं यदा साक्षात्क्रियते तदा
यथा स्यात् यदा तु साक्षाद्भूतमेव रूपांतरेण क्रियते तदा भूदित्येवमर्थं एवं मिथ्या
प्रभृतिष्वपि द्रष्टव्यं प्रतच्चांतरंगत्वाल्लप्स्यते तथा हि साक्षात्कृतमित्युक्ते कृतस्य तस्यै
वरूपस्यैकरणं प्रतीयते न त्वकृतस्य रूपांतरस्यैन च सत्यामपि प्रत्यक्तिविवक्षा
यां तस्यैवकरणं प्रतीयते अपवाद्यमर्थं वक्तिता नास्ति तस्मात् ग्राप्तं यद् रूपमेव कर्त
व्यं अपेक्ष्यंते ष्वपि साक्षादादिषयं विकल्प: कस्मान्न भवति अस्तु अनेनमुक्ते पुन:
प्रसंगविज्ञानाद् यादिष्विडाचष्टे एवं भविष्यति नेवं शक्यं यदेतल्लवणादीनां म
कारांतत्वं निपातितं तदपेक्ष्यंतेषु स्यादेवं तर्हि लवणादीनां मांता लवणमादय
आदेशा: करिष्यंते तत्र पद्येकदेशस्यानन्यत्वाल्लवणशब्दस्यापि पदे लवण
मादेश: क्रियते न कश्चिद्दोष: चेशब्दे हि न: साध्यं लवणं कृत्य लवणं कृत्वा लव
णीकृत्येति तच्चैवं सति सिद्धं इति कारस्त्वमकारांतत्वं निपात्यत इति वदति सम
न्यते च्व्यंतेषु पूर्वविप्रतिषेधेन नित्या संज्ञा भवति विकल्पस्तन्नियुक्तमांतं निपात
नं इति अग्नौ प्रैव शेषप्रभृतयो विभक्तिप्रतिरूपका निपाता:। प्राद्धराविः शब्द
यो: उपादित्वा साक्षान्न विभाषा॥ ॥अनत्या॥ उरसि मनसि शब्दौ निपातितौ उ

रसि हत्येति अभ्युपगमेत्यर्थः मनसि हत्येति निश्चित्येत्यर्थः। ॥मध्येपा॥ अविस
क्तिको निर्देशः मध्ये पदे शब्दौ निपातितौ निर्वचने वचनाभाव इति तत्र निपातना
देकारांतत्वं न पुनरेषा सप्तमी वा च नियम्येति व्याख्यानात् निपातनं चाविशेषेण
४१ न तु संज्ञासन्नियुक्तं निर्वचने इत्येवं तु यदा हतत्वादि स्याद्भ्रः। ॥नियेहस्ते॥ दारकर्म
भामा३६ णीति अन्ये तु स्वीकरणमस्त्येवं ति हस्ते इत्यमहास्त्राणीति हस्तेपाणौ शब्दौ अपिनि
पातौ॥ ॥प्राध्वं॥ मकारांतमव्ययमिति चादिषु पाठात् आनुकूल्ये वर्त्तत इति तेन बं
धने वर्त्तमानः प्राध्वं शब्द इत्ययमर्थो न भवति कथं तर्हि बंधन इत्यस्य प्राच्य इत्यास्त
दिति बंधन इति सप्तमी अर्थद्वारकस्य प्राध्वमित्यनेन न संबंधः बंधने सति यदा
नुकूल्यं तद्बंधनहेतुकमिति भावः प्राध्वं इत्यव्ययाकरमिति प्रक्षितो यान प्राध्वः।
अत्यादयः क्रांताद्यर्थे द्वितीययेति समासः उपसर्गाद्ध्वन इत्यच् लालित्यालौक २१८
त्वादिवाद्यन न सविषापति तस्मादव्ययस्यैवायं प्रयोगः आनुकूल्यं तु बंधनहेतुकं न
विवक्षितमिति व्याचक्षते॥ ॥जीविकोप॥ जीविका जीवनोपायः संज्ञामिति करणो
ण्वुल् एयंताद्वा कर्त्तरि उपनिपूर्वात्सदेः सत्सूद्विषेति क्विप् सदिरप्रतेरिति षत्वं
उपनिषत् रहस्यं वेदांतजन्यं ज्ञानं वेदांतभागो वा औपम्यमिति उपमीयते

पा

नयेत्युपमा आतश्चोपसर्ग इत्यत्र तस्यास्तावः औपम्यं विषयस्तत्र मीत्वेषा उपमानो
पमेयसंबंधनिमित्तादत्तेदोपचारात् यौ उपमेयानिष्टौ तत्त्ववतः तावौपम्यविषयौ।
जीविकाहत्य उपनिषत्कृत्येति जीविकामिव हत्वा उपनिषदमिव कृत्वेत्यर्थः य
घपि गतिसमासो नित्यः तथापीवशब्दप्रयोगे स्वार्थनिष्टत्वादीदृशां वाक्यं तत्वस्ये
व॥ ॥ते प्राग्धातोः। नियमार्थमिदं स पुनर्नियमः संज्ञानियमो वा स्यात् प्रयोगनि
यमो वा तत्र संज्ञानियमे तेशब्देन प्रादय उपनिषत्पर्यंताः स्वरूपेणपरामृष्टं
तेन गत्युपसंज्ञाविशिष्टेन रूपेणासंज्ञयोरनिष्पादादनेनैकवाक्यतामाप
न्नैः पूर्वसूत्रैस्तयोर्विधानात् ते प्रादय उपनिषत्पर्यंता धातोः प्रागेव प्रयुज्यमा
ना गत्युपसर्गसंज्ञा भवंतीत्यर्थः प्रयोगनियमे तु येगत्युपसर्गसंज्ञास्ते परा
मृष्टं ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्या इत्यर्थः तत्राद्यपक्षे स्वरू
पेणपरामर्शः प्रादीनामिव चादीनामपि स्यात् ततश्च निपातसंज्ञाया अपि नि
यमः स्यात्तथापि गत्युपसर्गसंज्ञयोरेव नियमः। एवमनर्थकं वचनं प्रयोग
एव हि तेषामप्राक् नेष्यते न पुनः प्राक् प्रयुज्यमानानां संज्ञायां किंचिदनि
ष्टमापद्येत। छंदसि परेपि व्यवहिताश्चेति सूत्रद्वयं चानर्थकं परव्यवहितानां

न च गतिर्गताविति निषेधः तदुपयोजनं परव्यवहितानां संज्ञायामिति वाच्यं। मे
परस्तानामकोऽकिं नामैव दर्शनात् इत्युक्तमेतन्निष्प्रयोजनं

हि संज्ञैव निषिद्धा न तु प्रयोगः न च तेनापि संज्ञैव विधीयते निःप्रयोजनत्वात् किंच
अनुकरणं चानितिपरमित्यनितिपरग्रहणमनर्थकं स्यादिति ह्युक्त्वा निरष्ठीवत् इत्य
त्र व्यवहितस्यानुकरणस्य संज्ञैव निषिद्धा प्रयोगस्तु केन वार्यते प्रयोगनियमे तु धा
तोः प्रागेवानुकरणस्य प्रयोगः साधुः स्यात् न त्वितिशब्दे न व्यवहितस्येति अनितिपर
इति वक्तव्यं अतः प्रयोगनियम एवायं युक्त इति मत्वा ह्येते गत्युपसर्गसंज्ञा इति अथा
स्मिन्नपि पक्षे निपातानामपि तेन शब्देन परामर्शः कस्मान्न भवति व्यवहितत्वात् क
थं तर्ह्युपसर्गाणां परामर्शः नोपसर्गत्वेन रूपेण परामृश्यन्ते किं तर्हि गतिरूपेण।
तेषामपि गतित्वात् अनेनैवास्ति न्यायेन वा तावुपसर्गाणां पृथक्ग्रहणं चेद यस्त्व
नेवमिति न ते परामृश्यन्ते ननु च लोके यत्र संकीर्णः प्रयोगः गौर्गौ वीतितत्र साधुपरि
ज्ञानाय शास्त्रमर्थवत् यत्र त्वासंकीर्ण एव प्रयोगः न तत्र शास्त्रकृत्यमस्ति न कश्चि 220
त्त्वपचतीति प्रयोक्तव्ये पचति चेति प्रयुक्ते यद्यपि लोके विपरीतः प्रयोगो न दृश्यते
छन्दसि तु परव्यवहितप्रयोगदर्शनात् भाषायामपि तथा प्रयोगः शंकेत तद्वि
तस्याघवे भाषायामेव गते शाविः शब्दस्य परव्यवहितप्रयोग उर्यादिसूत्रे किंच
उप्रे कच्छेरु जिवस्रोः कूलमुद्रुजः कूलमुद्वहः इत्यत्र उदि कूल इति द्वयोरपि

दि—

सप्तमीनिर्दिष्टत्वादुपपदत्वात्समासे कृते उपसर्जनं पूर्वमिति शास्त्रवशात्पर्याये
ण पूर्वनिपातं मन्येरन्न तु सुप सर्गोपसर्जनसन्निपाते पूर्वपरव्यवस्थार्थमिदं व
क्तव्यं यद्येवं कर्तृकर्मणोश्च तृह्कृञो: सुखेन कृटा: क्रियते सुकटं कराणि वीर
णानि दुष्कटं कराणीत्यत्र सुदुरो: प्राग्धातो: प्रयोग: प्राप्नोति कटं सुकराणीति।
खलः खित्करणमिदानीं किमर्थं स्यात् अनव्ययस्य दिसुके मुच्यते खित्करणसाम
र्थ्याद् व्ययस्य भवतु यद्वा कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात्स्यात् सुकरशब्दे प
रतः कटशब्दस्य संविध्यातिकर्त्तव्यो त्रयत्नः धातुग्रहणमनर्थकं कुतः प्रागित्यपेक्षा
यां क्रियायुक्ताः प्रादयः ततः प्रागिति विज्ञास्यते नैवं शक्यं इह दिक न्तुं प्रेच्छति
प्रचिकीर्षतीति स चाप्यपेक्षा पाशशब्दस्य योग इति सन एव प्राक् प्रशब्दः प्रयु
ज्यते धातुग्रहणात्तु धातोरेव चिकीर्षतेः प्राक् प्रयुज्यते इति ग्रहणं उपसर्गार्थ
मिति ननु यदि गतिसंज्ञारहिताः केवलोपसर्गसंज्ञा एव प्रादयः स्युः ततो सति
ते ग्रहणे गतीनामनंतरत्वात्त एव संबध्येरन्न तु उपसर्गा इति तदर्थं ते ग्र
हणं कर्त्तव्यं ते पि गतिसंज्ञकाः ततश्चानंतराणां गतीनामपि संबंधे प्रादीनाम
पि गतित्वादेव ग्रहणं सिद्धं स्यादेतत् असति ते ग्रहणे गतिसंज्ञैव केवला येषां

तेषामेव स्यात् नोपसंज्ञकानां प्रादीनामिति न केवलगतेरभावात् ननु चाप
मस्यानुकरणे चानितिपरत्वमिति नेति नैतस्यापि निपातत्वात् उच्यते असति तेग्र
हणे प्रकृते तेषां पेक्ष्य मालेष्वनंतरापेक्षा चेत् कृतिपयेस्मिन्निह नोपसर्गपर्यु
ता । व्याप्तिन्यायात् तु लक्ष्येषु सामपेक्षायां न प्रादिष्वेव पर्यवसाने कारणमस्ति चा
दयो व्युपेद्ते रन्नते ग्रहणे तु सति गतिसंज्ञायां अनंतरत्वात्तेन रूपेण परामर्शो
ग न कृतिपर्यायमेव भवति प्रादीनपि व्याप्नोति चादीश्चापरित्संचष्ट इति ते ग्रहणमु
पसर्गार्थं भवति तस्य चैतानां च यथा स्यात् तेषामेव च यथा स्यादित्यर्थः । पुग
तयोस्त्वनंतरा इति येनैतरगतपरस्त एव हि कृतिपयेग्रहणे रन्यत्यासत्ताविति सा
वः । व्याप्तौ तु दोषः सुज्ञानत्वात्कंठेन नोक्तः ॥ ॥ छंद ॥ न च परेषामिति न च गतिग
तावित्यस्यापि संभवः । परस्य तानामेकाकिनामेव दर्शनात् इति गम्यते ॥ ॥ वावा ॥ २२०
दिकृशब्दानामव्यवहिते मुख्यार्थं रत्तिरिति प्राकृच परस्ताच्च व्यवहितानां प्रयोगा
र्थे वचनं अत एव भाषायां व्यवहितानां अप्रयोगः क्वचेतदि गतिव्यवाये प्रयो
गः । अस्तु दूरं तीति न सजातीयकं व्यवधायकं भवति तद्यथा किमनंतरे ब्राह्मणे
कुत्रे इति प्रश्नः सन्नाहनानंतरे वृषच्छकुत्स मनयोर्मध्य इति विजातीयं व्यवधा

यकं निर्दिश्यते गतिर्जातेर्वा समाश्रयणेन नास्ति व्यवायः एवं च गतिरनंतर इत्यनं
तरग्रहणं गतिर्गतावितिवचनात्सिध्यतीति च निर्देश उपपन्नो भवति ॥ ॥ कर्मप्रव
स्यमाणानां संज्ञिनां बहुत्वाद्बहुवचनं प्रयानिपाताः इत्या इति क्वचित्तु सामान्य
विवक्षया एकवचनं गतिश्च प्रत्ययः इत्यादि तिमहती संज्ञाकरणमन्वर्थसंज्ञाविज्ञा
नार्थं कर्म क्रियां प्रोक्तवंतः कर्मप्रवचनीया इति भूते कृत्यल्युटो बहुलमिति क
र्तरि कृत्यः के च कर्म प्रोक्तवंतः ये प्रयुज्यमाने क्रियापदेऽनुभूयंते के बल्ह इत्यादौ
३१ क्रियाविशेषं द्योतितवंतः न संप्रति क्रियाविशेषं द्योतयंति ते कर्मप्रवचनीयाः य
दि संप्रति क्रियाविशेषं न द्योतयंति किं तर्हि द्योतयंति संबंधविशेषं तथा शा
कल्यस्य संहितामनु प्रावर्षदिति न ह्यत्रानुरनुभूयते इत्यादाविव क्रियाविशेषं
द्योतयति क्रियाविशेषाभावात् नापि षष्ठीवत्संबंधमात्रं संहितामिति द्वितीया
यास्तदर्थत्वात् नापि क्रियापदमाक्षिपति यथा प्रादेशं विपरिलिखतीति विशब्दो
विमानक्रियां प्रादेशं विमाय परिलिखतीति । तथा हि सति प्रादेशमिति बल्कार
कविभक्तिप्रसंगः शेषसंबंधस्य चाप्रतीतिप्रसंगः तदेवमनुः संहिता प्रवर्ष
णयोर्थः शेषशेषिसंबंधो द्वितीययाभिहितस्तं विशेषेण स्थापयतीति हेतुहेतु

मद्भावेनाविशिष्टमविशिष्टक्रियाजनितत्वेन वासंबन्धस्य तत्संनिधौ संप्रत्ययात्सं
दितामनुनिशाम्य प्रावर्षदिति उक्तं च क्रियाया द्योतको नायं न संबन्धस्य वाचकः।
नापि क्रियापदापि संबन्धस्य तु भेदकः इति कश्चित्तु प्रवृत्तिनिमित्तासावेपि च न सा
मर्थ्यादियं मरुत्संज्ञा प्रवर्त्तते यथा सुः पूजायां अतिरतिक्रमणे चेति॥ ॥अनु॥
यावतेति यावता शब्दो निपातः न चिह्नार्थः यस्य चार्थ इत्यन्येषां लक्षणेत्थंभूताख्याने
ति तत्र वावचनम् अनोर्ग्रहणं कर्त्तव्यं इत्थंभूताख्यानादिषु यथा स्यात् लक्षणग्रहणं
च प्रसाधयं अतो यावतरसंज्ञातरसाधारणत्वात्त देवास्तु इदं तु न कर्त्तव्यमिति भा
वः हेत्वर्थेति तु शब्दः पक्षं व्यावर्त्तयति हेतुः कारणं सोर्थः प्रयोजनं प्रयोजको यस्य
वचनस्येत्यर्थः ननु च तत्र चात्र च लक्षणग्रहणमेव क्रियते तथा दि हेतुर्लक्षणं न भ
वति इत्यपि न गृह्येत अयत्त्र वति तत्रापि गृह्येतेति पुनरपि नार्थ एतेन तत्राद्य हेतुतृ
तीयामिति सत्यं लक्ष्यते येन तल्लक्षणं चिह्नं ज्ञापकं कारणमपि निपतत्कार्यविशे २२
षावगति हेतुत्वाल्लक्षणं संभवत्येव उक्तं च सा प्येलक्षणेन हेतुरपि व्याप्तः नानेत्रपं
तदेव लक्षणं येन पुनः पुनर्लक्ष्यते किं तर्हि यः सकृदपि निमित्तत्वाय कल्पते तद
पि लक्षणमिति किं तु येन नाप्राप्तिन्यायेन कर्मप्रवचनीययुक्ते द्वितीया षष्ठ्या एवा

पवादः ततश्च लक्षणेत्थंभूते सनोर्लक्षणे कर्मप्रवचनीयसंज्ञाया अवकाशो यो हेतु
र्न संभवति वृक्षमनुविद्योतते विद्युदिति हेतु तृतीयाया अवकाशः धनेन कुलमिति
हेतुः भूते तु लक्षणे उभयप्रसंगे परत्वात्तृतीया स्यात् तामपि बाधित्वा द्वितीयैव य
था स्यात् पुनः संज्ञाविधाने हि कृतां तरपात्वाद्द्वितीयैव तृतीयां बाधते उक्तं च
हेतुहेतुमतोर्योगपरिच्छेदे नुना कृते। आरंभाद्बाध्यते प्राप्ता तृतीया हेतुलक्षणे
ति तृतीयार्थे इत्यनेन पुरस्तादपवादन्यायेन सहयुक्तेऽप्रधान इत्यस्यैव बाधो न
हेतुतृतीयाया इति वक्तव्यमेवेतत्॥ ॥तृती॥ नदीमन्ववसितेति सहार्थे तृतीयार्थः
अन्ववपूर्वात् षिञ् बंधन इत्यस्मात् क्तेरिकः॥ ॥हीने॥ हीनोत्कृष्टसंबंधे संज्ञेति क
र्मप्रवचनीयविभक्तिस्तु अनेन संबंधेन व्यतिरिच्यमाने उत्कृष्ट एव भवति न ही
ने अभिधानशक्तिस्वाभाव्यात् नाप्युभाभ्यामेकयैव द्वितीयया विस्पष्टस्यापि
संबंधस्याभिधानात् षष्ठीवत्॥ ॥उपो॥ अत्राप्याधिकिना विनाधिकस्यासंभवा
का दधिकेऽधिकिसंबंधे संज्ञा विधीयते विभक्तिरप्याधिकिन एव भवति नाधिकात्
उपखार्यां द्रोण इति खारशब्दो गौरादिः खारीकं तावदस्ति अधिकोपि तस्या
द्रोणोऽस्तीत्यर्थः यस्मादधिकमिति सप्तमी॥ ॥अपपरी॥ वर्जते नेति वाक्ये प्र

त्रि २

तिपाद्यमानेनेत्यर्थः पत्रि परिगन्तेस्यइति पंचम्यएॾ रित्तिरिति पंचमीपरेवर्जन
इति द्विर्वचनं कर्मप्रवचनीयेन पंचमीसद्दितेन घोतितेपि वर्जने भवति उभयो
रपि विधान सामर्थ्यात्परि षिंचतीति परिः सर्वतो भावे अत्रास्पासं भा याआभा
वात् उपसर्जने न भवति उपसर्गा सुनोतीति षत्वं भवति चामुत्रादीनामिति नुम् ॥
93 ॥आङ॥ मर्यादाभि रणधर्माणि मनुष्याः ओणादिको यस्त्रत्ययः तैरादीयत इति म
र्यादा आतश्चोपसर्ग इति कर्मण्यङ् प्रत्ययः अवधिमर्यादेति ननु यश्चावधिः
कार्येण युज्यते सोत्ति विधिः पत्रतु न सामर्थ्यादा अवधिस्तत्साधारणः तत्कथ मी
मवधिमर्यादानामप्यत्रार्थः योवधिः सामर्थ्यादिति किं तर्हि मर्यादा सोवधिरित्यर्थः। या।
वचनग्रहणादिति इह मर्यादायामिति वाच्ये यद्वचनग्रहणं क्रियते तस्येतत्प्र
योजनमेवं यथा विज्ञायते तदुच्यते स्मिन्निति तैस्योङो ग्रहणं सत्या त्ति विधिरि ति २ २३
रपीत्यत्राप्यतिविधेर्ग्रहणं। यद्वा वचनग्रहणसामर्थ्यादवान्तरस्ते दोनविव
क्षते अवधिमात्रं गृह्यते आमथुराया इति च ष्ठो देव इत्यपेक्ष्यते मंथ विलोडने
औणादिकः कुरच् प्रत्ययः। ईषदर्थे क्रियायोगे च माभूदिति वाक्ये स्मरणे वा
ङित्वादेवाप्रसंगः तत्रेषदर्थे आकडारः पंचमी न भवति क्रियायोगे समा

वचनं मर्यादायाः वचनं कर्मनिषिद्धप्रकाशः समार... भवति आङ्मर्यादाभिविध्योरितिना ... २३

फु २

हार इतिं गतिर्गताविति निघातोऽत्रभवति ॥ ॥लक्षणे॥ लक्ष्यते येन तल्लक्षणं चिह्नं
ज्ञापकं अयं प्रकारः इत्थंप्रथमांतादिदमस्थमुः इत्यविद मात्रस्यैव प्रकारस्य
सन्निहितस्य कस्यचिद्भावात्प्रकारविशेषमात्रवृत्तिरित्थंशब्दः भूयान्नवा
त्मनेपदी आर्धधातुकेति णिजभावपक्षे गत्यर्थत्वात्कर्तरि क्तः ततइत्थंशब्दादव
यादपिवृत्तिविषये सर्वधर्मोपादानात्कर्मणि द्वितीया श्रितादिषु गमिगाम्यादीना
मितिसमासः कंचित्प्रकारं प्राप्त इत्थंभूतः तस्याख्याने इत्थंभूताख्याने स्वीक्रिय
माणेंशो भागः पल्लवशामात्रेप्रयोगः प्रियंभागइति सेभागसा भ्यातव्यानुमिक्षा स्वो ७
वीप्सासाचाष्टमेस्पष्टयिष्यते एतेचलक्षणादयोपथाविसत्तिः समीपादयोवाप स्था
र्थाः नैवं प्रत्यादीनामर्थाः किंतर्हि संज्ञायाः प्रत्यादीनां विषयत्वेन निर्दिष्टा इत्याद्वी
प्सायांचविषयभूतायामिति एवंचलिंगविपरिणामेन लक्षणादिभिरपि संबं
धनीयं वृक्षं प्रतीति अत्र वृक्षो लक्षणं विद्योतनस्यात्प्रत्याद्य उक्तः प्राप्तिक्रियाजनि
तोलक्ष्यलक्षणभाव इति एवंसंबंधविशेषे वस्थापयंति वृक्षं प्राप्य विद्योतते वृ
क्षप्रदेशे विद्योतते प्राप्तिक्रियाजनित एव विषयविषयिभावः संबंधः यथाव
हेदृष्टे विद्योतनं लक्ष्यते नैवं मात्रा साधुत्वोपपत्तिरिति इत्थंभूताख्याने ग्रहणं॥

इत्यर्थः ॥ साधुरिति...

यदत्र मामिति योऽत्र मम भागः स मदीयतामित्यर्थः अत्रापि स्वीकरणक्रियाजनि
त स्वस्वामिसंबंधः वृक्षं वृक्षमिति अत्र वीप्सादिर्वचनेनैव द्योत्यते परिशब्दस्तु
क्रिययैव संबध्यते द्वितीया चेदं कर्मणि कर्मप्रवचनीयसंज्ञा तु उपसर्गसंज्ञा
निवृत्त्यर्था तेनोपसर्गात्सुनोतीति षत्वं न भवति अपशब्दस्य चर्यादिति परि
शब्दोऽयं दृष्टोपचारः वर्जने चावर्जने च कर्मप्रवचनीयः अपशब्दस्तु वर्जन ए
व कर्मप्रवचनीयाधिकारे च पंचमी विधीयते तत्र साहचर्यं व्यवस्थाहेतुः ॥ अभि
रभागे ॥ अभाग इति भिन्नविषयं प्रयोजनं च परिज्ञातुम् अत एवाह यदत्रमीय
व्या ति भागः स्वीक्रियमाणोंशः यदत्र मे मां प्रति स्यादिति न चैवं संज्ञाविज्ञानादेवानन्त
विष्यति संप्रत्ययेव ह्यस्यावस्ति वि भाजनक्रियां द्योतयति प्रत्यादीनामपि तद्विनस्या
त्वचनाद्भविष्यति असेरपि तर्हि प्राप्नोति तस्मादभाग इति वक्तव्यं तत्रोपसर्ग
त्वादुपसर्गप्रादुर्भ्यामिति षत्वं अथैवं कस्मान्न कृतं लक्षणेत्थंभूताख्यानवी
प्सास्विति प्रतिपरीभागे च चकारात् लक्षणादिषु पितृतोऽनुलक्षणे च चकारादभा
गे लक्षणादिषु च ततो हीने उपाधिके चेति एवं हि द्विरनोग्रहणं अभाग इति
च न वक्तव्यं भवति एवमपि द्विरकारग्रहणं क्रियते इति पदयोः साम्यं अत्र

रत्ना॰ पर्वं तु नादृतं॥ ॥प्रतिः प्रति॥ मुख्यासदृशार्थ इति मुख्यः क्वचित्कार्ये त्वानुव
वादो दृष्टसामर्थ्यः यस्तु तदभावे तत्कार्यकरणायोपादीयते स प्रतिनिधिः कर्म
णो कि प्रत्ययः दत्तस्येति उक्तेषु र्णान प्रतियातनमिति प्रत्ययेणत्वो अर्जुनेतः प्र
तीति प्रतिनिधिप्रतिदाने च यस्मादिति पंचमी प्रतियोगे पंचम्यास्तसिः माषानि
ति तिलेभ्यो गृहीत्वा माषान्ददातीत्यर्थः। ॥अधिपरी॥ ननु चानर्थकयोः क्रियायोगा
भावादत्सुपसर्गसंज्ञयोः प्राप्त्यभावान्न तद्बोधनार्थं कर्मप्रवचनीयसंज्ञाविधान
मुपपद्यते नापि परिशब्दयोगे पंचमीविधानार्थं तद्विधौ वर्जनार्थस्यैव रूपत्वाद
पादानत्वाच्च सिद्धा पंचमी यथाधिशब्दस्य प्रयोगे कुतो ध्यागच्छतीति अत एव द्वि
तीयाविधानार्थमपि नोपपद्यते तस्मादनर्थकयोः संज्ञाविधानमनर्थकमत आ
हानर्थांतरवाचिनाविति यातिष्ठति अधितिष्ठति भवति परिभवतीत्यादौ धातू
पात्तादर्थांतरवाचित्वं नैवमत्रार्थांतरवाचित्वं किंतु आगच्छतीति प्रयोगे योर्थः
स एवाधिपरियोगे ताभ्यामप्युच्यते तदत्र विषये धातोरधिपर्योश्च ससंनिधाने
तं यथा गजशब्दे योर्थः स एव मतंगज इति सर्वैः सदासिधीयते एवं वृषशब्दे योर्थः
स एव वृषभशब्दे तदेवमनर्थांतरवाचित्वादनर्थककल्पत्वादनर्थकावित्युक्तौ न

त्वर्थाभावात्तयोश्च गतिसंज्ञाबाधाय कर्मप्रवचनीयसंज्ञाविधेयेति दर्शितं भ
वति कुतोऽध्यागच्छतीति किंशब्दादपादाने चाहीयरुहोरिति तसौ तसेश्चेति तसि
लादेशः गतिर्गताविति निघाताभावः ॥ ॥ सुः पू ॥ सुसिक्तं भवतेति भवेच्छब्दा
ल्लकर्तरि तृतीया कर्मप्रवचनीययुक्ते द्वितीया न भवति उपपदविभक्तेः कारकवि
भक्तिर्बलीयसीति सुषिक्तं किं तवात्रेति त्वपर्यायेन पूजा ॥ ॥ अपिः ॥ पदांतरस्यप्रा
दिस्वार्थस्तावद्व्यभिचारान्न गृह्यत इति पदांतरस्यार्थः पदार्थः तत्रापि पदांतर
प्रयोगे सति अपिः प्रयुज्यमानस्तदर्थं किंचिद्विशेषमाधत्ते यथा नीलशब्द उत्पले।
न तु तस्मिन्नेवान्यूनानतिरिक्ते वर्तते तथा सति पर्यायत्वप्रसंगेनाप्रयोगार्ह
त्वात् अतः पदांतरस्याप्रयोग एव तदर्थवृत्तो भवतीति भावः। सर्पिषोऽपि स्यादि
ति प्रार्थनायां लिङ् तस्या एकदुर्लभत्वविषयतामपिशब्दो द्योतयन्स्यादित्यने
न संबध्यत इति षत्वप्रसंगः दुर्लभत्वं च विषयस्यैव भवति यदि तस्य बिंदुमात्र मपिन
लभ्यते इत्यपिशब्दसामर्थ्याद्बिंदुरिति गम्यते तदाह मात्राबिंदुस्तोकमित्यस्या २२५
र्थेऽपि शब्दो वर्तत इति तदुपजनिते च व्यतिरेके सर्पिष इति षष्ठी द्वितीया तु न भ
वति अपिनायोगाभावात् स्यादित्यनेन संबध्यत इत्युक्तं अधिकार्थवचने

नेति। यावत्यर्थेस्य सामर्थ्यं ततोधिकमप्यर्थं ब्रुवन्नसेकादौ शक्तिमाविः करोति
तस्से सावनमित्यर्थः। अपि सिंचेदिति संभावने लिङ्। तस्यैवद्गुः करविषयतामपि
करोद्रू कामचार इत्याप वृत्तिः। अपि सिंचेति सिंच वास्त्रदिवा यथेष्टं कुर्वित्यर्थः। ग
र्हां द्योतयितुं जाल्माःपदेशः। अपि सिंचेदिति गर्हार्थे लिङ्। उपसर्गसंज्ञा बाधना
दितिस्यादित्यत्रोपसर्गप्राद्दुर्भावमितिसिचउपसर्गात्सुनोतीतिषत्वप्रसंगः।। ॥अधिरी॥
तदयमितियथाहीनन्द्रत्यत्रहीनोत्कृष्टसंबंधे संज्ञा उपोधिके चेत्यत्राधिकाधिकि
संबंधे तयोरत्रापीत्यर्थः। विभक्तिस्तत्रान्यतरस्मादुत्पद्यते इद्दतु न तथेत्याहक
दाचिदिति यस्य चेश्वरवचनमित्यत्रार्थद्वयं ईश्वरशब्दो सावप्रधानः यस्य स्वा
मिनईश्वरत्वमुच्यते तस्मात्स्वामिनः सप्तमीत्येकः। यस्य स्वस्य ईश्वर उच्यते तस्मा
त्स्वात्सप्तमीत्यपरः। तत्र यदा स्वाम्यर्थे व्यतिरेकविवक्षा तदा ततः सप्तमी स्वस्य तु
तत व्यतिरेके इति न पुनरुभाभ्यां युगपद्भवति एकयैव विभक्त्याभिहितस्यापि संब
धस्याभिधानादिति मत्वा कदाचिदित्युक्तं। अधि ब्रह्मदत्ते इति ब्रह्मदत्तस्य स्वाः
पंचाला इत्यर्थः। अधि पंचालेष्विति पंचालानां ब्रह्मदत्तः स्वामीत्यर्थः।। ॥विभाषा॥
अधिरीश्वर इत्यनुवृत्तेः प्राप्तविभाषेयं पदत्रमामधिकरिष्यतीति अधिपूर्वः

करोतिर्विनियोगे वर्त्तते यथाधिकृतो यमिह ग्रामे स्वरितेनाधिकार इति च स्वरोस्त
वत्येवमत्रमांविनियोगीह्यतं इत्यर्थः कर्मणि द्वितीयेत्यादौ यद्येवं संज्ञाविधानस्य
किं प्रयोजनं तत्राह कर्मप्रवचनीयसंज्ञा प्रहृत इति निपातैर्यद्यदिहीति निघातप्र
तिषेधात्स्यपूर्वस्य यस्वरेणाति ङ तस्तु दात्तवत् ॥ ॥ल: प॥ ल इति षष्ठीति अथ प्रथमा
बहुवचने को दोषः आम इति लावस्थायामेव लुप्यमानस्य लिटः संज्ञा स्यात्
ततश्च इत्यामित्यत्राम् न स्यात् नह्येतौ लिदुरः संभवति शेषादेव परस्मैपद
मिति नियमात् ज्ञापकात् लिङ्ं यदयं आम्प्रत्ययवदित्याह तत् ज्ञापयत्यात्मनेपदिभ्यो
प्याम् इति अथ यं तर्हि दोषः लकारस्यैव संज्ञा स्यात् न तदादेशानां तिबादीनां इति स्था
निवद्भावात्तेषामपि संविष्यतीति ङानावात्मनेपदमित्यत्र तर्हि ल इति प्रथमा तस्य
तङानाभ्यां संबन्धो न स्यात् न हि तङानौ लौ संभवतः ननु चैवं विज्ञास्यते तङानौ सा
वी लकार एव तङानावित्युक्ते इति एवमपि गत्यन्तरे सति न क्लिष्टकल्पना युक्ता तस्मा
ल्ल इति षष्ठी आदेशापेक्षेति न तु संज्ञापेक्षा लकारस्य परस्मैपदमित्येषा संज्ञा
स्भवतीति कुतः सामानाधिकरण्येन प्रायेण संज्ञाविधानात् किं च उस्य हेयो दो
षः सोस्मिन्नस्यापि स्यादुभयत्र लकारस्य संनिहितात् तस्मादादेशापेक्षा षष्ठीय

येवं समनवकाशा पुरुषसंज्ञा परस्मैपदसंज्ञां शालङ्कस्थोः सावकाशां बाधेत तदस्य
र्थं तु लकारस्य परस्मैपदसंज्ञेति ज्ञं तु पुरुषसंज्ञेति तिन्न विषयत्वान्नास्ति बाधप्र
प्रसंगः। यद्यपि जस्य पक्षेपि तिबादीनां लादेशानामपि स्थानिवद्भावादेशाद् इति अनेन
परस्मैपदसंज्ञा भवति तथापि तस्यानंतरीयकत्वात् समावेशसिद्धिः षष्ठीपक्षेपि ला
पका सिद्धं यदयं सिच्चिवृद्धिः परस्मैपदेष्वित्यादृत ज्ञापयति भवति तिङादीनामप्ये
षा संज्ञेति न हि सिज्विषये शालक्सः सम्भवतः सामान्यापेक्षं च ज्ञापकं इत्यात्मनेप
दसंज्ञयापि पुरुषसंज्ञानां समावेशसिद्धिः अन्यथा परस्मैपदेषु सावकाशा पुरु
षसंज्ञास्ति ङ् इत्येनवकाशयात्मनेपदसंज्ञया बाध्येत न अथवा पुरुषसंज्ञायां पर
स्मैपदात्मनेपदग्रहणानुवर्त्तेः अयमर्थो भवति तिङः परस्मैपदसंज्ञकाः सन्तः त्री
णि पदानि त्वा प्रथमादिसंज्ञा भवन्तीति तेन समावेशसिद्धिः॥ तङानावा॥ अ
यं कस्मात् योगस्यानंतरमेवैतत्संज्ञेन विहिते एवं हि पुरुषसंज्ञाभिरयत्नसिद्धो
नयोः समावेशो भवति तत्रोदप्रवर्णेति आत्मनेपदसंज्ञया परस्मैपदसंज्ञाया
बाधो यथास्यात् इत्येवमर्थमस्मिन्प्रकरणे तयोर्विधानमिति भावः महासंज्ञाक
रणं पूर्वाचार्यानुरोधेन॥ ॥तिङः। त्रीणि त्रीणीति वीप्सायां द्विर्वचनं तत्र च समुदा

पस्यावयवयोस्य पचकू पदत्वमिष्यते आमपचसिपचसि देवदत्ते त्यैकांतरताय
थास्यात् कुं डुं कुं डं वा कूवाकू अपचन्नित्यादौ पूर्वपदेप्यनुस्वारादिकं पदकार्यं
यथास्यादितितेन पदच्छेदकाले त्रीणि त्रीणि त्यैकं पदं द्वे वा इरुति ऊं षडुत्रिकाः
संज्ञास्त इति स्वरूति वैषम्यात् संख्यातानुदेशो न प्राप्नोतीति तत्र यद्यप्येकैकस्य त्रिकस्या
नेकसंज्ञाविधाने प्रयोजनं नास्ति नैतावता यथात्तिमत विषयलाभः तत्राह इति
ऊष्टादशप्रत्यया इत्यादि एवमन्यते संज्ञाः षडेवकैथं एकशेषनिर्देशोयं तत्रच
यदि प्रथमस्य प्रथमस्य प्रथमौ उत्तमस्य उत्तमौ प्रथमौ च मध्यमौ च उत्त
मौ च प्रथममध्यमोत्तमा इति हलते कशेषालीढं ढः क्रियेत ततो नेसिमत ८ संख्या
तानुदेशो नस्यात् तस्माल्लेत द्वंद्वानामेकशेषः प्रथममध्यमोत्तमाश्चेति नचैवम
पिनश्यापते किमादित आरभ्य त्रीणि वचनानि गृह्यंते आहोस्विदिकात स्त्रिकपरि
यह इति नहि त्रिकपरिग्रहे पि यथासंख्या चास्त्व क्रमते किं तर्हि गृह्यते षु संज्ञाना
क्रमेणासंबंधं विधत्ते एवं तर्हि लोकत एवतत्सिद्धं तद्यथा विहव्यस्य द्वाभ्यां द्वा
भ्यामग्निरूपस्थेय इति नचोच्यते आनुपूर्व्येणेति अथ च विरूद्धाख्यस्य क्रमस्य
आदित आरभ्यानुपूर्व्येण द्वाभ्यां द्वाभ्यां मन्त्राभ्यां अग्निरूपस्थीयते नयाभ्यां का,

मध्यमप्रथम ध्यमउत्तमम ध्यमौ च

प्रथम मध्यमोत्तमाश्च प्रथम मध्यमोत्तमाश्च

आत्मनेपद ग्रहणं ४

स्यांचित् तत्र तिङोऽष्टादश प्रत्ययाः इत्यनेनादित आरभ्य त्रिकाणामानुपूर्व्येण ग्र
हणेनैतत् इति दर्शयितुं सन्निवेशोऽस्तीति दर्शितं नव परस्मैपद संज्ञका इत्यादि
नानुक्तं तद्विधानामेकशेषानुक्तेः एकशेषाणां द्वंद्व इति दर्शितं यदि वा परस्मैपदं ग्रह
णं चानुवर्त्तते तिङः इणां तु शास्त्र कस्थान निवृत्त्यर्थं तदनुवृत्तौ च दोषाशंसि बतः तयोश्च
व्यापारत्ते देनसर्व मेतत्स्ववर्त्तते तत्र चैकैकत्र यास्त्रिका इति यथासंख्य सिद्धिः स्वपद
तत्र न चेत्यादिना शास्त्रिद्वयं दर्शितं तत्रेत्यादिना तु व्यापारत्तेदः अत्रापि महासं
ज्ञाकरणं पूर्ववत् ॥ तान्येकवचन ॥ एक शब्द इति संख्येकवचनाद्वेवी प्सायामिति
प्रथमांतानद्भि सर्वक्तत्वादेव त्रीणि त्रीणीत्यस्य संबंधे सिद्धे तानीति वचनं पुरुष
वचनसंज्ञयोः समावेशार्थं अन्यथा हि एकसंज्ञाधिकारे वचनं ज्ञामाएष्यापर्या
यः स्यात् ततश्चाइ उत्तमस्यापि च नित्यङित इत्यादि कार्यं वचनसंज्ञापक्षे उत्तमसं
ज्ञाया असावान स्यात् तानीत्यस्मिंस्तु सति तान्येतानि प्रथमादिसंज्ञाविशिष्टानि
त्रीणि त्रीणीत्येवं परामर्शात्स्त्र प्रथमादिसंज्ञानामेव वचनसंज्ञाविधानात्
सर्वत्र समावेशः ॥ ननु त्रिकाणां पुरुषसंज्ञा एकैकस्यैव वचनसंज्ञेति विषय
भेदान्नायमेकसंज्ञाधिकारस्य विषयः तन्न यथावृद्धिसंज्ञा प्रत्येकमादैवां

भवति तथा पुरुषसंज्ञापि त्रीणि त्रीणि वचनानि त्रिषु वर्त्तमानान्यपि तिबादिषु प्र
न त्येकमेव प्रवर्त्तते समुदाये तस्य प्रयोगे असावास्य प्रत्येकमेव तेषां धातोरुत्पत्ते:।
त्रिग्रहणं तु मर्यादार्थं आदितआरभ्य त्रयाणां प्रथमसंज्ञा भवतीति न पुनः
समुदाये संज्ञाप्रवृत्तिसिध्यर्थं तानि तिङस्त्रीणि त्रीणि पदानि भवन्तीति तिबा
दिसूत्रे समाहारद्वंद्वे अष्टादशावयवपदानि तिङ् शब्दस्य त्रीणि त्रीणीत्यने
न समानाधिकरणस्यापि पुल्लिंगता सूत्रवद्भवति॥ ॥सुपः॥ सुबिति प्रत्याहा
रग्रहणं प्रथमैकवचनादारभ्याऽऽसुपः पकारात् कप्पस्य पकारेण न भवति ज्ञा
पद् श्रीपानां विभक्तिसंज्ञाविधानात् अन्यथा विभक्तिसंज्ञायामपि इदमेव
सुपग्रहणमनुवर्त्ततइति सुप्त्वादेव सिद्धेरनर्थकं तत्स्यात्॥ तिङां त्रिकेष्विति
किमर्थं पुनरिदमुक्तं इह कश्चिन्मन्येत सूत्रेच कारस्यानुकरणसंज्ञामात्रमे
वसंबध्यते नान्यत् किंचिदिति तं प्रति दृष्टांतप्रदर्शनेन त्रीणि त्रीणी प्रत्येकशब्द २२८
स्यनयोरनुवृत्तिं दर्शयति यथा तिङां वचनसंज्ञा विहिता तथैव सुपामपीत्य
र्थः तथा च स्वयं च शब्दं पठित्वा व्याचष्टे सुपश्चेत्यादि॥ ॥विभक्तिः॥ वकारः पु
रुषवचनसंज्ञास्यासमावेशार्थः तिङां व्यवहितानामपि स्वरितत्वादनुवृत्तिः

तिङां विभक्तित्वे प्रयोजनमाह तामादौ न विभक्तौ तुस्मा इति प्रतिषेधः सुपां तु यथा
द्यवादिकमपि॥ ॥युष्मद्युपपदे॥ किं लस्य तिबादय इत्यनेनैकवाक्यतामापन्नेना
नेन तिबादीनां विशिष्टविधानं उत विहितानां तिबादीनामस्ति चैनानेन वाक्येन नि
यम इति संज्ञायां नियम इत्याह लस्येत्यधिकृत्येति विशिष्टविधाने त्वितरेतराश्रयं स्या
त् सतां तिबादीनां प्रथमादिसंज्ञा संज्ञया च तिबादयो भाव्यं तदिति स पुनर्नियम
उपपदनियमो वा स्यात् युष्मदि मध्यम एव अस्मद्युत्तम एव शेषे प्रथम एवेति पु घु
रुषनियमो वा युष्मद्येव मध्यमः अस्मद्येवोत्तमः शेष एव प्रथम इति तत्राद्ये नियं
मे कुर्वन्त्वं कुर्वाणस्त्वं इति युष्मदि शास्त्र्यानचौ न स्यातां तृजादयश्च न स्युः कर्त्ता त्वं
कारकस्त्वमिति नैष दोषः एतावान्विषयः युष्मदस्मदुपपदे शेषश्चेति सर्वश्चासौ किंच५
व पुरुषेषु नियतः उच्यते ये तृजादयः ते वचनाद्ध विषयं तितुल्यजातीयस्य नियमेन
व्यावृत्तिः युष्मदि मध्यम एव न प्रथमोत्तमौ अस्मद्युत्तम एव न प्रथममध्यमौ
शेषे प्रथम एव न मध्यमोत्तमाविति एवं तर्हि तिबादि सूत्रे विधीयमानत्वात्साधा
न्यात्तेषामेव नियमो युक्तः शेषग्रहणाच्चोपपदनियमे हि युष्मदस्मदी नियते
पुरुषा नियमिताः शेषश्चानियतः तत्र प्रथम इत्येतावदुच्यमानं नियमार्थं वि

स्यापतेतत्र च नियमांतरस्यासंभवात् प्रथम एवेति नियमः। यत्र च प्रथमाप्रथ
मप्रसंगः तत्रैवं विधो नियमः कर्त्तव्यः। शेष एव च तथा प्रसंग इति तत्रैव नियमो
भवति किं शेषग्रहणेन। अपुरुषनियमे तु मध्यमोत्तमौ नियतौ युष्मदस्मदोः अ
नियते प्रथमस्तत्र युष्मदस्मदोरपि प्रथमप्रसंगे शेष एव प्रथम इत्येवं प्रथ
मनियमः कर्त्तव्यः नचांतरेण शेषग्रहणं एष नियमः शक्यते कर्त्तुमिति कर्त्त
व्यमेव शेषग्रहणं अतः शेषग्रहणात् अत्र कारस्यापि पुरुषनियम एवास्तिचे
त इति तमेव आश्रयति तेषामयं पुरुषनियमः क्रियत इति तेषामित्युक्ते ताव
यवेऽसेदस्तिबादिसमुदाय उच्यते पुरुषापेक्षावयवषष्ठी तेषां तिबादीनामव
यवो मध्यमपुरुषस्तस्योपपदे नियम इत्यर्थः। सापेक्षस्यापि पुरुषशब्दस्य ग
मकत्वात्समासः। अथवा तेषामिति कर्मणि षष्ठी पुरुषद्वारकृतो नियमः पुरुष
नियमः। पुरुषनियमद्वारेण तेनियम्यत इत्यर्थः। उपोच्चारितं पदं उपपदं श्रौ २२९
कपार्थिवादित्वादुत्तरपदलोपी समासः उपशब्दः सामीप्ये तत्र च व्यवहिते न
भवितव्यं इति शंकामपनयति व्यवहिते चेति समीप इत्येव सिद्धे उपपदग्रहणा
दपेक्षिकस्यापि स्यौ सामीप्यस्य ग्रहणं व्यवहितमपि व्यवहिततरापेक्षया संनि

हृष्टं भवतीति भावः उपपदग्रहणं तु पूर्वसूत्रेपि युष्मदि यथा स्यात् अन्यथा तस्मि
न्निति निर्दिष्टे पूर्वस्येति परसूत्र एव स्यात् ननु यथा स्थानिन्यपीति वचनात् सर्वथा
प्रयुज्यमाने भवतीति तथा पूर्वप्रयोगेपि परसूत्रं स्यादप्रयोगात् स्थानिनीति न विषयतिने
तदस्ति सप्तमीनिर्देशात् प्रयोगपक्षे परसूत्र एव स्यात् समानाभिधेय इति अधिक
रणशब्दोभिधेयवचन इति दर्शयति केन पुनः समानाभिधेयेन लकारेण नियम्य
मानेन वा पुरुषेण चात्रैव विधेयं चाभिधेयं लकाराणां भावः कर्मकर्तारः तत्र [illegible]
नो युष्मदस्मदो भाववाचिना लान्तेन सह सामानाधिकरण्यासंभवात् कर्मणो
३ रेवयग्रहणामित्याह तुल्यकारकमिति तुल्यमेककारकं यस्य तत्तथोक्तं स्थानिन्यपी
ति स्थानशब्दः प्रसंगवचनः स्थानमस्यास्तीति स्थानी तत्र च प्रयुज्यमानस्याप्रयु
ज्यमानस्य च प्रसंगोस्ति उच्यते चेदं स्थानमस्यास्तीति तत्र सामर्थ्यादवधारणं विज्ञा
यते प्रसंग एव यस्य न तु प्रयोग इति यद्वा स्थानिकार्यप्रसिद्धिरेषा यस्य स्थाने आ
देशो विधीयते स स्थानीति इह तु अप्रयुज्यमानता साधर्म्यो युष्मदि प्रयुज्यते
सर्वथा स्थानिन्यपीत्यस्याप्रयुज्यमानेपीत्यर्थः अपिशब्दात् प्रयुज्यमानेपि तदा
ह स्थानिनीत्यादि स्थानिन्यपीति कोर्थः प्रयुज्यमानेप्यप्रयुज्यमानेपीत्यर्थः उप

अस्मदर्थवर्तीति २

पदग्रहणं प्राप्तस्य चार्थस्यापि शब्दोऽनुवादः। समानाधिकरणग्रहणं त्वं पापच्यस इ
त्यत्र मा भूदिति क्वचिद्वृत्तावेवायं गम्यः पच्यते इह चातित्वं पचतीति क्रांत प्रधाने स
मासे युष्मदस्मदोरसामानाधिकरण्यात् प्रथम एव भवति इह त्वीषदसमाप्तस्त्वं
त्वत्कल्पः पचसि मत्कल्पः पचामीति कल्पतरद्दृष्टौ गुणरहितौ युष्मदर्थ एवोच्य
ते इति मध्यमोत्तमौ भवतः तत्सदृशापदार्थान्तराभिधाने तु प्रथमः। त्वत्तरः पचसि म
त्तरः पचामि परमस्त्वं पचसि परमाहं पचामीति कान्तरदृष्टगुणरहितौ यु
ष्मदर्थ एवोच्येते इति भवत्येव एवं युष्मदर्थे मध्यमः अस्मदर्थे उत्तम इति एत
वतासिद्धे युष्मदस्मदर्थे चेल्लकार उत्पन्नः तमेव मध्यमोत्तमावित्यर्थः तथा तु
नहतमित्येवं इसात्वं संपद्यत इति त्वद्भवतीति भवति प्रकृतेरेव विकाररूपेण
संपत्तौ कर्तृत्वात् एतच्चोन्मदत इत्यत्रोपपादयिष्यामः तथा च मं त्रेपद स्याम
हत्वं इति अहत्वं स्यात्वं वा अहं स्यामिति प्रकृत्यास्य यः पुरुषो दृश्यते इह भवान्
वृत्तिति युष्मदर्थवर्तीते: स्थानिन्यपि मध्यमः प्राप्नोति न वा युष्मदर्थत्वात् अ 230
लिंग: संबोधनविषयस्य युष्मदर्थः भवदर्थस्तु लिंगवान् न च संबोधने क
विषयः यथैव द्दिमाणवकाधीष्वेत्यमुखीभावो गम्यते एवं त्वमधीष्वेत्यपि तथा

च युष्मदः सर्वत्र संबोधने प्रथमा आमंत्रिताद्युदात्तत्वं च भवति पदात्परत्वे च नि
घात इति केचिदाहुः। उक्तं च संबोधनार्थः सर्वत्र मध्यमे कैश्चिदिष्यते तथा संबो
धने सर्वा प्रथमा युष्मदो विदुः। युष्मदर्थस्य सिद्धत्वात् नियताद्युदात्तता युष्म
दः प्रथमा तस्य परस्मैन्न पदे दसौ इति सत्यं संबोधनेक विषयो युष्मच्छब्दः प्रथ
मा तु सुदेव असि मुखीभाव स्यापि प्रादिपदिक एवान्तर्भावात् प्रत्येकत्वेन तद्भाव
स्तत्र तदसि घोतनाय संबोधने चेति प्रथमा विधीयते स्वरोपि अन्यथा पुर्वद् द्विस्वः
पे स्वः पतिः पूर्यंपात स्वस्तिसि: दृषदे वायूय मिदापय स्व इति पदादावप्यं तोदात्तत्व
पदात्परत्वेप्यनिघातः तदेवं भवच्छब्दस्या संबोधन विषयत्वाल्लिंगवत्वाच्च यु
मो ष्मदर्थविषयत्वान्मध्यमो न भवतीति स्थितं॥ ॥प्रहासे॥ प्रहासे गम्यमाने इति
यत्र भूतार्थाभावात् वचनेवक वक्तृत्वं तच्च वक्तुरत्ति प्रायाविष्करणेन प्रहासोग
म्यते मन्यतिशब्दस्य एकदेशानुकरणं मन्य इति मन्य उपपदे यस्य सतथोक्तः
लस्य धातो विधानात् दा देशा त्वाच्च मध्यमस्य धातु रन्य पदार्थः तदाह मन्योप
पदे धातावितिप्रकृति भूते सतीत्यर्थः। स चैकवदिति अपदार्कश्चो त्तमस्यैक
वद्भावः एकस्यार्थस्य वाचको भवतीत्यर्थः। द्वयोर्बहुषु च मंत्स्ये एकवचन

मेव भवतीति यावत् यत्र हि द्वौ मंतारौ बहवो वा तत्रैकवद्भावो विधेयः अन्यत्र
तु मंतुरेकत्वादेव सिद्धः एकवच्चेति चशब्दो न्वाचये तेनैकवद्भावो वा सावपि प्र
धान त्रिषोमध्यमोत्तमौ भवतः अर्थाच्चयमेवदर्शयितुमयं न साध्यमेकमं
तारमुदाहरति एहि मन्ये ओदनं भोक्ष्यसे इति सत्यमोदनं भोक्तुमागतं स्था
लादिकं त्वयेत स्यायुज्यते इति परिहासावगतिः द्विषं कोस्कुउदाहरणे एवंम
न्ये ओदनं भोक्ष्ये न हि भोक्ष्यध्वे दि भुक्तः सोतिथिः एवं मन्ये रथेन यास्यथ न हि
यास्यथ यातस्तेनाचार्य इति मध्यमोत्तमयोः प्राप्त योरिति युष्मदस्मदर्थस्य
गम्यमानत्वास्तु उदाहरणं वस्वात्तुनमुपपद ग्रहणं युष्मदासं बाधुं तत्रातत्ये
वेशाप्यनुवर्त्य इह माभूत् एतु भवान्मन्यते ओदनं भोक्ष्ये न हि भोक्ष्यसे भुक्तः
सोतिथिरिति तदत्राकथं मन्यतिनास्ति समबंधमिति पुनरिहोपपदग्रहणं अ
न्यथा मन्यतौ परत एव स्यात् त्वयना निर्दिष्टान्मन्तान इत्यस्य ग्रहणं न तु मनु
बोधन इत्यस्य एहि मनुर्णे रथेन यास्यामि इत्येव तस्य भवति अन्युदाहरणे अ
तिथिं प्रति भुक्तार्थवचनं॥ ॥ अस्मद्युत्तमः। यत्र युष्मदस्मदादेप्युपपदे भवतः
तत्र यदि कर्तृशक्तीस्वाधारनियते विवक्ष्येते तदालकारोपि भेदे नोत्पद्यते एवं चा

देवपचसि च पचामि चेति सरूपविवक्षायां तु द्वयोरपि शास्त्रयोरेकोऽलकार उत्पद्य-
ते तत्र युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन त्वं चाहं च पचावः अहं च त्वं च
व त्रहं स पुज्यावेति यदापि त्वदादीनां पूर्वपरमिति अस्मदादेशो तदापि स्थानिन्यपीति
मध्यमप्राप्तोपरत्वादुत्तम एव भवति आवां पचाव इति ॥ ॥ शेषे ॥ उपपदमिति नि-
वृत्तं शेष इति विषये सप्तमी न पुनः शेष उपपद इति तदाह शेष इति मध्यमोत्त-
मविषयादन्य उच्यते इति अन्योऽपि विषय इत्यर्थः यत्र युष्मदस्मदी समानाधिक-
रणेन स्तः तत्रेइ इति एते न युष्मदस्मदोरभावः शेषः नैः पुनरन्यसञ्ज्ञावदिति दर्श-
यति किं सिद्धं भवति इत्यत्र च देवदत्तश्च पचथः अहं च देवदत्तश्च पचावः त्वं चा-
हं च देवदत्तश्च पचाम इति यद्यपि युष्मदस्मदोरन्यस्य च यः समुदायः स युष्म-
दस्मज्ज्ञामन्यः तथापि युष्मदस्मदी तावत्स्त इति तत्सञ्ज्ञाव निमित्तौ मध्यमोत्तमौ
भवतः न तु तदभावे प्रनिमित्तः प्रथमः अन्यसञ्ज्ञावे तु निमित्ते स्यादेव प्रथमः ।
यदाह तत्रे युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति ॥ ॥ परः संनि ॥
परःस्रो बद्धो तिशायेन वर्तते इति परं मुखमिति यथादिगादिषु वर्तमानस्य ग्रहणं
न भवति सन्निकर्षस्य दिग्देशाकालायोगात् अपान्तरापेक्षं मन्यत्व मव्यभिचा-

रिसंनिकर्षः प्रत्यासत्तिरिति न तु संश्लेषः तस्य वर्णेष्वसंभवात् स हि संयोगश्च
द्रव्यधर्मत्वान्न शब्दस्य गुणस्य संभवति समवायश्चेन्न वर्णो वर्णे समवैति शब्
दस्याकारणासमवायित्वात् येषां तु शब्दो द्रव्यं तेषां न क्वापि शब्दः समवैति अति
शयोपि संयोगसमवाययोः कीदृश इति न विद्मः प्रत्यासत्तेः स्वापेक्षाभेदात् संभ
वति प्रकर्षाप्रकर्षयोगः तस्मात्प्रत्यासत्तिरेव संनिकर्षः ननु च क्रमेणोच्चार्यमा
णेषु वर्णेषु पूर्वस्य वर्णस्य ये निष्पादकाः स्थानादयस्तेषां व्यापारसीरोपरतौ वर्णा
१ न्तरस्य निष्पादकाः तेषां व्यापारारंभे तत्रावश्यं मध्ये कियत्यपि कालकला भवति।
सूक्ष्मत्वान्नोपलभ्यते पद्मपत्रशतव्यतिभेदवत् तत्कोयं परः संनिकर्षः स्यात् अ
र्द्धमात्राकालव्यवधानमिति सत्यमेतावद्व्यवधानमवर्जनीयत्वात्सह्यते अधि
केन तु कालेन व्यवधानं परग्रहणेन व्यावर्त्यत इत्यर्थः यद्येवं द्रुतायामेव वृ ६
त्तौ स्यान्न मध्यमायां विलंबितायां वा न हि तथा तयोः संनिकर्षः यथा द्रुतायां
तुल्यः संनिकर्षः सर्वासु वृत्तिषु नैरंतर्येणोच्चारणात् वर्णोपलंभकालभे
दात्तु वृत्तिविशेषः द्रुतायां स्वल्पः उपलब्धिकालो मध्यमायामधिकः विलंबि
तायामधिकतरः द्विविधा हि ध्वनयः प्राकृता वैकृताश्च प्राकृता वर्णानामुत्पा

दकाः वेक्षुतैः तु पुनः पुनरुपलंभः मध्यवर्त्तीति कालः सर्वासु वृत्तिषु तावानेव यद्वा
यस्यां वृत्तौ यावता कालेन व्यवायो वर्ण्यं भावी तावतो द्विकेन व्यवायः परग्रहणे न
व्यावर्त्स्यते पदस्य पदांतरेण यदानंतर्यं तत्रैव लोके संहिताशब्दः प्रसिद्धः तथा च सं
हितामधीते न पदानि पदान्यधीते न संहितामिति वक्तारो भवंति तत्रश्चकुमायावित्या
दौ पदावयवे संहिताकार्यं न स्यादिति सूत्रारंभः॥ ॥ विरामो॥ विरतिर्विराम इति भा
वे घञ् विरामो वर्णोच्चारणाभावः अर्थांतरमाह विरम्यते नेनेति विराम इति ल्य
ल्युटो बहुलमित्य संज्ञायामपि हलश्चेति करणे घञ् पूर्वत्राभावः संहीउत्तरत्रां
त्यो वर्णः तेन द्विविरम्यते तत्राद्येपक्षे स्वरवसानयोरिति परसप्तमीकर्थे पुनरवसा
नेन पौर्वापर्यं अभावो हि सः स्वरिवाकर्थे न हि यदा स्वरस्थितदा रेफः पदारेफस्मा
दानस्वरवर्णानां क्रमस्ताविवाडुच्चारितवंसवाञ्च अथतत्र बुद्धिपरिकल्पितं
पौर्वापर्यं तदभावेपि समानं एवं चावसान इत्यत्रापि द्वितीये तु पक्षे स्वरवसानयो
रित्येकापि सप्तमी विषयभेदाद्भिद्यते स्वरिपरतो रेफस्य विसर्जनीयो भवति अव
सानेचरे फे स्थानिनि विसर्जनीय इति स्थान्यादेशास्य विषयतया विवक्ष्यते एवं
वावसान इत्यत्रापि दधि मधु इति अणो प्रगृह्यस्यानुनासिकः तत्र वावसान

इति वर्त्तते ननु लोक एवावसानशब्दो विरामे प्रसिद्धः यद्यप्येवं पूर्वस्यतिः अ
वगतावपि वर्त्तते केनैव तदवसीयत इति प्रश्नः सर्वेपि वावस्थितो देवदत्त इति अ
वसानशब्दस्तु विराम एव प्रसिद्धः न चैकस्यावगति प्रश्न भवयोः करणत्वं
संभवतीति नार्थः संज्ञीकरणेन तदाह संहितावसाने यो लोकविदित इत्यासि
द्धमिति संहिताशब्दोपि संनिकर्षमात्रे प्रसिद्धः न पदयोरेव संनिकर्ष इति वा
र्त्तिककारो मन्यते ॥ ॥छ॥ ॥इति श्रीहरदत्तमिश्रविरचितायां पदमंजर्यां प्रथ
मोध्यायः समाप्तः ॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥

पदमंजरी पतरा १००

२८००